[5] पृ॰ १२३ द्रष्टव्यम्। [6] यत्पुनः मूलग्रन्थे कवयितृप्रमादमूला अशुद्धपाठा उपलभ्यन्ते, ते वृत्तभङ्गभयात् यथामुद्रितम् उद्धृताः। तद्यथा उत्थास्यामि (उत्थापयिष्यामीति साधु), सीमाः (सीमानः), वमितम् (वान्तम्), दुहितां (दुहितरं), कोऽपि स्त्री (कापि स्त्री), इमा विधवा (इयं विधवा) इति कश्मीरक्रन्दनाख्ये नाटकचक्रे।

# कृष्णात्रेयकवेः काव्येषु प्रतिबिम्बिता सामाजिकी स्थितिः

(डॉ.तन्मयकुमारभट्टाचार्यः)

पश्चिमवङ्गप्रान्ते अर्वाचीनसंस्कृतसाहित्यरचनापरिसरे सीतानाथ-आचार्य-शास्त्रिणः नाम सुतरामेव देदीप्यते। कारयितृभावयितृप्रतिभयोः निरवद्यसमन्वयभूमिरयं कविः। कलिकाता-विश्वविद्यालयस्य महामहोपाध्यायगोपीनाथकविराजप्रवराध्यापकपदम् अनेन सुचिरम् अलङ्कृतम्। कविरयं कृष्णात्रेयगोत्रसम्भव इति कृत्वा क्वचित् क्वचित् कृष्णात्रेयकविनाम्ना परिचीयते। अस्यैव कविवरस्य काव्यकृतीः समधिकृत्य एकां सामासिकीं समीक्षां विधातुं कृतमतिरस्मि। आदावेव तेन रचितानां काव्यकृतीनां विवरणं प्रदीयते –

*भावविलसितम्*[1] – कवितासङ्कलनग्रन्थः, अत्र विद्यन्ते पञ्चविंशतिसङ्ख्यकाः स्वरचिताः संस्कृतभाषोपनिबद्धाः कविताः, वङ्गभाषानिबद्धाः षट् कविताः, अनुवादकविताद्वितयी – एका आङ्ग्लभाषातः अपरा वङ्गभाषातः संस्कृतभाषायामनूदितकविता। प्रायेण सर्वासां संस्कृतकवितानां वङ्गभाषायां गद्यैः पद्यैर्वा अनुवादोऽपि वर्तते।

*शिशुयुवदुर्दैवविलसितम्*[2] – पश्चिमवङ्गे नदीयामण्डलान्तःपातिनि देवग्राम-स्वास्थ्यकेन्द्रे ४.४.१९९५ दिनाङ्के पोलिओभ्याक्सिन् इति औषधस्य प्रयोगसमयतः चतुर्विंशतिघटिकाभ्यन्तरे बहवः शिशवो मृता इति दौर्भाग्यजनकेन वृत्तेन शोकाभिभूतस्य कविचेतसोऽभिव्यक्तिरियं कृतिः। यद्यपि दुर्घटनाविशेषमवलम्ब्य काव्यस्यास्य समारम्भस्तथापि साम्प्रतिके समये परिलक्ष्यमाणायां शिशुयुवजनानां दौर्भाग्यवर्णनपरम्परायां काव्यस्यास्य पर्यवसानम्। कविना समग्रमेव काव्यम् आङ्ग्लभाषायामनूदितम्।

[1] काव्यम् – भावविलसितम्, कविः सीतानाथ आचार्यः, प्रकाशिका – श्रीमती दीप्तिमिश्र, रॉयेल इण्डियान पब्लिकेशन्, प्राप्तिस्थानम् – संस्कृतपुस्तकभाण्डारम्, ३८ – विधानसरणी, कलिकाता – ६। [2] काव्यम् – शिशुयुवदुर्दैवविलसितम्, कविः सीतानाथ आचार्यः, प्रकाशिका – श्रीमती दीप्तिमिश्र, रोयेल-इण्डियान-पब्लिकेशन्, प्राप्तिस्थानम् – संस्कृतपुस्तकभाण्डारम्। ३८, विधानसरणि, कलिकाता – ६।

*का त्वं शुभे* [3] – प्रोद्दामप्रेमोपजीव्यमिदमेकं गीतिकाव्यम्, यस्मिन् उच्चकोटिकस्य प्रेम्णो विविधं चित्रमस्ति चित्रितम्। कृतेरस्याः अत्र कविकृत आङ्ग्लभाषानुवादोऽपि संयोजितोऽस्ति।

*काव्यनिर्झरी* [4] – अयमपि कश्चन कवितासङ्कलनात्मको ग्रन्थोऽस्ति। अत्र सङ्कलिता विद्यन्ते द्विचत्वारिंशत् कविरचिताः कविताः, वङ्गभाषातः अनूदिताः तिस्रः कविताश्च। साकल्येन पञ्चचत्वारिंशत् कविताः सन्त्यत्र कृतौ सङ्कलिताः।

*गौरीनाथचरितम्* – आन्तर्जातिकख्यातिभाजः प्राच्यतत्त्वविदुषः गौरीनाथशास्त्रिणः जीवनचरितम् अस्ति काव्यस्यास्योपजीव्यम्। संस्कृतसाहित्यपरिषत्पत्रिकायां काव्यमिदं प्रकाशितमभूत्।

एतद्व्यतिरेकेणापि प्रकाशिता अप्रकाशिताश्च अनेकाः कविताः कविनानेन रचिताः वर्तन्ते। तासु कासाञ्चन कवितानां प्रकाशनं भवत्येव। कवेरस्य काव्यकृतिषु विषयवैचित्र्यं सुतरामेव लक्षणीयम्। कविनानेन वन्दनात्मिकाः सङ्ख्याधिकाः कविताः रचिताः। तत्र देववन्दनात्मिकासु कवितासु विद्यन्ते – वाणीवन्दना, दशमहाविद्यारूपाया दुर्गाया वन्दना, महादेवमहिमपञ्चकम्, सन्तोषीमातृकास्तोत्रम्, वेदवाणीवन्दना चेति। क्षित्यप्तेजोमरुद्व्योमरूपाणां पञ्चानां भूतानां वन्दनात्मिकाः कविताश्चापि अनेन रचिताः। सिद्धसाधकानां महापुरुषाणां वन्दनापि कृतानेन संस्कृतभाषया। एतादृशीषु कृतिषु ओङ्कारनाथवन्दना, अनुकूलचन्द्रवन्दना, निगमानन्दवन्दनम्, रामकृष्णस्तवनम्, सारदास्तवनम्, विवेकानन्दवन्दनम्, लोकनाथस्तोत्रम्, अरविन्दवन्दनम्, चैतन्यस्तोत्रम् एवमादयः विशेषतः समुल्लेखमर्हन्ति। विश्वकवेः रवीन्द्रनाथस्य तथा वङ्गीयौपन्यासिकस्य शरच्चन्द्रस्य प्रशस्तिरपि कविना कृता। शिक्षागुरूणां शिक्षागुरुसदृशाञ्च केषाञ्चिद्वन्दनाऽपि विरचितानेन। तादृशीषु कवितासु गुरोः सुखमयस्य सपर्या, आचार्यं विवन्दे रमारञ्जनम्, सीतानाथगुरुं वन्दामहे, नमामि

[3] काव्यम् – का त्वं शुभे, कविः सीतानाथ आचार्यः, प्रकाशिका – श्रीमती प्रार्थनादेवी, ए.एफ्.१७७, रवीन्द्रपल्ली, कोलकाता – २००३। [4] काव्यम् – काव्यनिर्झरी, कविः – सीतानाथ आचार्यः, प्रकाशकः – निखिलेशचक्रवर्त्ती, प्रकाशनम् – विजयायनम्, ८ वि, कालेज रो, कलिकाता – ७।

नलिनीकान्तम् इत्यादयः प्राधान्यं लभन्ते। देशमातृकायाः वन्दनात्मिकाः काश्चन कविता अपि पर्यायेऽस्मिन् अन्तर्भवन्ति। अभिनन्दनात्मिकासु कवितासु जयति मानवेन्दुः, कुलपतेः राधावल्लभस्याभिनन्दनम्, करुणा-सिन्धुवर्धापना इति त्रयं समुल्लेखनीयम्। देवतावन्दनात्मिकाः स्तुतयो यद्यपि ऐतिह्यानुसारिण्या रीत्या विनिर्मितास्तथापि कविप्रतिभायाः काचिन्नवीनोद्भावनशीलता क्वचित् क्वचिन् नयनयोर्नापतीति न। वाणीवन्दनातः एकः श्लोकः समुद्ध्रियते –

हर्षादागमजात् स्रुताक्षिसलिलं पाद्याय ते कल्प्यतां
चित्तं दत्तमिदं तवासनतया तस्मिन् सुखं स्वास्यताम्।
भक्त्या त्वत्परया मरालगमने! पुष्पाञ्जलिर्दीयते
साष्टाङ्गं प्रणिपत्य भूमिवलये पादश्च ते वन्द्यते॥९॥[5]

अत्र वाग्देव्याः प्रपूजनं कविना स्वोद्भावितया नवीनया दिशा समाचरितम्। कवेरस्य वन्दनात्मिकां कवितां समीक्षमाणेन राधावल्लभत्रिपाठिमहाभागेनोक्तम् – "अस्य स्तोत्रकाव्यानि क्वचिच्छङ्कराचार्यस्य सौन्दर्यलहरीं क्वचिच्च रावणकृतं शिवताण्डवस्तोत्रं स्मारयन्ति"इति। ताण्डवनृत्यस्य वैश्विकं रूपमनेनालौकिकदृशैवोद्घाटितम् –

शिवस्य चण्डताण्डवध्वनत्पदक्रमाङ्किता
ससागरा प्रकम्पते वसुन्धरा सपर्वता।
भुजाभिघातविक्षता भवन्ति तारका ग्रहा
जटाघटाविघट्टिता स्थली दिवोऽस्थिरा तथा॥ पृ. १०॥[6]

वन्दनात्मिकासु कवितासु कविचेतसः सारसिकी भक्तिधारा समभिव्यज्यमाना सहृदयहृदयान्यपि प्लावयन्ति प्रीणयन्ति च। एतासु कवितासु बहुत्र सङ्गीतधर्मिता हृदयमावर्जयति। दिङ्मात्रमुदाहरणं यथा सारदास्तवनतः –

[5] पृ. – ४, श्लो. – ९, काव्यम्-भावविलसितम्, उपर्युक्तम्। [6] पुरोवाक् (राधावल्लभत्रिपाठिवर्यस्य), काव्यनिर्झरी, उपर्युक्तम्।

यत्पदं चेतसा भावितं सेवितं
 संसृतेर्वारिधेरुत्तमं तारकम् ।
शक्तिदं भुक्तिदं मुक्तिदं सन्ततं
 तामहं सारदां मातरं संभजे ॥[7]

कवेरस्य देशवन्दनात्मिकासु कवितासु भारतमाता, देशमातृकावन्दनम्, भारतं भ्राजते, इति त्रयं विशेषतः समाकर्षकम्। एतासां कवितानां प्रतिस्तबकं प्रतिश्लोकं वा कविना स्वजन्मभूमेर्महिममयं चरित्रं निरवद्यया रीत्या लिखितम्। भारतं भ्राजते इत्येतस्याः कवितायाः प्रत्येकं श्लोकः सङ्गीयमानः भारतगौरवं स्मारयन् समुद्वेलयति हृदयं पुलकयति च शरीरावयवानि। दिग्दर्शनन्यायेन श्लोकद्वयमुद्ध्रियते –

उत्तरे प्रान्तरे पर्वतो दुर्गमो
 विद्यते सन्ततं रक्षणे तत्परः ।
दक्षिणे प्रान्तरे सागरो दुस्तरो
 वारिभिर्वन्द्यते पादकं यस्य च ॥
पूर्वके प्रान्तरे मालया पर्वताः
 संस्थिताः पश्चिमे मारवी मृत्तिका ।
सर्वतो रक्षितं गङ्गया प्लावितं
 भारतं भ्राजते मातृभूर्नश्चिरम् ॥युग्म ॥[8]

विद्वद्वरेण्यः काव्यमीमांसकः करुणासिन्धुदासमहाभागः कवेरस्य देशमातृकावन्दनमिति कवितायां जयदेवीयगीतगोविन्दस्य वङ्किमचन्द्ररचितस्य वन्देमातरमिति गीतस्य च प्रतिध्वनिं शृणोति। तेन समुद्धृतः काव्यांशः एवम् – “त्वमसि मम ध्यानम्, त्वमसि मम ज्ञानम्, त्वमसि मम जीवनम्, त्वमसि मम शरणम्, त्वमसि मम क्रीडास्थानम्, त्वमसि मम भोगभवनम् ॥”[9] अत्र त्वमसि इति पदेन देशमातृका परामृश्यते। गुरूणां गुरुकल्पानाञ्च वन्दनाविधौ याः कविता विरचिताः श्रीमता शास्त्रिणा ता

[7] श्लो. ४, पृ. १३, सारदास्तवनम्, तत्रैव। [8] श्लो. १,२, पृ. ५२, भारतं भ्राजते, तत्रैव।
[9] तत्रैव, पृ. १२, उपोद्घातः (करुणासिन्धुदासमहाभागस्य) देशमातृकावन्दनम् – पृ. १८।

अपि काव्यसम्पदा निरवद्या एव। गुरोः सीतानाथगोस्वामिनः बाह्योपचारनिरपेक्षम् आन्तरैश्वर्य्यसमृद्धं चरित्रं चित्रयता कविनोक्तम् –

अन्तरैश्वर्यप्राचुर्यात् परितृप्तोऽसि हे गुरो।
उपचारविधिर्बाह्यस्तृप्तये स्यात् कथं तव॥
कस्तूरिकासौरभमुग्धचित्तः
स्वच्छन्दवृत्तिर्हरिणो वनान्ते।
प्राप्नोति तृप्तिं किमु हन्त गन्धे
वस्त्वन्तरोत्थे सुरभौ कदाचित्॥[10]

कवेरस्य काव्यकृतौ शोकात्मिकाः काश्चन कविताः परिप्राप्यन्ते, यासु कवितासु लोकान्तरं प्रस्थितानां जनानां महतो गुणान् स्मारं स्मारं विलपति कविचित्तम्। एतासु कवितासु करुणरसधारा स्वत एव समुच्छलिता परिलक्ष्यते। दिङ्मात्रमुदाहरणं यथा –

तमग्रजन्मानमतीव स्निग्धं
तं प्रेमसिन्धुं सुहृदां वरिष्ठम्।
न्यायस्य पाठग्रहणे गुरुं तं
श्यामापदं शोकहताः स्मरामः॥[11]

परमप्रियं सारस्वताग्रजं श्यामापदमिश्रमहाभागं संस्मरता कविनैवमुक्तम्।

कवेरस्य बहुषु काव्येषु साम्प्रतिकसमाजजीवनस्य प्रतिबिम्बनमालोक्यते। शिशुयुवदुर्दैवविलसितमिति सम्पूर्णमेव काव्यं साम्प्रतिकं समाजचित्रं विषयीकृत्य विरचितमस्ति। पोलिओभ्याक्सिन् इति प्रतिषेधकस्यौषधस्य अपप्रयोगात् शिशूनां बहूनामकालमृत्योः करुणं चित्रं कविनाऽतीववास्तवोचितया भङ्ग्या काव्यस्यास्य प्रारम्भिके पर्याये वर्णितम्। तत्र दिङ्मात्रमुदाहरणं प्रदीयते। सोमानामिकायाः कस्याश्चिद् बालिकायाः करुणकरुणं मृत्युदृश्यं चित्रयता कविनोक्तम् – (१३ श्लोकेन)

[10] श्लो. ६,७, पृ. २३, सीतानाथगुरुं वन्दामहे, तत्रैव। [11] श्लो. ५,पृ. ६८, श्यामापदं शोकहताः स्मराम, तत्रैव।

सोढुं ज्वरं क्षमबला न हि कोमलाङ्गी
 मामेति रोदनपरा सुचिराय सोमा ।
मातुः प्रियाङ्कशयने सुखसुप्तिमाप्ता
 पाषाणमूर्तिरभवज्जननी च शोकात् ॥[12]

सोमानामिका काचिद् बालिका तीव्रं ज्वरं सोढुमक्षमा “मा मा” इति वदन्ती रुदन्ती च शनैः शनैः मातुः क्रोडे एव चिराय निश्चलाभवत्। अत्र कविना सोमायाः मरणचित्रं यथोचितशब्दार्थसाहित्येन सम्यक् समुपस्थापितम्। प्रसङ्गेऽस्मिन् केषुचित् श्लोकेषु सर्वकारीयव्यवस्थां प्रति कविना व्यङ्ग्यात्मिकाः कटुकटाक्षा निक्षिप्ताः। एवं वृत्तविशेषमवलम्ब्य विगलत्स्वभावा कविचित्तधारा क्रमेण वर्तमानसामाजिकपरिमण्डले वर्धमानाः शिशूनां युवजनानाञ्च ज्वलत्स्वभावा विविधाः समस्या विषयीकरोति। अवाञ्छितस्य भ्रूणस्य विनाशः, अवैधस्य सन्तानस्य परित्यागः, शिशुभिक्षुकाणां तथा बालश्रमिकाणां दुर्दशा, दुर्गतानां तरुणीनां देहोपजीव्यता – एवमादयः काश्चन समस्याः अत्रोपस्थापिताः कविना वास्तवोचितया भङ्ग्या। भिक्षाप्रवृत्तानां शिशूनां कदर्थनाचित्रमुपस्थापयता कविनोक्तम् –

क्षुत्क्षामकण्ठविवरा विवरागताक्षाः
 पृष्ठप्रलीनजठरा अतिरुक्षकेशाः ।
जीर्णाम्बराश्च विगताम्बरकाश्च केचिद्
 भिक्षार्थिनो मलमयावयवा भ्रमन्तः ॥ ३६ ॥
द्वित्रानवाप्तुमनसश्च कपर्दखण्डान्
 शुभ्रच्छदां विचरतां चरणे पतन्ति ।
अन्विष्यतां किमपि कार्यमलं हि भैक्षे
 रे गर्दभा व्रजत दूरमिति ब्रुवाणैः ॥ ३७ ॥
रूक्षं निराकृततमाः शिशुभिक्षवस्ते
 निःशब्दरोदनरता गलदश्रुधाराः ।
घूर्णन्ति तेऽथ शिरसा तमसीव मग्नाः

[12] श्लो. १३, पृ. २, शिशुयुवदुर्दैवविलसितम्, उपर्युक्तम्।

शून्यायते जगदिदं नयने तथैषाम् ॥ ३८ ॥[13]

काव्यं वैचित्र्यमण्डितं कर्तुकामेन कविना कंसस्य हिरण्यकशिपोः कुन्त्याश्च पौराणिकाख्यानानामवतारणा विहिता। त्रिषु एषु आख्यानेषु शिशून् प्रति अत्याचारोऽविचारश्च दृश्येते।

कवेरस्य आधुनिककाश्यपस्योपदेश इति कवितायां कासाञ्चित् साम्प्रतिकानां नारीणां विकृतं चरित्रचित्रं समुपस्थापितं विभाति। कवितेयं शाकुन्तलस्थितस्य"शुश्रूषस्व गुरून्" इत्याद्युपदेशस्य व्यङ्ग्यानुकरणम्। विषयेऽस्मिन् दिङ्मात्रमुदाहरणं यथा –[14]

शुश्रूषस्व वरं तथाभिनयतः स्वल्पैरहोभिर्यथा
जामाता भविता त्वदेकशरणः स्वातन्त्र्यहीनश्चिरम्।
कन्ये क्रीडनमेव ते तदनु भोः प्रारभ्यतां कौशलात्
पित्रादेः स्वजनाद् यथा स कृपणो विच्छिन्नमूलो भवेत् ॥८॥

अस्यायमभिप्रायः– अयि पुत्रि! जामातरं प्रति सेवाभिनयस्तथा सम्यक् प्रदर्शनीयो यथा स्वल्पेन कालेन स व्यक्तित्ववर्जितस्तव वशमागच्छेत्। ततस्तं पित्रादेः स्वजनाद् विच्छेदनीयः। किञ्च यथा स "मन्येत मां स्वजनकं परमाभिराध्यं त्वन्मातरं स्वजननीमिव गर्भधात्रीम्।"[15] तथा त्वया चेष्टितव्यम्। "भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः" इति काश्यपोपदेशः साम्प्रतिके काले मूल्यहीन एव। पक्षान्तरे – समाधिकारितां पुत्रि न विस्मर कदाचन। भर्तुर्विप्रकृतिं जातु न सहस्व कथञ्चन ॥[16]

कदाचिद् यदि जामाता क्रुद्धः सन् तां भर्त्सयेत्तर्हि अधिकवेगशालिना तव क्रोधेन स तपस्वी भर्त्सनीयः। तथा चोक्तम्– "महिलासमितिं यामि न्यायालयमतः परम्।"[17]सति प्रयोजने श्वश्रूदेवीं वृद्धावासं प्रापय। गृहस्थिता सा अन्तरान्तरा वित्रासनीया।

[13] श्लो. ३६, ३७, ३८, पृ. ५, तत्रैव। [14] श्लो. ८, पृ. २८–२९, आधुनिककाश्यपोपदेशः, काव्यनिर्झरी, उपर्युक्तम्। [15] श्लो. १, पृ. २९, तत्रैव। [16] श्लो. १२, तत्रैव। [17] श्लो. १४, तत्रैव।

शोषिता जातिर्व्यक्तिर्वा शोषणकारिणीं जातिं व्यक्तिं वा प्रतिक्रमेण विद्वेषपरायणा भवति। तस्य चित्ते प्रतिशोधस्पृहा यदा प्रबलायते तदा भवति महाननर्थः। ऐतिहासिकस्यास्य सत्यस्य प्रतीकधर्मितया काव्यिकमुपस्थापनं परिलक्ष्यते कवेरस्य "सिगारेटस्यात्मकथे"ति कवितायाम्। तथाहि धूमपायिनां निःशेषशोषणेन येषामस्तित्वं विपद्यते तैर्धूमवर्तिकाभिरुच्यते – वयं धूमपायिनां शरीरे कर्कटरोगस्य विषं तथा सञ्चारयामो यथा तेषां मृत्युरनिवार्यो भवेत्। तथा च वर्णितं कविना –

इत्येवं पीड्यमानानां वञ्चितानाञ्च मानसे।
प्रतिशोधस्पृहा तीव्रा जायते मरणात्मिका॥ १२॥
कर्कटादिरोगयुक्तान् तान् सर्वान् विदधत्यहो।
अस्मदीयदाहधूमस्तस्माद् देहे गतो द्रुतम्॥१३॥
त्वरयत्यथ मृत्युञ्च तेषामाकालिकं बलात्।
भिषजां पश्यतामेव विशेषज्ञत्वशालिनाम्॥१४॥[18]

प्रतिवेशिनो राष्ट्रविशेषस्य आजन्मविद्वेषो विविधेषु तेनैव प्रारब्धेषु आक्रमणात्मकयुद्धेषु पराजयः, अन्तिमे पर्याये सन्त्रासात्मकेन च्छायायुद्धमाध्यमेन भारतवर्षस्य सुस्थितेर्विनाशाय विविधाः प्रचेष्टाः, विषयेऽस्मिन् समुन्नतशक्तिभाजां राष्ट्राणाम् उपेक्षात्मिकाः नीतिरित्येतत् सर्वमस्ति वर्णितं "सन्त्रासविभीषिका" इत्येतस्याम् आचार्यकवेः कवितायाम्। कविराशां पोषयति यद् भारतं स्वशक्त्यैव प्रवर्तितस्यास्य सन्त्रासस्य निर्मूलनं कर्तुं शक्नुयात्। भारतसैनिकान् समुद्दिश्य कविः ब्रवीति –[19]

अभ्यन्तरे सीमनि चातिदुर्गमे
स्थले स्वदेशस्य जले तथाम्बरे।
प्राणान् पणीकृत्य कृताभिरक्षणाः
सन्त्रासशीलानभिहन्तुमुत्सुकाः॥४७॥

[18] श्लो. १२–१४, पृ. ३३, सिगारेटस्य आत्मकथा, तत्रैव। [19] श्लो. ४७, ४८, पृ. ४०, सन्त्रासविभीषिका, तत्रैव।

हे सैनिका भारतमातृरक्षका
जानीत वः पौरुषयज्ञसाधने ।
सर्वे वयं भारतराष्ट्रवासिन-
श्चिरं भवामो भवतां समीपगाः ॥४८॥

प्रवर्तितस्य सन्त्रासस्य निर्मूलनविधौ विश्वराजनीतौ सर्वोच्चक्षमताधिकृतस्य राष्ट्रविशेषस्य द्विचारितामभिलक्ष्य कविनोक्तम्–

सन्त्रासवादस्य करिष्यते ध्रुवं
निर्मूलनं भो त्वरितं यथोचितम् ।
तेषां किल घोषणमेतदुत्तमं
पुनः पुनः श्रूयत एव कर्णयोः ॥३०॥
द्विचारिता कापि तु कर्मपद्धतौ
केषाञ्चिदेषामभिलक्ष्यतेतराम् ।
सन्त्रासनाशे किल घोर आहवः
स्वराष्ट्रनीतिः किल काङ्क्षिता परम् ॥३१॥
सन्त्राससम्बाधप्रबाध्यमान-
राष्ट्रान्तरार्थे तु सहिष्णुतैव ।
आस्थीयतामित्युपदेशदानं
सयत्नमेषां परराष्ट्रनीतिः ॥३२॥[20]

कवेरस्य "महारुद्रः सज्जीभवति ताण्डवे" इति कवितायाम् अशान्तायाः विश्वस्थितेः काश्चन भयङ्कर्य्यो दिशश्चित्रिताः परिलक्ष्यन्ते। तथाहि नारीत्वस्यावमानना, नारीत्वं प्रति पशुसुलभमाचरणं, धर्मान्धता, चिन्तने वाचने आचरणे च भिन्नता, सामाजिकसमुन्नतेः प्रतिबन्धकरूपेण धनपुञ्जवादस्य एकतो निन्दनम्, व्यक्तिस्वार्थे दलस्वार्थे च पुनस्तस्यैव धनपुञ्जवादस्य समाश्रयणम् इत्येवंविधानां भ्रष्टाचाराणां विविधा दिशश्चित्रिता आलोक्यन्ते निरुक्तायां कवितायाम्। किमधिकं शिक्षाक्षेत्रे भ्रष्टाचारस्य

[20] श्लो. ३०–३२, पृ. ३९, तत्रैव।

आभासोऽप्यत्र परिलक्ष्यते प्राध्यापकानां विद्यापणिकतया। तथा चोक्तं कविना –[21]

छात्रवात्सल्यनिःशून्या त्यक्तदेशहितैषणा।
चरित्रगौरवैर्हीनाध्यापनेच्छा विवर्जिता ॥१३॥
क्षमतालिप्सया युक्ता स्वार्थसाधनतत्परा।
शिक्षाक्षेत्रे कियत्कालं विद्यापणिकता चलेत् ॥१४॥

आधुनिकस्थितिवर्णनपरासु कवितासु "नागमो धरणीप्रान्ते" इत्यपि एकतमा। अनागतान् शिशून् समुद्दिश्य कवितेयं विरचिता वर्तते। कवितायामस्यामाधुनिक्याः पृथिव्याः भयङ्करतायाश्चित्रं समङ्कितं विभाति। प्रस्तरनिर्मितानामायुधानां धातुनिर्मितानामाग्नेयास्त्राणाञ्च समयमतिक्रम्य अद्यतनी पृथिवी पारमाणविकास्त्रकवलिता सुतरामेव विपद्यते। पारमाणविकास्त्रसम्भारसमृद्धानां राष्ट्राणामस्त्रागारसमूहे विद्यमानेषु अस्त्रेषु कतिचन एवास्त्राणि पृथिव्या अस्या अस्तित्वस्य विलोपाय पर्याप्तानि सन्ति। तथा चोक्तं कविना –[22]

राष्ट्राधीशविशेषाणां भाण्डारे योऽस्ति सञ्चयः।
तिष्ठत्याणविकास्त्राणां तस्य कतिपयैरहो ॥९॥
चिरं ध्वस्ता भवेन्नूनं धरणीयं निमेषतः।
संहाराधीशरुद्रस्य भविता न प्रयोजनम् ॥१०॥

अद्यतन्याः पृथिव्या अङ्गानि यत्र तत्र क्षतानि विक्षतानि शोणितरञ्जितानि च। क्वचिन्मात्रा पित्रा उभाभ्यां वा वियुज्यन्ते सन्ततयः। क्वचिद् वा सन्तानविनाशस्य शोकं हृदये धृत्वा जीवन्ति पितरो मातरश्च। विनष्टपतिकायाः स्त्रियः करुणार्तनादः क्वचित् क्वचिदायाति श्रवणमार्गम्। मानवाकृतिभिर्दानवैरपहृतः धरण्याः श्यामलिमा। एवमन्वहं पृथिव्याः परिणतिः भयङ्करतातो भयङ्करतां व्रजति। अतश्च कविरनागतान् शिशून् समुद्दिश्य सावधानवाणीमुच्चारयति विपर्यस्तायामस्यां धरण्यां तैः

[21] श्लो. १३, १४, पृ. ४५, महारुद्रः सज्जीभवति ताण्डवे, तत्रैव। [22] श्लो. ९,१०, पृ. ४२, नागमो धरणीप्रान्ते, तत्रैव।

कथमपि नागन्तव्यम्, स्थातव्यञ्च तैः आनन्दलोके। कविना आशास्यते भयङ्करतमपरिणतेः परं नवीना सृष्टिः प्रादुर्भवेत्। तदा ऋतस्य सत्यस्य च प्रदीप्तरश्मिभिः पृथिवीयं द्युतिमती भवेत्। सुषमस्थितिशालिन्यां तस्यां पृथिव्यां यथेच्छं समवतरन्तु नाम शिशव इति कवेराकूतिः। तथा चोक्तं कविना –[23]

तस्माच्छिशो त्वं क्रीड कल्पलोके
प्रभातपुष्पोपमशुद्धदीप्ते।
अनागतोऽद्यापि यथाभिलाषं
सृष्टौ किलास्यां विनिपातितायाम् ॥१७॥
नवीनसृष्टौ सुषमस्थितायाम्
ऋतेन सत्येन समन्वितायाम्।
प्रशान्तसौन्दर्यविभूषितायां
समागमिष्यन् भव हे महीयन् ॥१८॥

विंशशताब्द्या अष्टनवतितमे ख्रीष्टवर्षे (१९९८) तदानीन्तनस्य प्रधानमन्त्रिवर्यस्य अटलविहारिवाजपेयिनः शासनकाले पोखराणनामके स्थाने परीक्षामूलके पारमाणविकविस्फोरणे अस्माकं जातीयानुभूतेस्तथा विश्वप्रतिक्रियायाः काव्यिकी प्रतिच्छविः प्रतिबिम्बिता विभाति कवेरस्य "बुद्धः स्मयमानः" इति कवितायाम्। विश्वराजनीतेः घृण्यकपटचारिताहेतोः भारतस्य सार्वभौमत्वे समाशङ्कापदवीं नीते एतादृशं विस्फोरणं जातेरात्मप्रत्ययं वर्धयति। सुदीर्घसांस्कृतिकैतिह्येन बलवत्तमं भारतं विश्वराजनीतौ नायकायमानानां राष्ट्राणां नेतॄणाञ्च भयं विलोभनं वा तृणाय मन्यते। तथाचोक्तं कविना –[24]

ये नाम केचिदिह नोऽतिविभीषयन्ते
ये नाम केचिदिह नश्च विलोभयन्ति।
जानन्ति ते किमपि कूटधियोऽस्मदीय-

[23] श्लो. १७, १८, पृ. ४३, तत्रैव। [24] श्लो. २३, पृ. ३६, बुद्धः स्मयमानः, तत्रैव।

देशस्य संस्कृतिगतं दृढशक्तिमत्त्वम् ॥२३॥

तथापि यदि किमपि राष्ट्रान्तरं बलाद् भारतं प्रति अन्यायमाचरेत् तर्हि भारतवासिनो मिलितभावेन तस्य प्रतिरोधं कुर्य्युरिति स्वदेशवासिनः प्रति कवेरुदात्तमाह्वानम् –[25]

तथापि जायेत यदीह कश्चित्
सम्बाधसङ्घातमयः प्रकाशः ।
सार्धञ्च केनापि मदोद्धतेन
मात्सर्य्ययुक्तेन प्रभुत्वभाजा ॥२४॥
अग्रेसरत्वे किल मातृभूमे-
स्तदात्मदानाय कृतप्रतिज्ञाः ।
हे देशमातुः प्रियवीरपुत्रा
भवन्तु सर्वे मिलिता भवन्तः ॥२५॥

शिल्पसमुन्नतिव्याजेन सर्वकारीयाविवेचकतां प्रति व्यङ्ग्यकशाघातात्मिका कविता "वद शिल्पसंस्कृते" इति। कृषिकर्म शिल्पकर्म चेति मिथः परिपूरके इति भारतीयमैतिह्यम्। कृषेः प्रतिकूलतया शिल्पसंस्थापनं भारतस्य समुन्नतेः न परिपोषकम्। अन्याय्येन पथा शिल्पस्थापनप्रचेष्टाया दुष्परिणामतायाः करुणं चित्रं कविनात्र समङ्कितम्। कवितायामस्यां प्रत्यक्षवृत्त्या शिल्पसंस्कृतिः यद्यपि अभियोज्यतां नीता तथापि परोक्षवृत्त्या तदानीन्तनसर्वकारस्य अविमृश्यकारिता धिक्कारपदवीं नीता। अन्तिमे सावधानवाणी एवं समुच्चारिता –[26]

हे शिल्पसंस्कृते मान्ये सावधानं विभावय ।
इतिहासगतेः शक्तिं स्मर विश्वनियामिकाम् ॥
कृषिसम्पद्भवां दीप्तां पीडयित्वा च संस्कृतिम् ।
प्राक्तनीं बान्धवीं ते च समृद्धिः का भविष्यति ॥
जनावमाननावह्निः कणशो धुक्षते यदि ।

[25] श्लो. २४, २५, तत्रैव। [26] श्लो. १४, १६, पृ. ४६, वद शिल्पसंस्कृते, तत्रैव।

प्रलयाग्निसमः काले विश्वं दन्दह्यते ध्रुवम् ॥१४–१६॥

राजनैतिकसमर्थनपुष्टानां विविधेषु क्षेत्रेषु नेतृत्वदाने व्यापृतात्मनां वङ्ग-भाषायां “दादा”इति सम्बोध्यमानानां जनानां दुष्कर्मजातस्य संक्षिप्तमेक-मालेख्यं परिप्राप्यते दादाजनेति कवितायाम्। अत्र व्यङ्ग्यवृत्त्या एतेषां दुर्जनानां कुकीर्त्तेः चित्रं किञ्चित् चित्रयितुं प्रयतितं कविना। दिङ्मात्रमुदा-हरणं यथा –[27]

आसाद्य मानवं जन्म विस्तारय स्वपौरुषम्।
यथेच्छं क्रियतां बन्धो धर्षणमारणादिकम् ॥१५॥
केवलं शरणं याहि दादा-जनान् समीपगान्।
न ते शास्ति भयं किञ्चित् सम्भवेद् धरणीतले ॥१६॥

अन्यायेन पथा एतेषां वित्तप्राचुर्य्यजनितां विलासबहुलां जीवनपद्धतिं वर्णयता कविनोक्तम् –[28]

“वासा”दि यानेन न साम्प्रतं ते
व्रजन्ति कुत्रापि यथैव पूर्वम्।
“कारा”ख्ययानेन निजेन नित्यं
स्वच्छन्दतस्ते गमने रमन्ते ॥२४॥

“सहसा पतिरप्यस्या उपाक्रमत रोदितुम्” “अरण्यषड्विंशिका” “कङ्काल” एवमादिषु कवितासु अपि साम्प्रतिकी सामाजिकी स्थितिः सुतरामेव प्रतिबिम्बिता वर्तते।

साहित्यं समाजश्चेति मिथः परिपूरकम्। समाजस्य विवर्तनेन सह संस्कृतेरग्रगत्या समं विवर्तते साहित्यस्वरूपम्। कविः प्रबलानुभूतिस-म्पन्नः समाजिकविशेषः। समाजस्य सुखदुःखे आशानैराश्ये समुत्थानप-तने न्याय्यान्याये प्रभृतीनि कविचित्तमुद्वेलयन्ति निरन्तरम्। तादृशस्य

[27] श्लो. १५, १६, पृ. ४८, दादा जनाः, तत्रैव। [28] श्लो. २४, पृ. ४९, तत्रैव।

समुद्वेलितस्य कविचित्तस्य वाङ्मयाभिव्यक्तिस्तावत् काव्यम्। कविचित्तस्य तादृशानुभूतिप्रवणतामधिकृत्य कविसार्वभौमेन रवीन्द्रनाथेनोक्तम्– "पृथिवीर येथा तार यत उठे ध्वनि, आमार बाँशीर सुरे साडा तार जागिवे तखनि।" (यावन्तो यत्र ध्वनय उत्तिष्ठन्ति महीतले। मम वंशीस्वरे तेषां प्रतिध्वनिर्भवेत्तदा॥)[29]

अर्वाचीनसाहित्यसमीक्षककविवरो राधावल्लभः त्रिपाठी तदीयेऽभिनवकाव्यालङ्कारसूत्रग्रन्थे "लोकानुकीर्तनं काव्यम्" इति काव्यलक्षणस्य व्याख्यानावसरे साहित्यसमाजयोरान्तरसम्बन्धमधिकृत्योक्तवान् –

साहित्ये जीवनं सर्वं सर्वाङ्गीणं नवं नवम्।
प्रतिबिम्बत्वमायाति समुल्लसति वर्धते॥
अद्भुतः प्रतिबिम्बोऽयं बिम्बमेव विभावयन्।
संस्कुर्वन् जीवनं तस्मिन् समवेतो नवायते॥
जीवने चास्ति साहित्यं साहित्ये जीवनं तथा।
परस्परकृता सिद्धिरनयोः सम्प्रवर्तते॥[30]

जगतोऽस्य सृष्टौ स्थितौ च प्रेम्णः अपरिहार्यता अवश्यमेवाभ्युपगन्तव्या। मानवानाम् उत्पत्तौ विकाशे प्रकाशे च प्रेम्णः गतिमत्ता सुतरामेव नेत्रपथमायाति। कवेरस्य दृष्टौ प्रेम्णो द्वैविध्यं परिस्फुरति – एकं सोपाधिकम् अपरं निरुपाधिकम्। पितृ–मातृ-सुत-सुता-प्रिय-प्रियतमादिषु परिलक्ष्यमाणं प्रेम सोपाधिकम्। आध्यात्मिकम् ईश्वरविषयकं वा प्रेम निरुपाधिकं प्रेम। "का त्वं शुभे" इति काव्यस्य समर्पणावसरे रच्यमानेषु श्लोकेषु कवेरस्य प्रेमविषयिणी दृष्टिरियं प्रतिभासमाना विलोक्यते। कवेरस्य प्रोद्दामप्रेमोपजीव्यं काव्यं "का त्वं शुभे" इति। काव्येऽस्मिन् कवेः प्रेमाभिसारिणी चित्तधारा शुभामुद्दिश्य तरङ्गिता वर्तते। शुभा कदाचित् कवेः समीपं समागता, क्षणं स्थिता ततः सा प्रस्थिता। शुभां प्राप्य कवेः सम्भोगात्मिका चित्तवृत्तिः समुद्वेलिता जाता। एतादृशस्य प्रेम्णः

[29] पृ. ४३५ (द्वितीयस्तबकम्), सूर्यावर्त(रवीन्द्रकवितासङ्ग्रहः) शङ्खघोषः, विश्वभारती, शान्तिनिकेतन। [30] सू १.१.३., अभिनवकाव्यलङ्कारसूत्रम्, प्रो. राधावल्लभः त्रिपाठी, प्रका. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००५।

वर्णनं काव्यस्य प्रथमे भागे वर्तते। ततः शुभायाः प्रस्थानानन्तरं कवेश्चित्तं कियत्कालं यावत् वेदनाविधुरं जातम्। किन्तु गच्छत्सु कालेषु कविः धृतिमासाद्य शुभायाः प्रतिच्छविं समग्रे विश्वे द्रष्टुमनुभवितुञ्चारभते स्म। तथा चोक्तं कविना –

गच्छत्सु कालेषु सुतीव्रतागुणे
  वैधुर्यवह्नेः शमिते कथञ्चन।
शनैः शनैर्भावसमाधिमग्नता
  काचिन्मदीये हृदये समागता ॥ ३ ६ ॥
समाधिना तेन विमुक्तदृष्टि-
  र्द्रष्टुं क्रमे तां नवप्रत्ययेन।
सान्निध्यमस्याञ्च लभे समन्ता-
  न्निवर्तितो नैव तु विस्मयो मे ॥ ३ ७ ॥[31]

शुभाया इयमशरीरिणी सत्ता कविं सुचिरमनुप्राणयति प्रेरयति च। अयमेव काव्यस्य मुख्यविषयः। केयं शुभा – मानवी वा मानसी वा? इत्यस्मिन् विषये कविना स्पष्टविधया न किमप्युक्तम्। समीक्षकाणां निर्णयस्तु मानसीपरत्वे एव पर्यवस्यति। कवेः रवीन्द्रनाथस्य काव्ये एतादृशी प्रेमचिन्ता बहुत्र प्रतिबिम्बितैव। शुभा अत्र शाश्वतप्रेम्णः प्रतीकरूपेणापि ग्रहीतुं शक्यते। एतदेव कविना तुरीयप्रेमसंज्ञया काव्योत्सर्गावसरेऽभिहितम्। तच्च प्रेम परमात्माश्रयि।

जीवात्मा परमात्मना सह मेलितुमिच्छति, भागवतीं प्रेमधारामाश्रित्य भवत्तो भगवता सह मेलितुमिच्छति। भाग्यवशात् तादृशमिलनानन्दः क्षणमनुभूयते क्षणान्तरे च तिरोधीयते। एतदेव कविना प्रतीकरूपेणोपस्थापयता उक्तम्– "शुभा कदाचित् निशायां समागता निशात्यये च प्रस्थिता। तदनु तदीयचिन्ताव्याकुलितचेतसा कविना विश्वपरिक्रमा विहिता। अत्रोक्तं शुभापि कवेः कृते वरणमाल्यं ग्रथ्नाति। भाविनि काले कल्पलोके तयोर्मेलनं भवितेति कवेर्विश्वासः। जीवात्मा यथोचितसा-

[31] श्लो. ३ ६, ३ ७, पृ. ४, का त्वं शुभे, उपर्युक्तम्।

धनसम्पत्त्या युतः परमात्मना सह मिलति, भक्तोऽपि लभते भगवतः सान्निध्यम् । काव्यस्यास्यैतादृशमभिव्यञ्जनं सहृदयवरिष्ठानां रमारञ्जनमुखोपाध्यायप्रमुखानां समीक्षादर्पणे प्रतिबिम्बितमाभाति । "In this present lyric Sitanath Acharya has given expression to the longing of the man for union with his highest ideal, which is a conglomeration of Bliss, Beauty and Consciousness; he also presents the longing of this idea, the other name of which is the 'Sublime' for union with her mortal lover. It is for this reason that the lady stationed in the realm of Imagination is portrayed as preparing garlands for welcoming and honouring her consort. The thought that this union is not going to materialize, however, brings tears on her eyes and these tears roll down her cheeks making her more beautiful."[32] कवेरस्य समुच्चकोटिकप्रेम्णः काव्यिकं रूपं यदस्माभिः प्रत्यक्षीक्रियते "का त्वं शुभे" इति काव्ये तस्य प्राथमिकः प्रकाशः पूर्ववर्तिनीषु कासुचित् कवितासु परिलक्ष्यते। तथाहि भावविलसितमित्यत्र स्थितायां २३सङ्ख्यकायां कवितायां रजनीगन्धानामिकायामेतदेवाभिव्यञ्जितमस्ति यत् प्रेम्णः अनुसरणे एव आनन्दः सौन्दर्यं वा न तु प्रेमास्पदस्य प्राप्तौ। रजनीगन्धानामकस्य कुसुमस्य सौन्दर्य्येण विमुग्धचित्तेन कविनोच्यते –

अयि रजनीगन्धे ! अशिथलबन्धे !
केवलं त्वं पश्यामि, मनसा चानुभवामि, न तु त्वां स्पृशामि ।
यदि भवति कामना मनसि मे जायमाना,
मम वासभवनविताने, सञ्चित-सज्जित-फुल्लादाने, कृत्रिमभा-
जने, तव संस्थापने ।
तदा सौन्दर्यं भवेद् विखण्डितम् ।
तव सौरभं भवेद् विबाधितम् ॥४ ॥[33]

[32] पृ. ix, का त्वं शुभे, Foreword by Prof. Ramaranjan Mukherjee. उपर्युक्तम् । [33] श्लो. ४, पृ. ६९, रजनीगन्धा, भावविलसितम्, उपर्युक्तम् ।

भावविलसितकाव्यग्रन्थस्थितायां १८सङ्ख्यकायां कल्पनेति कवितायामपि कवेरस्योत्तुङ्गप्रेमसञ्चारमानसिकता सुष्ठु अभिव्यज्यमाना विभाति। गतानुगतिके प्रात्यहिके जीवनमार्गे सञ्चरन् कविः क्लान्तिमनुभवति। स कल्पनायाः कल्पितप्रेमिकायाः सङ्गसुखं याचते। सा कल्पना कल्पलोके मणिसिंहासने सन्निषण्णास्ति। सा कविं त्वरितमेव तस्याः समीपं नयनु इति प्रार्थ्यते कविना। तस्मिन् अमृतलोके कविः कल्पनायास्तस्याः केवलं सहचरो भूत्वा स्थातुमिच्छति काव्यञ्च नवनवं रचयितुमिच्छति। तथा चोक्तम् –

पिबतस्तव सङ्गमुत्तमममृतं पुण्यफलैकसाधनम्।
उदिता भविता क्षुधा तृषा नहि मे पार्थिवलोकसम्भवा॥११॥
त्वदीयसान्निध्यमजर्य्यमर्जयन्
 त्वदीयरागेण मनो विनोदयन्।
विश्वस्य वार्तां विविधां विलोकयन्
 स्थास्यामि काव्यं मधुरं वितन्वन्॥१२॥[34]

कवेरस्य काव्यं समीक्षमाणेन राधावल्लभत्रिपाठिमहाभागेन कासुचित् कवितासु कवेरस्यान्तर्मुखीनता परमोत्कर्षसीमानमधिरूढा सहृदयहृदयानि ह्लादयतीति वैशिष्ट्यमेकं निदर्शितम्। ईश हे दुःखशतं दीयताम्, चित्त रे बन्धनं छिद्यताम्, महासङ्गीतम्, सङ्कल्पः इत्यादीनि विशेषतः समुल्लेखार्हानि। ईश हे दुःखशतं दीयतामिति कवितायां कविना ईश्वरान्तिके प्रार्थ्यते –

ईश हे दुःखशतं दीयतां वेदनया विध्यताम्
 चित्तमिदं मामकं पूततरीक्रियताम्।
वह्निना दाहितं शिल्पिना क्लेशितम्
 ज्योतिषा भास्वता दीप्यते हेमकम्॥[35]

[34] श्लो. ११, १२, पृ. ५७, कल्पना, तत्रैव। [35] स्तबकः – ९, पृ. ५३, ईश हे दुःखशतं दीयताम्, काव्यनिर्झरी, उपर्युक्तम्।

कवेरस्य विद्यन्ते काश्चन कविताः यासु वर्णना लभते प्राधान्यम्। शीतकालः, वसन्तः, वङ्गेषु विजया, विजया, दोलपूर्णिमा इत्यादयः कविताः अस्मिन् पक्षे अन्तर्भावयितुं शक्यन्ते। तत्र शीतकालस्य रुद्रमूर्तिं वर्णयता कविनोक्तम्–

त्रिबलिबलितभालः कम्बलैः संवृताङ्गो
विपुलविशदकेशो यष्टिदण्डावलम्बी।
वनप्रकृतितरुण्या लास्यमास्यस्य हास्यं
दवयसि सहसा त्वं रौद्रमूर्ते हिमर्तौ ॥६॥[36]

विजयादशम्याः मिलनोच्छलमानन्दमयं रूपं वर्णयता कविना निगदितम् –

अद्येदं भुवनं विभात्यभिनवं दिव्यप्रभोद्भासितं
वस्त्रान्नादिगता गतेव नियता या भावना पार्थिवी।
सर्वे जीवगणाः प्रफुल्लमनसो लीनो विभेदोऽधुना
दूरादेत्य मिथो मिलन्ति मनुजाः स्निग्धैरधीरं जनैः ॥६॥[37]

दोलपूर्णिमाया निर्बाधानन्दप्रसृतिं वर्णयता कविना समीरितम् –

आभ्रं मर्दय रम्य आनने, कुङ्कुममङ्कय देहविताने,
शृङ्गकमानय जलमभिवर्षय रञ्जय देहं रञ्जय चित्तम्
इह दोलप्रसङ्गे नवजीवनरङ्गे।[38]

कविरयं विद्वद्वरेण्यः तथा साहित्यसमीक्षकश्च। अनेन सम्पादिता विविधा ग्रन्थाः परःशताः गवेषणामूलकनिबन्धाश्च। कवेरस्य विद्वत्प्रज्ञां भावयित्रीं प्रतिभाञ्च प्रतिपादयति। विविधानां प्रबन्धानां प्रारम्भावसरे क्वचित् क्वचिदुपसंहारावसरे च अनेन याः स्वरचिताः कविताः सन्निवेशितास्तासां

[36] श्लो. ६, पृ. ३५, शीतकालः, भावविलसितम्, उपर्युक्तम्। [37] श्लो. ६, पृ. २९, वङ्गेषु विजया, तत्रैव। [38] दोलपूर्णिमा, पृ. ५९, काव्यनिर्झरी, उपर्युक्तम्।

साहित्यिकगौरवमपि सुतरामेव समुल्लेखार्हम्। अपि चानेन वङ्गभाषातः आङ्ग्लभाषातश्च काश्चन कविताः संस्कृतेऽनूदिताः। रवीन्द्रनाथ-मधुसूदनदत्त-काजीनजरुलइस्लाम-सुकान्तभट्टाचार्यप्रमुखाणां वङ्गकवीनां काश्चन कविता अनेन संस्कृते सुष्ठु अनूदिताः। विषयेऽस्मिन् दिङ्मात्रमुदाहरणं यथा – मधुसूदनदत्तस्य "आत्मविलापः" इति कवितायाः अनुवादे परं कृतित्वं प्रदर्शितं कविनानेन –

रे मत्तचित्त मम ते भविता प्रभाता
  रात्रिः कदा तव च जागरणं कदा वा।
तज्जीवनोपवनयौवनपुष्पकान्ति-
  स्तिष्ठेत् समुज्ज्वलतया समयं कियन्तम् ॥ ३ ॥
नीरस्य बिन्दुर्वद चाकचक्यं
  दूर्वादले विन्दति किं चिराय।
को न प्रजानाति यदम्बुबिम्बः
सद्योनिपात्यम्बुमुखे च भावी ॥ ४ ॥[39]

मूलकविताया भावं यथायथतया संस्कृते परिणामितवान् कविरयम्।

अनया संक्षिप्ततया समीक्षया निश्चप्रचमिदं वक्तुं शक्यते यत् कृष्णात्रेयकवेरस्य सृष्टिधर्मिणी साहित्यमन्दाकिनी सहस्रदिग्गामिनी विविधरुचिसम्पन्नान् सहृदयान् अशेषतः प्रीणयन्ति। समग्रे भारते कवेरस्य काव्यमुग्धाः सहृदयाः विविधान् प्रबन्धान् रचयन्ति। कवेरस्य काव्यप्रतिभां समभिवन्दयता कुलपतिना राधावल्लभत्रिपाठिमहाभागेनोक्तम् –

सम्प्रति कवयो नैके सुरगिरि विविधा वितन्वन्ति रचनाः।
  सीतानाथसदृक्षा विरलाः संवेदनप्रवणाः ॥[40]

[39] श्लो. ३, ४, पृ. ७९, आत्मविलापः, भावविलसितम्, उपर्युक्तम्। [40] पृ. १०, पुरोवाक्, (प्रो. राधावल्लभत्रिपाठिवर्य्यस्य), काव्यनिर्झरी, उपर्युक्तम्।

कवेरस्य प्राक्तनच्छात्रेण पश्चिमवङ्गराष्ट्रियविश्वविद्यालये संस्कृतसङ्कायाध्यक्षपदमलङ्कुर्वाणेन श्रीमता डॉ.अयनभट्टाचार्येण कृष्णात्रेयकवेरभिवन्दनात्मिकायां कवितायामेवमुक्तम् –

न खलु न खलु खेदः सङ्गतः पण्डितानां
क्व कवय इति भासः कालिदासस्तथान्ये ।
मम गुरुवरयोगात् सूतसत्काव्यबन्धा
नवनवप्रसवा सा काव्यकान्ता न बन्ध्या ॥[41]

[41] पृ. १२, आचार्यप्रशस्ति, पद्यवल्लरी, डॉ. अयनभट्टाचार्यः, प्रकाशक – संस्कृतबुकडिपो, २८, १, विधानसरणि, कलिकाता – ६, २००८।

# Īśvaracandra Vidyāsāgara's Sanskrit Writings (*Sudip Chakravortti*)

Iśvaracandra Bandyopādhyāya was born in a poor Brahmin family in the village of Bīrsiṁha in the Paścim Medinīpur district of West Bengal, on the 26th of September, 1820 A.D. On the 29th July of 1891 A.D. he left this mortal world for his heavenly abode, thereby creating a huge gap in the Sanskrit intelligentsia. Like a good many Sanskrit scholars, he strongly believed that from a linguistic point of view the Modern Indo Aryan Languages prevailing in India could not survive without sufficient nourishment from their root language, i. e. Sanskrit. For that very reason he engaged himself in editing eminent Sanskrit works, in writing proposals for the betterment of a Sanskrit teaching-learning policy, in preparing Sanskrit grammars in the vernacular language and in writing books in the Bengali language. Besides, he was also successful in promoting women's education, introducing the widow remarriage act and in the postponement of the burning of chaste wife on the funeral pyre of her husband (*satīdāhaprathā*). He always supported his activities from the doctrines of the Sanskrit scriptures.

However, the present discussion will be restricted to Vidyāsāgara's self-composed writings in Sanskrit, which may be considered as specimens of Modern Sanskrit Literature and which—this ought to be mentioned—are yet to be consulted by any scholar. It is a matter of deep regret that most of his writings have gone to the grave of time. The following analysis is based on the Sanskrit writings of Vidyāsāgara presently available, that is, the *Bhūgolakhagolavarṇanam*, *Meghavarṇanam*, *Satyakathanamahimā*, *Vidyāpraśaṁsā*, *Agnīdhrasya Tapasyā*, *Sarasvatīvarṇanam*, *Gopālavarṇanam* and the *Robarṭkaṣṭavarṇanam*. Besides these, we also have the *Ślokamañjarī*, a collection of independent Sanskrit verses.

## *Bhugolakhagolavarṇanam*

The *Bhūgolakhagolavarṇanam* is a detailed description of the outward structure of Earth and a delineation of the universe. The work consists of a total of four hundred and eight verses and it has six distinct parts which are — *Introduction* (*sūcanā*), *Bhūgolavṛttānta*, *Vyomamaṇḍala-vṛttānta*, *Viśvabrahmāṇḍavṛttānta*, *Yuropīyamate Khagolavṛttānta* and *Yuropīyamate bhūgolavṛttānta*.

The introduction consists of the five initial verses of the work. At the very outset Vidyāsāgara offers salutation towards the omnipotent God Śiva for the successful completion of the whole work, and in the following verse he introduces the main subject of his work. The first two verses are—

> *yatkrīḍā bhāṇḍavad bhāti brahmāṇḍam idam adbhutam*
> *asīmamahimānaṃ taṃ praṇamāmi maheśvaram* (1)
> *purāṇasūryasiddhānte yūropīyamatānugam*
> *kartavyaṃ kila bhūgolakhagolaparivarṇanam* (2)

The *Bhūgolavṛttānta* depicts the world on the basis of Indian mythology. The description of the seven islands takes up verses 6 to 143. The seven islands are: Jambu, Plakṣa, Śālmalī, Kuśa, Krauñca, Śāka and Puṣkara. The boundary, length, distribution and characteristic features of these islands are given and the author has mentioned the names of the countries, rivers, and mountains of these islands as well as the type of soil, vegetation and people.

The *Vyomamaṇḍalavṛttānta* is described in verses 144 to 177 again on the basis of Indian mythology (*purāṇam*). The description of the firmament (*antarīkṣam*), Indrapurī (*indrapurī*), Saṁyamanīpurī (*saṃyamanīpurī*), Varuṇapurī (*varuṇapurī*), Saumyapurī (*saumyapurī*), the solar sphere (*sūryamaṇḍalam*), the lunar sphere (*candramaṇḍalam*), the sidereal system (*nakṣatramaṇḍalam*), the Great Bear (*saptarṣimaṇḍalam*) and eclipses (*grahaṇam*) may give us an idea about the depth of knowledge of the author.

*Viśvabrahmāṇḍavṛttānta* has its source in the famous Sūryasiddhānta. The Viśvabrahmāṇḍavṛttānta is found in verses 178 to 229, wherein the total geographical description of the Earth and the cosmos are delineated.

*Yuropīyamate Khagolavṛttānta* (cosmology according to the European view) has been given by Vidyāsāgara in verses 230 to 279. European science and also mythology has deeply influenced the author when preparing his enchanting verses about the solar family with its nine planets, the causes of the occurrence of day and night, and the dark and light fortnights. Ancient falsified notions about ecplises and their scientific explanation are given, as well as a description about the use of telescopes.

*Yuropīyamate Bhugolavṛttānta* (geography according to the European view) is the last part of *Bhūgolakhagolavarṇanam* and ranges from verse

280 to 408. Modern geographical notions have influenced the author in the composition of this portion. Asia, Europe, Africa and America and the names of the main rivers and mountains of the continents are described here. In Asia, he has offered a detailed presentation of the main states, cities and islands of India. He has also mentioned countries like China, Japan, Myanmar, Tibet, Persia, Arabia, Turkey, Russia and Sri Lanka, along with the names of their capitals. In the section on Europe, Vidyāsāgara has elaborately described each country with their characteristic features and distribution. The countries of Europe are: France, Spain, Portugal, the Netherlands, Denmark, Sweden, Germany, Switzerland, Austria, Prussia, Italy, Turkey and Russia. It is to be mentioned that Turkey and Russia are included in both the sections on Asia and Europe, but their detailed description is given in the section on Europe. Only the countries of Miser, Abyssinia, Algeria and Morocco are included in the continent of Africa. The names of the Indian Ocean, Atlantic Ocean and the Mediterranean Sea occur here. According to Vidyāsāgara, the climate of this continent is too hot. Finally, the author comes to North and South America, but mainly deals with the United States of America and Brazil.

*Bhūgolakhagolavarṇanam* has 408 verses, all in the Anuṣṭup metre, with only one verse (no. 180) in Upajāti. Upamā and Anuprāsa are used in few cases as rhetoric devices to adorn the verses. One sample of Anuprāsa is given here:

> *tatra caitrarathaṃ citraṃ nandanaṃ cittanandanam*
> *atibhrājiṣṇu vaibhrājaṃ mādanaṃ gandhamādanam* (36)

It appears from this kind of work that scientific ideas may be easily expressed through the words of Sanskrit poets, as of course by poets of other languages. Both the ancient notions and the modern scientific ideas in respect to the outward structure of the Earth and cosmology have been successfully painted by Vidyāsāgara on the same canvas.

## *Meghavarṇanam*

Meghavarṇanam comprises of ten verses. Among them, the first verse is in the metre Upajāti and the remaining nine verses in Vasantatilakā. The verses display Anuprāsa, Upamā, Rūpaka, Utprekṣā, Arthāntaranyāsa etc.

and the poem is very much influenced by the famous Meghadūta. Here, a lucid example is given from Meghavarṇanam to show the quality of the poem:

*kṣīṇaṃ priyāvirahakātaramānasaṃ māṃ*
*no nirdayaṃ vyathaya vārida nātmavedin* /
*kṣīṇo bhaviṣyasi hi kālavaśaṃ gataḥ san*
*āste tavāpi niyatas taḍitā viyogaḥ* (4)

The poem is full of *vipralambhaśṛṅgāra* and follows the psychology of a man who is eager to meet with his beloved.

### *Satyakathanamahimā*

Satyakathanamahimā is composed in prose with only two stanzas. It was written in 1835 A.D. and Vidyāsāgara was given a scholarship of Rs. 100 for this creation. Being inspired by the Indian heritage of telling the truth, Vidyāsāgara has here praised the qualities of truthfulness. The first line of the prose is: *satyaṃ hi nāma mānavānāṃ sārvajanīyāyā viśvasanīyatāyā hetuḥ* |

### *Vidyāpraśaṃsā*

Vidyāpraśaṁsā consists of eight verses. Nos. 1, 2, 3, 4 and 8 are in the Vasantatilakā metre and verses 5 and 6 are in Anuṣṭup. Vidyāsāgara has here engaged himself in praising education and knowledge. He wrote this piece in 1836 A.D., and attained a scholarship of Rs. 100 for his creation. Here the last verse is given to show the main theme of the poem:

*ajñānakhaṇḍanakarī dhanamānahetuḥ*
*saukhyāpavargaphalamārganideśinī ca* /
*sā naḥ samastajagatām abhilāṣabhūmir*
*vidyā nirasya jaḍatāṃ dhiyam ādadhātu* (8)

### *Agnīdhrasya Tapasyā*

In honour of king Agnīdhra, Vidyāsāgara has composed four verses, all of which are in Vasantatilaka. To make the poem more attractive, the

author has nicely employed Anuprāsa, Rūpaka and Utprekṣā in the verses, and the charm of the poem can only be gauged by a competent reader. For that very reason, this creation of Vidyāsāgara once again won him a scholarship, this time in 1837 A.D. A nice specimen in form of a verse is given:

> *asmin nirākṛtakalaṅkaśaśāṅkabimbe*
> *nīlāmbujanmayugalaṃ yadi ? vibhāti* /
> *manye sudhāṃśumukhi saṃvananaṃ vidhātrā*
> *lokatrayasya vihitaṃ mahatādareṇa* (4)

## *Sarasvatīvarṇanam*

Sarasvatīvarṇanam is a poem of single verse with *hāsyarasa* and portrays all those students who try to regal their tongue on the day of the worshiping of Sarasvatī, the goddess of education or knowledge, by tasting her offerings. The verse is:

> *lucī-kacūrī-maticūra-śobhitaṃ*
> *jilepi-sandeśa-gajā-virājitam* /
> *yasyāḥ prasādena phalāram āpnumaḥ*
> *sarasvatī sā jayatān nirantaram* //

## *Gopālavarṇanam*

Here, we get five verses in which Gopāla or the famous God Śrīkṛṣṇa is described by Vidyāsāgara. The activities of Bālagopāla or little Gopāla are delineated by the poet. All the verses are composed in the Anuṣṭup metre. Rūpakas are used only in few cases. A verse is given as an example:

> *yaśodānandavṛndāya nīlotpaladalaśriye* /
> *nandagopālabālāya gopālāya namo 'stu me* (1)

It is also to be noted that all verses of the Gopālavarṇanam end with the refrain *gopālāya namo 'stu me.*

### *Rabarṭ-kaṣṭa-varṇanam*

Robert Scott was an English lecturer in Fort William College, Calcutta. He requested Vidyāsāgara to write something about him in Sanskrit and the author complied by described Robert Scott in seven verses. Among these verses, the first six are in Anuṣṭup and the last one is in Vasantatilakā. The concluding verse of the poem is given as an example:

> *vidyāvivekavinayādiguṇair udārair*
> *niḥśeṣalokaparitoṣakaraś cirāya /*
> *dūraṃ nirastakhaladurvacanāvakāśaḥ*
> *śrīmān sadā vijayatāṃ nu rabarṭ-kaṣṭaḥ //*

### *Ślokamañjarī*

The Ślokamañjarī is a collection of verses which are called Udbhaṭaśloka. Such Udbhaṭa verses are not seen in any other works of Sanskrit poets. All the verses are independent in nature.

Due to lack of appropriate evidence we cannot trace out the Udbhaṭaślokas which are really created by Vidyāsāgara.

In the Ślokamañjarī there are 213 verses. Each verse is an independent expression of an idea. As a result, various subjects like nature, birds, animals, love, sex, family feuds, human qualities, advices, theories of Sanskrit grammar, jokes etc. have been described in these verses. A variety of figures of speech and metres are found in these verses. However, their suggested sense is very meager. The verses are not structured properly and do not delight our ears.

To conclude, it is to be said that Vidyāsāgara's Sanskrit writings are unique, especially with regard to the Bhūgola-khagola-varṇanam with its vast description of the geographical structure of the Earth and the Universe with inspirations from Indian mythology,

European mythology and the European geographical achievements of 19th century. Indian mathematical terms for measuring length are used in the Bhūgola-khagola-varṇanam, namely, yojana, khacatuṣka, khapañcaka etc. Thus, the Bhūgola-khagola-varṇanam may be regarded as a fine specimen of scientific literature in Sanskrit.

Vidyāsāgara is mainly an educationist and a social reformer. So the works of Vidyāsāgara are marked with social, educational and life-skill

values which are amply helpful for the progress and betterment of society. Vidyāsāgara supports love which is purified by separation. Mention of the economical condition of contemporary society is not properly portrayed in the Sanskrit literatures of Vidyāsāgara. The natural environment of India appears before us through his verses. He has tried to implement the theories of Sanskrit poetics, but proper application of Sanskrit poetics is rare except the use of few rhetorical devices. Vidyāsāgara is very economical in using metres. He has only used three, namely, Anuṣṭup, Upajāti and Vasantatilakā. His language is very simple and easy to understand and most verses maintain the standard rules of Sanskrit grammar. Linguistically, some words, such as pāntha, matsyaraṅgā, candanā etc. are the result of the influence of the Bengali language, but the major percentage of the used words are taken from the vocabulary of classical Sanskrit. From the above analysis, we can easily accept Vidyāsāgara as a modern Sanskrit poet of 19th century.

## Bibliography


### A. Works in Bengali

Basu, Devkumār: *Vidyāsāgar Racanāvalī.* Kolkātā: Maṇḍal Book House, 1971.

Ghoṣ, Vinay: *Vidyāsāgar O Bāṅgālī Samāj.* Kolkātā: Orient Longman, 1984.

Guha, Aravinda (Indramitra): *Karuṇāsāgar Vidyāsāgar.* Kolkātā: Ānanda Publishers Private Limited, 2001.

Sen, Satyen and Gopāl Hāldār: *Vidyāsāgar Racanāsaṁgraha.* Kolkātā: Vidyāsāgar Smārak Jātīya Samiti, 1972.

### B. Bi-lingual (Bengali and Sanskrit) Works

Śarmmā, Īśvaracandra: *Ślokamañjarī.* Calcutta: Kalikātā Saṁskṛta Yantra, 1892.

Śarmmā, Īśvaracandra: *Saṁskṛtaracanā.* Calcutta: Kalikātā Saṁskṛta Yantra, 1891.

Śarmmā, Nārayaṇacandra (Ed.): *Bhūgola-khagola-varṇanam.* Calcutta: Kalikātā Saṁskṛta Yantra, 1895.

### C. English Works

Banerjee, Hiranmay: *Ishwarachandra Vidyasagar – Social Reformer and Educatinist.* New Delhi: Sahitya Academy, 1970.

Mukhopadhyay, Manik (Ed.): *The Golden Book Of Vidyasagar.* Calcutta: All Bengal Vidyasagar Death Centenery Committee, 1993.

Tripathi, Amalesh: *Vidyasagagar – The Traditional Moderniser.* New Delhi: Orient Longman, 1973.

## Visions Of Modern Sanskrit Poets From Darkness (*Dr. Chandra Bhushan Jha*)

The ability to see the world is a unique gift of God. We experience the beauty of nature, places and persons through our eyes only. All the various pleasant and violent forms of the world are visible only through our sense organ. It is a totally different world for those who are visually impaired. But there is an apt saying in Sanskrit:

> *sattve mahatāṃ siddhiḥ, nopakaraṇe*

This means that great people's success lies in their virtues, not in their tools or in instruments. The eye is just a tool which enables us to view the external world, but it is our internal vision that affords us perseverance and thought.

It is quite evident from going through the pages of history of literature that losing sight does not have to mean losing insight. Otherwise, how could the great epics Iliad and Odyssey have been composed by Homer, the blind Greek poet? The poems of Milton in the English language are another testimony to the aforesaid fact. Similarly, Sanskrit literature has also been nurtured by several prolific writers who were blessed only with internal vision. In this article, I am going to throw some light on those of these writers who have flourished in modern times.

Let me begin with Pandit Daya Shankar Vajpayee. He was born at Behra Bhavani village in the district of Unnav in the United Provinces in 1918. At a very young age he lost his sight due to illness. But being visually impaired did not stop him from acquiring deep knowledge and higher degrees. He served as a Principal in several colleges of Ujjain. Pandit Vajpayee was blessed with the ability to compose poems in Sanskrit extempore. He passed away in 1987. His compositions include *Avantīsiṃhasthakhaṇḍakāvyam*, *Kalikautukam*, *Anehasaḥ āhvānam*, *Kavikulagurupraśastiḥ* and *Sarasvatīvandanā*. The poem *Anehasaḥ āhvānam* is based on the Indo-China war of 1962.

Another great visually impaired poet is Professor Prabhakar Shankar Joshi. He was born in 1925 in Maharashtra, India. He eventually became a teacher. Before the partition of India, he used to teach in Maratha High School, Karachi in today's Pakistan. After the partition, he moved to In-

dia and took several teaching and administrative assignments in Maharashtra, which included a five years' teaching stint in Fergusson College, Poona and a principleship there for 17 years. Retired from the service in 1984, Professor Joshi continued to read, write and deliver lectures. At the age of eighty, he began reading about Dr. Bhim Rao Ambedkar, the father of the Indian constitution and a towering leader of the downtrodden castes. He was highly impressed by Dr. Ambedkar's character and thus started composing a Mahākāvya on him. However, Professor Joshi lost his sight completely only two years after this, at the age of 82 in 2007. Nevertheless he did not lose heart. He appointed a reader for himself and took assistance from some of his kind Sanskrit-knowing friends. Thus he continued his study of Ambedkar and became successful in bringing out his epic in the year 2010 under the title of *Bhīmāyanam*, which phonetically imitates that of *Rāmāyaṇam*. In this work, within twenty-one cantos, the complete story of Dr. Bhim Rao Ambedkar's talent and his struggle to eradicate the maltreatment of low castes. This is one of the very few Mahākāvyas in Sanskrit depicting the entire life-sketch of the great scholar, freedom-fighter and social reformer, Dr. Ambedkar.

Now, let me turn to Captain Ram Bhagat Sharma. He was born in 1932 at Khudana Khurd village of Haryana in India. He served in the Indian Army as a religious instructor and retired as a Captain in 1987. During his service tenure he took part in the two wars fought by the Indian Army against Pakistan, in 1965 and 1971. Immediately after his retirement, Captain Sharma unfortunately lost his eye-sight. But suddenly, a poetic fervor that hitherto had remained hidden in him awakened. His first book entitled *Vāgdevīmahimā* composed in the śikhariṇī metre talks about the beauty of the Sanskrit language and the richness of Sanskrit literature. The poet expresses his deepest gratitude to mother Sanskrit for having showered all her blessings upon him.

Later, Captain Sharma wrote four Mahākāvyas. They are entitled *Bābā-Jayarāmadāsa-caritam*, *Pūnāhorsa-vijaya-mahākāvyam*, *Śrī-Rāmābhirāmīya-mahākāvyam* and *Mahābhārata-Bhāratī-Mahākāvyam*.

Published in 1996, *Bābā-Jayarāmadāsa-caritam* tells the story of Baba Jay Ram Das, a very distinguished and selfless saint, popular in the region of Haryana and Uttarakhand. The entire book is arranged in eleven cantos. The cantos are here called as prasaṅgaḥ instead of the ordinary sargaḥ. *Pūnāhorsa-vijaya-mahākāvyam* was published in 1997. It is divided

into twenty-one cantos and is a unique epic, being the only Mahākāvya in Sanskrit composed about a war where the poet was personally involved. Hence, all the accounts are quite authentic. The poet had served in the "Poona Horse" regiment of the Indian Army which fought against the "Pakistani Thunder" regiment of Pakistan Army in the war of 1965, and where the "Poona Horse" regiment was victorious. The saga of that victory has been delineated in great detail in a very lucid manner. The poet has taken great pains to coin new terms in Sanskrit for modern ammunition and weapons but has stuck to the traditional terms wherever available in Sanskrit. For instance, he has used the terms pattiḥ, senāmukhaḥ, gulmaḥ, gaṇaḥ, vāhinī, pṛtanā, camū, anīkinī, akṣauhiṇī and senā for the English terms Section, Platoon, Company, Unit, Regiment [Battallion], Brigade, Division, Corps, Command and Army respectively.

Captain Sharma's third book, *Śrī-Rāmābhirāmīya-mahākāvyam* was published in 2007. It retells the tale of Lord Rāma in twenty-seven cantos. Though the plot is old, the style and approach are quite new. The poet says that the length of the bridge constructed by Nala in Rāmāyaṇa to cross over the sea was as much as is the distance between modern Lanka from the Indian sea-shore. He opines that the distance of a hundred Yojanas as mentioned in the ancient texts might be a metaphorical description (*Śrī-Rāmābhirāmīya-mahākāvyam*, 13/9).

The most striking characteristics of Capt. Sharma's poetry is its rhyme and rhythm. Most of verses are composed in a manner where there is alliteration in the last word of all the stanzas. This is known as Antyānuprāsa. For instance,[1]

*bhava-bhañjanatā jana-rañjanatā*
*dvija-vandanatā ghani-kandanatā*
*raghu-nandana-mañjula-maṅgalatā tvayi*
*bhāti nirantara-sundaratā*

Or,[2]

*vimalāmbara-kuṇḍa-gajendra-karaiḥ*
*harikandhara-paṅkaja-candra-daraiḥ*
*kim anaṅga-kuraṅga-dṛgambudharaiḥ*
*bhavad-aṅga-vibhātulitāsti karaiḥ*

[1] *Śrī-Rāmābhirāmīya-mahākāvyam* 22/32. [2] *Śrī-Rāmābhirāmīya-mahākāvyam* 22/38.

The poet's fourth epic *Mahābhārata-Bhāratī-Mahākāvyam* is likewise composed in twenty-seven cantos and retells the story of the *Mahābhārata.*

I will now turn to Mahamahopadhyaya Swami Rambhadracharya. He was born in 1950 at Shadi Khurd village in the district of Jaunpur in U. P., India. He was known as Giridhar Mishra in his childhood. Unluckily, he developed trachoma in his eyes at the age of just two months which resulted in the loss of vision due to wrong treatment. That unlucky incident moved the family but it proved to be a boon in disguise to the boy, since the closure of outer vision made the way to inner vision. He could recite the complete text of the Bhagavadgītā by heart since the age of five. At the age of eight, he had committed the whole Rām Charit Mānas of Goswami Tulsi Das to his memory. Gradually, he learnt all the main treatises of Sanskrit grammar, the Śrīmadbhāgavatam, many of Upaniṣads and almost all the works of Goswami Tulsi Das. He has been appointed life-long chancellor of Jagadguru Rambhadracharya University for the Physically Challenged at Chitrakoot in U.P. Besides this, he is immensely popular for his scholarly discourses on the Rāmāyaṇa and the Bhāgavat in huge public gatherings.

Swami Rambhadracharya has around a dozen of creative works in Sanskrit to his credit. The best of them is *Śrī Bhargavarāghavīyam.* This is a Mahākāvya based on the ideal character of Lord Paraśurāma. Divided in twenty-one cantos, this book has been widely applauded and has won him the prestigious Sahitya Akademi Award as well as the coveted Vachaspati Award and Shri Ram Krishna Jay Dayal Dalmia Award.

Swami Rambhadracharya has beautifully experimented with several metres in this book. The technique of using only short vowels in the verses is very rare and difficult to apply, but here it has been done successfully. For instance,[3]

> *raghupati-gṛhiṇi-nayana-sukha-navadala*
> *haripada-jalaja-rasita-sita-jalakala*
> *sura-nara-munigaṇa-guṇita-sujanabala*
> *viphalaya mama bhavarujam api phalaphala*

The poet's other books include *Āryāṣṭakam*, *Rāghavendrāṣṭakam*, *Caṇḍīśatakam*, *Gaṇapatiśatakam*, *Śrī Rāmacaraṇacihnaśatakam*, *Ślo-*

[3] *Śrī Bhargavarāghavīyam* 7/16.

*kamauktikam*, *Mukundasmaraṇam*, *Bhṛṅgadūtam* and *Kubjāpatram*. *Bhṛṅgadūtam* is a Dūtakāvya (message-poem) and *Kubjāpatram* is a Patrakāvya (a poem in the format of a letter).

Next I would like to introduce the late Lachhaman Singh Agrawal. He was born at Jhar Sentali village of Haryana in 1939. He has twelve published works of poetry to his credit. They are *Prabhātaśatakam*, *Kālarātriḥ*, *Rāṣṭradarpaṇaḥ*, *Vijñānagītam*, *Kuṭumbinī*, *Padyapuṣpavāṭikā*, *Kālacakram*, *Śrī Rāmarasāyanam*, *Ṛtambharā*, *Abhinavavīṇā*, *Bhavanti Bhāvino Bhavyāḥ* and *Vidagdhabhāravikam*.

*Prabhātaśatakam* was Agrawal's first composition, published in 1970. It consists of a hundred and one verses which is apparent from the title itself. But this work was revised and reprinted in 1977 with the title *Rāṣṭradarpaṇaḥ*. In the new format, the book was arranged under ten topics which read as Rāṣṭradarpaṇaḥ, Śikṣā, Sabhyatāsamājau, Dharmaḥ, Vādāḥ, Rāṣṭrarogāḥ, Durṇayaḥ, Rāṣṭraśaktiḥ, Prakīrṇāṇi and Samarpaṇam. Several downfalls and paradoxes in Indian national life have been pinpointed in simple words. The author has lamented the quarrels and ungraceful debates of his country's parliament. The poet describes in a verse –[4]

*muni-jananata-bhūmeḥ satya-niṣṭhā suvāco*
*bhuvana-mahita-vṛddhā rājitā yat sabhāsu*
*kuṭila-samaya-gatyā tatra nānādalānāṃ*
*kalahamukharasam sat krandanam ko nu kuryāt*

The poet's third book was published in 1977 under the title *Kālarātriḥ*. India witnessed a great political calamity in 1975. A state of emergency was imposed in the country and all the fundamental rights of its citizens were suspended. The people were taken aback. They felt strongly against this emergency. This public anguish was translated into action in 1977 when the then ruling government lost the elections. That anguish was shown in literature too. Agrawal's book *Kālarātriḥ* refers to this period of emergency. The term kālarātriḥ means a black night. People felt that the emergency period was like a black night in the history of Indian democracy. The book consists of six chapters, namely *Kālarātriḥ*, *Pūrvasandhyā*, *Rātripraveśaḥ*, *Prabodhasandhyā*, *Aruṇodayaḥ* and *Sandeśaḥ*, and they deal with the atrocities inflicted upon the people during that period. The military forces were given unimpeachable and

[4] *Rāṣṭradarpaṇaḥ* 58.

unaccounted powers. Only their will was the law of land and all laws regarding civil rights, arms, prisons and so on were cancelled. This has been beautifully described by the poet as –[5]

*senā no paripālayanti niyamān kārān na vā śṛṅkhalāḥ*
*āgneyā na bhuśuṇḍayo na lagudā naivāśrugaiṣakriyā*
*icchaivāsti janasya pālanakṛte pāṭheyam ekam vidheḥ*
*deyā nāṅgulayo madena sahasā lokānale śāsakaiḥ*

*Vijñānagītam*, published in 1981, is Agrawal's fourth book. It consists of 116 verses divided into three chapters (ucchavāsa). The first chapter deals with the purpose, nature, methodology and achievements of science. The high self confidence of a scientist is thus expressed –[6]

*dhārā nadīnāṃ parivartayāmi*
*karomi setuṃ hṛdaye kathoram*
*bhinadmi vakṣāmsi ca parvatānāṃ*
*na duṣkaraṃ kiṃcana me matīnām*

I change the course of rivers, I am able to nail tough bridges in their hearts, I tear off the breasts of mountains: there is absolutely nothing impossible for my thoughts.

The poet's fifth book, *Kuṭumbinī*, was published in 1982. Several subjects, including the significance of women, Darwin's theory of evolution, the rise of science and its destructive powers and industrialization have been dealt with in its 112 verses.

Agrawal published his sixth book in 1983, under the title of *Padyapuṣpavāṭikā*. This book describes a variety of topics. Some verses are very remarkable for their poetic beauty. One description of Lord Kṛṣṇa is full of alliterations and phonetically charming sounds.[7]

*sajala-jalada-nīlaṃ rakta-rājīva-netram*
*adhara-madhura-vaṃśī-vādanaṃ viśvamoham*
*kṛta-para-vaśa-gopī-citta-pītottarīyaṃ*
*sakala-sukha-samudraṃ kṛṣṇa-candraṃ namāmi*

[5] *Kālarātriḥ* 34. [6] *Vijñānagītam* 13. [7] *Padyapuṣpavāṭikā* 103.

Agrawal's seventh book *Kālacakram*, published in 1986, consists of 109 verses. It delineates a number of subjects, such as black money, drinking of wine, change in life-style and moon-lit nights. Lamenting the change in our diurnal routines, the poet writes that previously people used to attend to the call of nature and pray to God, but now they listen to vulgar songs lying in bed and sip tea even without cleaning themselves:[8]

*pratyūṣa utthāya purā manuṣyāḥ*
*śaucaṃ vidhāya sma hariṃ bhajanti*
*aślīlagītāny adhiśayya cādya*
*śṛṇvanti cāyam ca pibanty aśuddhāḥ*

The poet has expressed his anger against those who profit through the black market but reside in white big houses. He writes that such people are only after sensuous pleasures. In order to achieve their goals, they are incessantly involved in all types of sinful practices which lead to fights, but they pretend to be civilized people. Just see his words:[9]

*śuklāni gehāni dhaneśvarāṇām*
*aśuklavittena vinirmitāni*
*bhogaikalakṣyāḥ kalahāyamānāḥ*
*parasparaṃ yatra vasanti sabhyāḥ*

Agrawal's eighth book, *Śrīrāmarasāyanam*, was published in 1987. It is divided into seven cantos and retells the story of Lord Rāma in 355 verses. The poet's ninth and tenth books are Ṛtambharā & Abhinavavīṇā, respectively. Ṛtambharā is a collection of 155 verses arranged under seven headings namely Vānī, Rāṣṭramahimā, Nāgarikalakṣaṇāṇi, Paridevana,Cintā, Pṛthvī and Vandanā, while Abhinavavīṇā is a collection of 35 songs divided into two parts, entitled Gītikhaṇḍa and Āryākhaṇḍa.

In addition to these ten books of poetry, Agrawal has also composed two short plays. *Bhavanti Bhāvino Bhavyāḥ* narrates the story of bravery of a young Kshatriya girl. *Vidagdhabhāravikam* is a radio-play, retelling the story of celebrated great poet Bhāravi. It was published as a book in 1998. In the prelude, the writer informs us that he has taken the plot from the story of Bhāravi as given in the book *History of Sanskrit Literature* by

[8] *Kālacakram* 65. [9] *Kālacakram* 53.

Vachaspati Garola. The play describes Bhāravi as being extremely intelligent right from his childhood, but that he was a bit immodest too. His father was therefore worried. Bharavi did not heed his father's words, but was finally reformed in the end. The Bhāratavākyam of the play thus spreads the message of resolving conflicts generated by a generation gap. That is:

*pitroḥ santu nideṣavartimanasaḥ putrāś ca putryoniśam*
*samgharṣo vayasā kṛto ya ubhayor naśyed dhiyā śraddhayā*

Apart from the above-mentioned authors, there are some visually challenged poets who have not been able to publish their Sanskrit poems in book-form yet, but who nevertheless are constantly engaged in creative writing. Dr. Bhartendu Pande of Delhi University, Dr. Dayal Singh Pawar of Sri Lal Bahadur Shastri Sanskrit Vidyapeeth and Saif-Ur-Rahman, an employee of the Bureau of Indian Standards are heard in Sanskrit poetic symposia and their poems are published in Sanskrit journals.

## Sources

### Primary sources

Agrawal, Lachhman Singh: *Kālarātriḥ*, 54/1 Sihi Gate, Vallabh Garh, Faridabad, Haryana, India. Self-published, 1980.

— *Rāṣṭradarpaṇaḥ*, 54/1 Sihi Gate, Vallabh Garh, Faridabad, Haryana, India. Self-published, 1980.

— *Vijñānagītam*, 54/1 Sihi Gate, Vallabh Garh, Faridabad, Haryana, India. Self-published, 1981.

— *Kuṭumbinī*, 54/1 Sihi Gate, Vallabh Garh, Faridabad, Haryana, India. Self-published, 1982.

— *Padyapuṣpavāṭikā*, 54/1 Sihi Gate, Vallabh Garh, Faridabad, Haryana, India. Self-published, 1983.

— *Kālacakram*, 54/1 Sihi Gate, Vallabh Garh, Faridabad, Haryana, India. Self-published, 1986.

— *Śrīrāmarasāyanam*, 54/1 Sihi Gate, Vallabh Garh, Faridabad, Haryana, India. Self-published, 1987.

— *Vidagdhabhāravikam*, 54/1 Sihi Gate, Vallabh Garh, Faridabad, Haryana, India. Self-published, 1998.

Joshi, Prabhakar Shankar: *Bhīmāyanam*, 1, Jhelam, Patrakar Nagari, Pune, Maharashtra, India. Pandit Vasant Anant Gadgil, 2010.

Ram Bhadracharya: *Rāghavābhudayam*, Chitrakoot, U.P., India. Jagadguru Ram Bhadracharya Vikalang Vishwavidyalaya, 1996.

— *Rāghavendraśatakam*, Chitrakoot, U.P., India. Jagadguru Ram Bhadracharya Vikalang Vishwavidyalaya, 1996.

— *Śrīrāmacaraṇacinhaśatakam*, Chitrakoot, U.P., India. Jagadguru Ram Bhadracharya Vikalang Vishwavidyalaya, 1996.

— *Caṇḍīśatakam*, Chitrakoot, U.P., India. Jagadguru Ram Bhadracharya Vikalang Vishwavidyalaya, 1996.

— *Gaṇapatiśatakam*, Chitrakoot, U.P., India. Jagadguru Ram Bhadracharya Vikalang Vishwavidyalaya, 1996.

— *Mukundasmaraṇam*, Chitrakoot, U.P., India. Jagadguru Ram Bhadracharya Vikalang Vishwavidyalaya, 1996.

— *Bhṛṅgadūtam*, Chitrakoot, U.P., India. Jagadguru Ram Bhadracharya Vikalang Vishwavidyalaya, 1996.

— *Ślokamauktikam*, Chitrakoot, U.P., India. Jagadguru Ram Bhadracharya Vikalang Vishwavidyalaya, 2001.

— *Śrīsarayūlaharī*, Amod Van, Chitrakoot Dham, Satna, M. P., India. Sri Tulsi Peeth Seva Nyas, 2001.

— *Śrībhārgavarāghavīyam*, Chitrakoot, U.P., India. Jagadguru Ram Bhadracharya Vikalang Vishwavidyalaya,Vikram Era 2059 (2002).

Sharma, (Captain) Ram Bhagat, Bābā-Jayarāmadāsa-Caritam, Khudana, Mahendragarh, Haryana, India. Self-published, 1996.

— *Pūnā-Horse-Vijaya-Mahākāvyam*, Khudana, Mahendragarh, Haryana, India. Self-published, 1997.

— *Śrī-Rāmābhirāmīya-Mahākāvyam*, Khudana, Mahendragarh, Haryana, India. Self-published, 2007.

— *Mahābhārata-Bhāratī-Mahākāvyam*, Khudana, Mahendragarh, Haryana, India. Self-published, 2008.

### Secondary sources

Alankar, Virendra Kumar: *Hariyāṇā Kī Samskṛta-Sādhanā*, Panchkula, Haryana, India. Haryana Sanskrit Akademi, 2009.

Jha, Chandra Bhushan: *Vimśa-Śatābdī-Samskṛta-Kāvyāmṛtam*, Dvitīyaḥ Khaṇḍaḥ, Delhi. Delhi Sanskrit Akademi, 2008.

Mishra, Abhiraj Rajendra: *Vimśa-Śatābdī-Samskṛta-Kāvyāmṛtam*, Prathamaḥ Khaṇḍaḥ, Delhi. Delhi Sanskrit Akademi, 2001.
Sharma, Ram Dutt: *Samskṛta Sāhitya Ko Hariyāṇā Kā Yogadāna*, Chandigarh, India. Haryana Sahitya Akademi, 1991.
Sharma, Rameshwar Dutt: *Hariyāṇā-Samskṛta-Vṛttam,* Bhivani, Haryana, India. Haryana Sanskrit Sammelan, 1982.

## समकालिक-संस्कृत-कथासाहित्ये भारतीयता (डॉ.नारायणदाशः)

(रयीशः-सीमा-विसर्गः-कालाय तस्मै नमः-मूको
रामगिरिर्भूत्वा-अन्यच्च-स्वर्गपुरे-इत्यादीनां परिप्रेक्ष्ये)

भट्टबाणात्समारभ्य मथुरानाथमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे कथापरम्पराम् ॥

### १. उपक्रमः

संस्कृतवर्षपालनेन समारब्धस्य अस्य शतकस्य प्रथमदशकं समाप्तं विश्व-संस्कृत-पुस्तकमेलया यत्सर्वथा प्रतीयते संस्कृतदशकमिव। अस्मिन् सम्भावनामयसमयावधौ रचितानि महाकाव्यानि, निर्मिताः नवीनाः काव्यशास्त्रीयग्रन्थाः, समीक्षार्थं स्वीकृताः नवा मानदण्डाश्च। तथैव समकालिकं कथासाहित्यमपि विकसितं टुप्कथा-पुटकथा-लघुकथा-दीर्घकथा-लघूपन्यास-उपन्यासाद्याकारवैविध्येन, स्पशकथा-त्रासद-कथा-भयदकथा-सामाजिककथा-ऐतिहासिककथा-दन्तकथा-लोककथा-बालकथा-पौराणिककथा-भ्रमणकथा-स्मृतिकथा-चित्रकथादिविषय-वैविध्येन, मौलिककथा-पुनरुक्तकथा-अनूदितकथादिप्रकार-वैविध्येन च। क्वचित् काव्यसंसारस्य भावविश्वादप्यधिकं परिव्याप्तं कथासंसारस्य भावविश्वं तटस्थीकरोति सामाजिकान्। कथासाहित्यस्य कृतेऽपि युज्यते एव ध्वन्यालोककारस्योक्तिः –

अवस्थादिविभिन्नानां वाच्यानां विनिबन्धनम् ।
भूम्नैव दृश्यते लक्ष्ये न तच्छक्यमपोहितुम् ॥
रसभावादिसम्बद्धा यद्यौचित्यानुसारिणी ।
अन्वीयते वस्तुगतिदेशकालादिभेदिनी ॥
वाचस्पतिसहस्राणां सहस्रैरपि यत्नतः ।
निबद्धा सा क्षयं नैति प्रकृतिर्जगतामिव ॥[1]

[1] ध्वन्यालोकः, ४.८-१० ।

संस्कृतसाहित्ये यथा कवीनां स्थानं कनिष्ठिकाधिष्ठितं न तथा कथाकाराणामिति केषाञ्चित् सम्मतम्। परन्तु पद्यकविर्वा गद्यकविर्वा पद्येन गद्येन वा भवति, यदुभयं काव्यपदेन व्यपदिश्यते काव्यशास्त्रिभिः। अतः अन्ततो गत्वा सहृदयः कविरेव प्रणयति कथाः उभयत्र स्वदक्षतां प्रतिपादयितुमिति कथनं साहसमात्रं न स्यात्। विंशशतकोत्तरायां संस्कृतभाषायां नवसर्जनस्य पदध्वनिः सर्वत्र लक्ष्यते। तत्र मूलकारणं भवति भाषायाः तत्संस्कृतेश्च यथार्थतः अवगमनम्, विश्वकथासाहित्यस्य अध्ययनञ्च। अतः कथासाहित्यविषये धैर्येण वदति कालूरि हनुमन्तरावः- "कथायां संघटना मुख्या न भवति। किमपि अद्भुतम् अतर्कितं महत् वा संघटनं कथायाः आवश्यकमिति कथा पाठकस्य विस्मयं जनयन्ती अनूहितेन आकस्मिकेन वा परिणामेन अवसिता तु इति च केषाञ्चिद् भ्रमः। … उत्तमकथापठनानन्तरं पठितुः मनसि उत्पन्नः अनुभवः ईदृशः न भवति। उत्तमकथापठनं समाप्य पठिता न तां कथां विस्मरति। … ऐन्द्रजालिकः यथा अकस्मात् वृक्षमुत्पाद्य प्रदर्शयति कथकः तथा कथायां किमपि संघटनं प्रदर्श्य पठितुः विस्मयं न जनयति। … प्रसिद्धकथकस्य एण्टोन् चेखोवस्य कथासु आकस्मिकपरिणामादयः प्रायेण न भवन्ति।"[2] सर्वमपि साहित्यं स काल्पनिकं काव्यञ्च मनुते -

> "Fiction is narrative litetarure created from the author's imagination rather than from fact. The novel and short story are the literary forms most commonly called fiction, but narrative poetry and drama are also forms of it. In addition, other types of literature, such as epic poetry, fables and myths, are mainly fictional. Fictional elements also may be introduced into types of writing that are generally classed as nonfiction such as biography(fictional biography) and history (historical fiction)."[3]

काव्यमपि स प्राचीनमतेन स्वीकरोति। तस्य गद्यं पद्यं कथा नाटकं सर्वमपि काव्यमेव।[4] विंशशतके शताधिकाः कथाकाराः कथालेखने स्वलेखनीं व्यापारयन्तः द्विशताधिककथाग्रन्थान् प्रणीतवन्तः। कथा जनस्याभिनवा

[2] पृ॰ १३८-९, नातिचरामि अन्याश्च कथाः(नाति॰), कालूरि हनुमन्तरावः, २०, ओयू टिचर्सकलोनी, सैनिकपुरी, सिकन्दरावाद-५०००९४, २००५, मू॰ ४०। [3] Quoted from the Encyclopedia Americana. तत्रैव, पृ॰ १४०। [4] तत्रैव, पृ॰ १४२।

वधूरिव[5] इति प्रतिपादयता भट्टबाणेन भ्रान्ताः कथाकाराः टुप्कथात उपन्यासं यावत्सर्वं कथापदेन व्यपदिशन्ति इति संस्कृतकथासु कथा वा उपन्यास इति वा वर्गीकरणं सुमहते क्लेशाय एव।

**२. परिभाषा**

आचार्यभरतादारभ्य विश्वेश्वरपण्डितं यावत् सर्वेऽपि प्राचीनाः काव्यशास्त्रिणः, आधुनिकाश्च काव्यशास्त्रिणः कथासाहित्यस्य लक्षणं निरूपितवन्तः। मुख्यतः चत्वारो भेदाः भवन्ति कथायाः– उपन्यासः, कथानिका, लघुकथा, दीर्घकथा इति। उपन्यासविधा आधुनिकसंस्कृतगद्यसाहित्ये सर्वाधिका प्रसिद्धा। उपन्यासस्य कृते आङ्ग्लभाषायां नोवेल्, मराठीभाषायां कादम्बरी, गुजरातीभाषायां नवलकथा, वङ्गभाषायामुपन्यास इति शब्दाः प्रचलिताः। ओगटी परीक्षितशर्मणा उपन्यासस्य आङ्ग्लनाम्नः संस्कृतीकरणं सम्यक्कृतं भाति – “नवतां नूतनत्वं लाति आनयति यच्छति इति हेतोः नवला”[6] इति। उपन्यासस्य लक्षणं त्रिपाठिराधावल्लभेन अभिनवकाव्यालङ्कारसूत्रग्रन्थे दत्तम्- “गद्यबद्ध उपन्यासो महाकाव्यमयी कथा।”[7]इति।

वेदस्य मन्त्रनिर्माणकालेऽपि ऋषीणां समक्षं परिस्फुरितस्य राष्ट्रचिन्तनस्य विकासं प्राप्नुमः वयम् अथर्वसंहितायाम् - पृथिवीसूक्ते। विविधजातिधर्मभाषाः मूलतः एव अस्मिन् देशे सन्ति। “जनं बिभ्रती बहुधा विवाचसं नाना धर्माणं पृथिवी यथौकसाम्”[8] इति विज्ञाय अपि भारतीय ऋषिः उद्घोषयति “माता भूमिः पुत्रोऽहं पृथिव्याः।” मातृभूमिमातृसंस्कृति-मातृभाषाणां रक्षणाय उपदिष्टाः देशवासिनः। आर्षमानसे मातृभूमेः प्रस्तरमात्रं देवायते, धूलिमात्रं मधुरायते, वृक्षलतापादपाः बान्धवायन्ते। धार्मिक-सांस्कृतिक-पौराणिकभाषा तु एकैवासीत्, या वैविध्येष्वपि ऐक्यं स्थापयति स्म। इदं वेदकालिकं राष्ट्रचिन्तनं श्रुतिस्मृतिषु परिव्याप्य पौराणिकयुगे तु विराजते कामपि अत्युच्चतमां

[5] प्रस्तावनाश्लोकः, कादम्बरी, बाणभट्टः। [6] आमुखम्, कालाय तस्मै नमः (कालाय°), ओगटि परीक्षितशर्मा, प्लाट-७, ज्योतिष्मति मंगलधाम सोसाइटी, कोथरुड, पुणे १९९९। [7] सू° ३.१.१३., अभिनवकाव्यालङ्कारसूत्रम्, राधावल्लभत्रिपाठी, प्रका° सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी। [8] १२.१.४५, पृथ्वीसूक्तम्, अथर्ववेदः।

कोटिमाटीकमानम्। तदा दक्षिणभारते रचिते श्रीमद्भागवतमहापुराणेऽपि भारतभावना जोगुञ्जयते।

अहो अमीषां किमकारि शोभनं
प्रसन्न एषा स्विदुत स्वयं हरिः।
यैर्जन्मलब्धं नृषु भारताजिरे
मुकुन्दसेवोपयिकं स्पृहा हि नः ॥[9]

वस्तुतः हर्षदेवमाधवस्य प्रारम्भिककाव्येषु परावास्तववादिकवितासु उपनिषत्काव्येषु च आत्मबोध-स्वात्मानुभूति-काव्यानुभूतयश्च यथा अनुप्राणिताः सन्ति, तथा तस्य नाटकेषु कथासु उपन्यासेष्वपि। कालूरिहनुमन्तरावस्य कथानां विषये प्रो॰ त्रिपाठिनः कथनमाधुनिकयुगस्य उत्तम-संस्कृत-कथाकारेष्वप्यन्वेति। तस्य कथानां समीक्षावसरे प्रो॰ त्रिपाठी वदति - "कालूरिहनुमन्तरावस्य कथासु जीवनस्योच्चावचप्रवाहाः, कालस्य सङ्क्रमणम्, समयसङ्क्रमणं वा, विडम्बना उत्प्रासा व्यङ्ग्यकरणस्य च वैचित्र्यं विशदं हृदयङ्गमं जायन्ते। समाजस्य गतेः जनानां मतेः युगपरिवर्तनस्य रीतेश्च प्रत्ययं प्रामाणिकतया प्रददाति कालूरिहनुमन्तरावः। अत्र संस्कृतकथा विश्वनागरिकतां समालिङ्ग्य भूमण्डलीकरणं वैश्विकजीवनं च परामृशति। कथाः महाकाव्यात्मकं विस्तारं क्रोडीकुर्वन्ति इति अपर एतासां दुर्लभो विशेषः। तदीया कथानकभित्तिः विस्तीर्णं फलकं समावेशयति। वस्तुत एतासु कथासु ऊनविंशविंशशतकयोर्भारतीयसमाजे जायमानानां विचिकित्सानां द्वन्द्वानां च तलस्पर्शि चित्रणं विहितम्। विशिष्य पारम्परिकभारतीय-समाजस्य, संस्कृतपण्डितानां परिवारेषु वा तदानीं यादृश्यः परिस्थितयो व्यजृम्भन्त, तासां भूतार्थतया चित्रणेन इतरभाषासु रच्यमानाभ्य आधुनिककथाभ्यः वैलक्षण्यं कथाकारैः साधितम्।"[10]

[9] ५.१९.२१, श्रीमद्भागवतमहापुराणम्, व्यासदेवः। [10] पृ॰ १६८, सागरिका-३९।४, संस्कृतपरिषद्, संस्कृतविभागः, डा॰ हरीसिंहगौरविश्वविद्यालयः, सागर, म॰प्र॰४७०००३।

एवमेव वङ्किमचन्द्रस्य आनन्दमठे,[11] गोपीनाथमहान्तिवर्यस्य दाना-पाणि-परजा-माटिमटालेषु,[12] मनोजदासस्य अमृतफले,[13] तसलिमायाः फेरा[14]-यां, लज्जायां च, एस्॰ एल्॰ भैरप्पस्य सार्थ[15] - धर्मश्री[16]-आवरणेषु,[17] नरेन्द्रकोहलीवर्यस्य रामायणे, वसुदेवे च,[18] के॰ एम्॰ मुन्शीवर्यस्य कृष्णावतारे, सोमनाथे च, मनुशर्मणः कर्णे, रामकर-णशर्मणः रयीशे,[19] हर्षदेवमाधवस्य मूको रामगिरिर्भूत्वा[20] इत्यत्र, राधावल्लभत्रिपाठिनः अन्यच्च,[21] प्रमोदकुमारनायकस्य स्वर्गपुरे,[22] मम वह्निवलये[23] च कश्चन एवविधो भावः परिस्फुरति, यस्तं तमुपन्यासं सर्वसाधारणपाठकस्य बोधगम्यं कारयित्वा तस्य चिरन्तनत्वं सनातनत्वं सार्वकालिकत्वं च विधाय राष्ट्रस्य संयोगात्मकं पक्षं द्रढयति। स्थितेऽपि वियोगात्मके साहित्ये सर्वेऽपि साहित्यिकाः वारं वारं मिलनात्मकं साहित्यं सृजन्ति किमर्थम्, तत्र कारणं किमिति जिज्ञासा वारं वारं पीडयति। एते एवं किं लिखन्ति येन पाठकः एकेन उपवेशनेन एव उपन्यासं समापयति। वारं वारं च तं तमुपन्यासं पठितुमिच्छति। कदाचित् एकेन उपन्यासेन एव एते रात्रावधौ विश्वप्रसिद्धाः भवन्ति। कदाचित् इयमेव भारतभावना कथिता, यस्याः कानिचन लक्षणानि

[11] आनन्दमठ, वङ्गीयमूलम्-वङ्किमचन्द्रचटर्जी, सं॰ अनु॰ डा॰ शिवचरणशर्मा, प्रका॰ संस्कृत-भारती, मातामन्दिरगली, झंडेवाला, नईदिल्ली-५५, प्र॰सं॰२०११। [12] माटिमटाल, ओडिया उपन्यास, गोपीनाथमहान्ति, साहित्य अकादेमी, ओडिशा। [13] अमृतफलम्, सरस्वतीसम्मानेन सम्मानित ओडिया उपन्यास, मनोजदास, विद्यापुरी, कटक,ओडिशा। [14] फेरा, तसलिमा नासरिन, प्रका॰ आनन्द, कोलकाता, पञ्चमसंस्करणम्, २००३, पृ॰ ७९। [15] सार्थः, कन्नड-मूलम् - एस्॰एल्॰ भैरपः, संस्कृतानुवादः - डा॰एच्॰वि॰ नागराजरावः, प्रका॰ संस्कृतभारती, मातामन्दिरगली, झंडेवाला, नईदिल्ली-५५, प्र॰सं॰ जुलै २०००। [16] धर्मश्रीः, कन्नडमूलम् - एस्॰एल्॰भैरपः, संस्कृतानुवादः - जनार्दन हेगडे, प्रका॰ संस्कृतभारती, मातामन्दिरगली, झंडेवाला, नईदिल्ली-५५, प्र॰सं॰ एप्रिल २०००। [17] आवरणम्, कन्नडमूलम् - एस्॰एल्॰ भैरपः, संस्कृतानुवादः - डा॰एच्॰आर्॰विश्वासः, प्रका॰ संस्कृतभारती, मातामन्दिरगली, झं-डेवाला, नईदिल्ली-५५, प्र॰सं॰ जुलै २००८। [18] वसुदेवः, हिन्दीमूलम्-नरेन्द्रकोहली, अनु॰ श्रीमती सरिताकृष्णशास्त्री, प्रका॰ संस्कृतभारती, मातामन्दिरगली, झंडेवाला, नईदिल्ली-५५, प्र॰सं॰ २०११। [19] रयीशः, रामकरणशर्मा, प्रतिभाप्रकाशनम्, २९,५, शक्तिनगरम्, देहली १९९४। [20] मूको रामगिरिर्भूत्वा (मूको॰), औपन्यासिकः - डा॰ हर्षदेवमाधवः, हिन्द्य-नुवादः - डॉ॰मञ्जुलताशर्मा, प्रका॰ राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली २००६। [21] अन्यच्च (उपन्यासः), प्रणेता - राधावल्लभत्रिपाठी, प्रका॰ संस्कृतभारती, नवदेहली, प्रथमसंस्करण-म्-जनवरी २०११। [22] स्वर्गपुरे, (संस्कृते व्यङ्ग्योपन्यासः), औपन्यासिकः - डॉ॰ प्रमोदकु-मारनायकः, सम्पादकः - डॉ॰नारायणदाशः, प्रकाशिका - श्रीमती सवितादाशः, रामकृष्णमिश-नाश्रमः, नरेन्द्रपुरम्, कोलकाता २०१२। [23] वह्निवलयः, नारायणदाशः, प्रकाशिका-श्रीमती सवितादाशः, चढियापल्ली, पुरुषोत्तमपुर, गञ्जाम, ओडिशा, २००२।

उपरि आलोचितानि। मम तु भाति, साहित्यं त्रिविधं वर्तते। एकं पाठकम् उद्वेजयति, द्वितीयं निरासक्तं करोति, तृतीयं च समाहितं कृत्वा उत्प्रेरयति, प्रचोदयति कथाजनस्याभिनवा वधूरिव। समकालिक-कथा-साहित्ये विशेषतः उपन्यासेषु दरीदृश्यते इयं भारतभावना। यद्यपि कोऽपि कविः कथाकारो वा भारतस्य नाम स्वीकृत्य किमपि न वदति, तथापि भारतीयत्व-प्रतिपादकान् वैशिष्ट्यान् एवं प्रतिपादयति येन पाठकहृदयेन तादात्म्येन शाश्वतस्थानं लभते। साधु उद्धृतः हिलब्राण्टः रमाशंकरतिवारिणा - "पर्वतेषु तीर्थेषु च परिव्याप्तां पुराणकथां कविः जानाति तथा भारतीयसंसारस्य वर्णाढ्यचित्रं सुकुमाररेखाभिरङ्कयति, सः सत्यमेव भारतभूमेः कविरस्ति।" स्वयं तिवारीमहोदयः कालिदासं भारतीयजीवनस्य प्रवक्तारं वैतालिकं च मनुते। एवमेव अस्मिन् पर्याये भारवि-विशाखदत्त-दण्डि-भवभूति-क्षेमेन्द्र-कल्हण-प्रभृतयः कवयः आगच्छन्ति, ये प्रतिपलं राष्ट्रस्य मूर्त्तं चित्रम् अङ्कितवन्तः।[24] भीष्मसाहानीवर्यस्य तमसे,[25] एस्॰एल्॰भैरप्पस्य - सार्थे, धर्मश्रियाम्, आवरणे च, प्रतिभारायस्य याज्ञसेन्याम्,[26] गोपीनाथमहान्तेः - माटिमटाले, मनोजदासस्य अमृतफल इत्यादिषु उपन्यासेषु सैव भावना जोगुञ्जयते। रयीशः-सीमा[27]-विसर्गः[28]-कालाय तस्मै नमः-मूको रामगिरिर्भूत्वा-अन्यच्च-स्वर्गपुरे-इत्यादिषु अर्वाचीनसंस्कृतकथाग्रन्थेष्वपि सा लक्ष्यते एव।

### ३. उपन्यासविषयः

संस्कृतोपन्यासकारेषु रामकरणशर्म-ओगटीपरीक्षितशर्म-केशवचन्द्रदाश-हर्षदेवमाधव-राधावल्लभत्रिपाठिनश्च अतिप्रसिद्धनामानः। एतेषां कथा-

[24] उद्धृतम्, पृ॰ २८-३०, बीसवीं शताब्दी के संस्कृतमहाकाव्यों में राष्ट्रियचेतना, डा॰ महराजदीनपाण्डेयः, आचार्यनरेन्द्रदेवकिसानस्नातकोत्तरमहाविद्यालयः, बभनान, गोण्डा, उ॰ प्र॰, प्र॰ सं॰ १९९०। [25] तमस (साहित्य एकाडेमी पुरस्कृत), भीष्म साहानी, प्रका॰ राजकमल प्रकाशन प्रा॰लि॰, नई दिल्ली-२, १९७३, १।८, क्राउनसाइज, पृ॰ २६०। [26] याज्ञसेनी (अनूदितोपन्यासः), ओडियामूललेखिका - डा॰ प्रतिभारायः, संस्कृतानुवादकः - डा॰ भागीरथिनन्दः, प्रकाशकः - डा॰ सी॰गिरिः, कुलसचिवः, राष्ट्रियसंस्कृतसंस्थानम्, ५६-५७, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली ५८, प्रथमसंस्करणम् २००६। [27] सीमा, रामकरणशर्मा, नाग पब्लिशर्स, देहली १९८७। [28] विसर्गः, केशवचन्द्रदाशः, लोकभाषाप्रचारसमितिः, पुरी १९९८।

काराणां तन्नाम औपन्यासिकानां प्रत्यग्ररचनासु परिदृष्टां भारतभावनामत्र प्रतिपादयामः। ततः सकृदवलोकयामस्तावत् तत्र को विषय इति।

३.१. *रयीशः* - मदालसा-शिवशुकीयम्-सन्ध्या-पाथेयशतकम्-वीणा-दीपिकादिकाव्यकारस्य तथा सीमेति-उपन्यास-लेखकस्य रस-सिद्धकवीश्वरस्याचार्यवर्यस्य रामकरणशर्ममहोदयस्य सद्यतम उपन्यासो वर्तते रयीश इति। रयीशः सामाजिकोपन्यासः। उपन्यासस्य विभाजनं द्वादशखण्डेषु कृतं लेखकेन किन्तु तेषां नामकरणं न कृतम्। देशस्य समकालिक-सामाजिक-राजनीतिक-स्थितौ नितरामुद्विग्न औपन्यासिक आदर्शसमाजस्य सामाजिकं राजनीतिकमाध्यात्मिकञ्च महत्त्वं प्रतिपादयितुकामः अमुमुपन्यासं प्रस्तौति। तस्य विषय एवं वर्तते -

सुमनपुर-जनपदे नवतिवर्षीयः कृषको वर्तते सुधाकरमिश्रः। ब्राह्मणोऽपि स तस्य परम्परागतायां कौलिकवृत्तौ अनादरात् कृषिकार्यं करोति। अस्य उपन्यासस्य प्रधानपात्रं स एव। मिश्रसुधाकरः परमकारुणिकः परमवत्सलः परमराष्ट्रभक्तः परमविश्वबन्धुः परमगम्भीरस्वान्तः।[29] अलौकिकाभायुक्तस्याप्यस्य दिनचर्या साधारणजनवदेवास्ति- "कोऽयं व्यक्तिविशेषः सुधाकरमिश्र नामा ? व्यवहरति तु सर्वैः मनुष्य इव। क्रीडति शिशुभिः। प्रोत्साहयति हासयति च तरुणान्। वन्दते च सर्वान् स्वयं वन्द्यः। ... तनौ यज्ञोपवीतं धौतवस्त्रमुत्तरीयं च केवलम्। ... न दधत् स्वाम्यं कपर्दिकाया अप्येष रयीशः आर्यः।"[30] सर्वमस्य सार्वजनीनम्। तस्य पुत्री सुशीला अमरेन्द्रेण सह विवाहं रचयति। तयोः पुत्रद्वयं मनोजो मुनीन्द्रश्चेति। मनोजः स्वगृहं गत्वा स्वीयां पैतृकीं वृत्तिं स्वीकृतवान्, परन्तु मुनीन्द्रः मातामहेन सह स्थितवान्। मातामहः श्रीमिश्रः तं गुरुकुलं प्रेषितवान्। तत्र विंशतिवर्षाणि पठित्वा प्रत्यागत्य देशभ्रमणे निर्गतवान्। कुत्रचित् स स्वीयामन्तर्वाणीं श्रुतवान्, तत्र भूकम्पो भवितेति। तत्सर्वं स जनपदाध्यक्षं विवृतवान्, स साक्षादेव स्वकन्याविवाहतिथिं परिवर्तितवान्, मुनीन्द्रश्च जानपदान् जागरूकान् कारितवान्। सत्यमेव स विपर्ययः सङ्घटितः, राजप्रासादश्च विध्वस्तो जातः। सहसा मुनीन्द्रः, राजमहिषी, सुवर्णपेटिका च बलान्नीताः कैश्चित् वैदेशिकैश्चोरैः। जनैः सूचितः अध्यक्षः गत्वा पश्यति वटवृक्षतले कोऽपि वृद्धः प्रवचनं करोति, मुनीन्द्रादयः जनाः उपविश्य तत् शृण्वन्ति। अन्ततो ज्ञातवान् यत् स सुधाकरमिश्र एव, येन एते रक्षिताः। सुधाकरमिश्रः स्वपौत्रं जनपदाध्यक्षेण परिचायितवान्, तस्य सत्कारं च कृतवान्। यदा तौ वैकुण्ठपुरं प्रत्यागन्तुमिष्टवन्तौ तदा मनोजः अध्यक्षस्य कन्या-जामातरौ रुक्मिणी-वंशीधरौ नीत्वा उपस्थितः। तैः सह पूर्वदुष्कृतकारिणो वृकोद-

[29] पृ० ३, रयीशः, उपर्युक्तम्। [30] तत्रैव।

रस्य कन्या ललितापि आसीत्। परं यानचालकात् सुधाकरः सर्वं श्रुतवान्, तस्याः भ्रातरौ चिकित्सालयं प्रविष्टौ, माता च पितुः दुराचरणेन आत्महननाय प्रयतितवती। सा ललितापि रुक्मिण्या एव आनीता तत्र। एतत्सर्वं श्रुत्वा सुधाकरमिश्रः प्रातरेव वैकुण्ठपुरं प्राप्य तयोः स्वास्थ्यावस्थां पृष्टवान्, स्वरक्तं प्रदाय तयोः जीवनं रक्षितवान्। ललितायाः मातरं सुमनोपुरमेव आनीतवान्। अनन्तरं काले ललिताया विवाहो मुनीन्द्रेण सह स्थिरीकृतः। तत्र विवाहोत्सवे सर्वेऽपि अतिथयः भूरिभोजनेन आप्यायिताः। मुनीन्द्रस्य पितापि तत्र आगत एव। ततः स्वगृहं गत्वा पित्रोः सेवार्थं नवदम्पतीमुपदिष्टवान् सः।

सहसा संवादोऽयं प्रकाशितः यत् सुमनपुरवास्तव्येन वैज्ञानिकेन सुधाकरमिश्रेण देशोऽयं रक्षितः वैदेशिकाक्रमणात्। सर्वे जनाः तमभिनन्दितवन्तः, सर्वान् उद्बोधयन् स देशनिर्माणस्य सन्देशं श्रावितवान् - "समतैव वर्तते सिद्धान्त एकोऽत्र स्वयंसिद्धः। समतैव दर्शनं समतैव दृश्यम्, समतैव दर्शकजातमपि।"[31] तत्र अपरः वैज्ञानिकः साधुरामः तं सुमनपुरस्य रयीशमिति उद्घोषयति। तं देशमुख्यदायित्वं निर्वोढुं जनाः आवेदितवन्तः। साधुरामेण उद्भावितायां "सञ्चयशालायां" सर्वे अधिकारिण एकत्र उपविश्य विचारं करिष्यन्ति। सुधाकर-मुनीन्द्रौ च संहितादेशस्य वैकुण्ठपुरजनपदस्य च प्रधान-जनपदाध्यक्ष्यरूपेण पञ्च पञ्च वर्षाणि यावत् कार्यं कृतवन्तः।

एवमेव तत्र पञ्चवर्षशासनस्य नूतना पद्धतिः समारब्धा। ग्रन्थस्य समीक्षायां सत्यमुक्तं डा० प्रमोदभारतीयेन[32]

> Dr. Sharma's Rayishah is really a new experiment in the field of Sanskrit novels. Sanskrit writers hardly can take such a unique plot to write a novel. Dr. Sharma looks fed up with the existing socio-political systems and wants to bring some revolution in the society wherein there won't be any place for inequality … Dr. Sharma has been successful in projecting the 90 year old Sudhakar Mishra as the main hero of his novel Rayishah."

उपन्यासस्यास्य भाषाशैलीं समीक्षमाणस्तरुणः समीक्षकः कौशलतिवारी वदति - "उपन्यासस्य भाषा परिमार्जिता, प्राञ्जला, भावयुक्ता च। इयं भाषा प्रसङ्गानुकूला, पात्रानुकूलाऽपि च। उपन्यासस्य भाषायां यत्र तत्र अनुप्रासोपमारूपकादयः शब्दार्थालङ्काराः प्राप्ताः किन्तु ते न श्रमसाध्याः।"[33]

३.२. *सीमा* - देश-प्रदेशानां सीमानमधिकृत्य प्रचलितैः परस्परं विवादैः प्रेरितः लेखकः एतादृशं स्वतन्त्रमुपन्यासं रचितवान्, यत्र उपशीर्षकं विना सप्तभागाः सन्ति। लेखकः पञ्चानां क्षुद्रराज्यानां सम्प्रभुतापरकम् ऐक्यीकर-

[31] तत्रैव, पृ० ६५। [32] Fourteen Novels of Sanskrit, Pramod Bharatiya, Parimal Prakashan, Delhi, 1999, p. 59. [33] पृ० ८९, कथासरित्, १२ तरङ्ग, प्रका० कथाभारती, ५७, वसन्तविहार, झूसी, इलाहाबाद, २११०१९।

णमाधारीकृत्य लिखितवान्, यत्र वयं प्रत्यक्षीकुर्मः अद्भुतवर्णनकौशलं, कल्पनाचारुतां, प्रस्तुतीकरणभव्यतां, परिस्थितीनां स्वाभाविकमङ्कनं, विषयस्य प्रत्यग्रतां, दशान्तर्दशानां समुचितसंयोजनञ्च। राज्यानामेकीकरणसन्दर्भे संहारक-विघटक-तत्त्वानां विश्लेषणं कुर्वन् उपन्यासोऽयं कस्यचित् काल्पनिकयुगविशेषस्य राजनीतिकस्य तथा राष्ट्रियजीवनस्य उद्घाटनं करोति। बहूद्देशीयेऽस्मिन् कथानके मूलं तु आश्रमसंस्कृतावेव वर्तते। राजनीतिक-सामाजिक-सङ्घर्ष-मध्ये पात्राण्यत्र उच्चचारित्रिकभूमौ प्रतिष्ठापितानि सन्ति। राष्ट्रियस्वर एव उपन्यासस्य मुख्यस्वरो वर्तते। राष्ट्रियोत्कर्षस्य संस्कार उपन्यासस्य प्रतिपक्षं विराजते इति अत्र राष्ट्रियजीवनस्य प्रतिबिम्बान् आविष्कर्त्तुं शक्नुमः। अवश्यमुपन्यासोऽयं साम्प्रतिकभारतस्य प्रातिनिध्यं वहतीति कथनं साहसमात्रं स्यात्, यतो हि केनापि एकेन उपन्यासेन समकालिकभारतीयजीवनस्य अनन्तधारोपधाराणां विचाराणामादर्शानां व्यक्तीकरणं शक्यमपि नास्ति।

अत्र महर्षिः गालवः वारुण-ऐन्द्र-कौबेर-दुर्ग-वासवेति पञ्चराज्यानामेकीकरणाय सर्वत्र प्रेम-सौहार्द-समानता-स्वतन्त्रता-चेतनानां दीपं प्रदीपयति। कुमार-लोकबन्धुः अनन्तरं काले राजमहालयं गत्वा प्रवचनं करोति, सम्पूर्णे जनजीवने सुखस्य समृद्धेः शान्तेश्च वार्त्तां प्रसारयति। वारुणनरेशस्य पुत्र्या राधया सह विवाहं कृत्वा इतो ऽप्यधिकतया लोककल्याणकारी भवति। प्रतिवेशराज्ये अव्यवस्थां दृष्ट्वा कारणं ज्ञातुं तत्र छद्मवेशेन तिष्ठति, आवश्यकतायां सत्यां जनानां कृते सहयोगं करोति। अन्ततो राष्ट्रहितार्थं स वन्दीभवति। तच्छ्रुत्वा शान्तिप्रियाः वारुणदेशवासिनः लोकहितकारिणः लोकबन्धोः मुक्त्यर्थं युद्धस्य सङ्कल्पमेव कुर्वन्ति। तदा कौबेरदेशवासिनः अपि राज्ञः कुशासनात् मुक्ताः भवितुं तेषां सहयोगं कुर्वन्ति।

एवमेव बहुत्र अस्मिन् उपन्यासे जनतायाः भूमिका निर्णायिका वर्तते। दुर्ग-वासव-देशवासिनः सुसभ्यान् सुसंस्कृतान् कारयितुं मदनिका-राजकुमारौ च कार्यं कुरुतः। अन्ततो तावपि त्रिभुजराष्ट्रेण सह सम्मेलनपत्रे हस्ताङ्कनं कुरुतः।

३.३. *विसर्गः* - विसर्गो नाम ७ काव्यानां, ५ कथासङ्ग्रहाणां तथा १३ उपन्यासानां प्रणेतुराचार्यस्य केशवचन्द्रदाशस्यान्यतम उपन्यासो यत्र प्रतिपदं निष्कामकर्मयोगस्य बीजभूतो गीतोक्तो विसर्ग एव जीवातुभूतो वर्तते। अस्य कथाग्रन्थस्य नायको नकुलो जात्या कुम्भकारः, दरिद्रश्च। स दारिद्र्येण

नितरां पीडितः सन् वारं वारं प्रयतते आत्मघातार्थं, पुनः पुनः विरमति परिवारस्य समाजस्य च परिपोषणार्थम्। व्यवसायपरिवर्तनेन स्वकीयाभिवृद्धिं तिरस्कुर्वन् स निष्कपटानां ग्राम्यजनानां सेवार्थं कौलिकीं वृत्तिमेव स्वीकरोति। सरलहृदयस्यान्तः क्रमशः परिस्फुरति असामान्या भक्तिभावना सुदृढा आस्था च साधुं कलानिधिं प्राप्य। नायिका अविना पतिपरायणा, गुणदर्शिनी, महीयसी, साध्वी, पत्नी, श्वशुरसेवातत्परा आदर्शवधूः, स्नेहमयी जननी, पथप्रदर्शिका ज्येष्ठा भगिनी वर्तते। ग्रामस्य सामाजिकीं दशामित्थं पत्रस्थीकरोति कथाकारः- "सम्प्रति ग्रामस्तु श्रीहीनः। जीवनधारा अत्र विपर्यस्ता। संस्कृतिश्च नष्टा। परम्परा अन्धा। अविश्वासो विवर्धितः। शिक्षिताः अत्र तस्कराः। अशिक्षिताः चौराः। भद्राः शोषकाः। सभ्याः सर्वभक्षकाः। भ्रष्टाश्च धर्मरक्षकाः। विपथगामिनो युवकाः। महावृक्षेऽत्र निष्पर्णा सर्वाऽपि शाखा।"[34]

३.४. *कालाय तस्मै नमः* - जानीमो वयं यत् काल एव सर्वं विपरिणमयति। अतः मानवेन सर्वदा सकारात्मकमनोभावसहितेन भाव्यम्। कदापि पराजयमस्वीकृत्य सदैव अग्रे सरन् स्वीयक्षमतायाः प्रदर्शनं कुर्यात्। यथैव समयः समागच्छतु नाम, तस्य स्वागताय स सर्वदा सन्नद्धः स्यात्। स्वराष्ट्रे मरणं श्रेयः परराष्ट्रो भयावह इत्यादिभावनया सह संस्कृतसंस्कृतिं प्रति बद्धादरः सन् औपन्यासिकः ओगेटि परीक्षितशर्मा प्रणयति स्वान्तिमकृतिं "कालाय तस्मै नमः" इत्युपन्यासम्।

व्यावहारिक-सरल-संस्कृत-गद्येन लिखितोऽयमुपन्यास आत्मचरितप्रधानः सामाजिक उपन्यासो वर्तते। ग्रामस्य कस्यचन निर्धनच्छात्रस्य सङ्घर्षपूर्णजीवनस्य परिचय इतो लभ्यते। संस्कृतभाषाया अध्येता अस्य कथानायकः राष्ट्रभक्तितत्परो वर्तते। स्वस्वार्थे निमग्नान् भौतिकोन्नतये उपेक्षितन्यायान्यायविचारान् देशभक्तिशून्यान् जनान् दृष्ट्वा स स्तब्धो भवति। देशे पर्यटन् नगराणां तत्रत्यदर्शनीयस्थानानामैतिहासिकस्थलानां मन्दिरादीनां वर्णनं करोति। मौलिककथावस्तुना रचितोऽयमुपन्यासः धैर्यनिःस्वार्थता-स्वच्छजीवन-उच्चविचार-युगमनीषादिभिः विमण्डितः सन् साम्प्रतिकीं परिस्थितिं विशदीकरोति।

भास्करगुप्तस्य व्यवसाये व्यग्रता, छात्र-नन्दलालस्य अतिथीनां कारणात् विलम्बितमध्ययनम्, धर्मात्मनः प्रतिवेशिनो निधनम्, दमयन्त्याः पुत्रप्राप्तिः, केन्द्रीयशासने

[34] पृ॰ ५१, विसर्गः, उपर्युक्तम्।

रघोर्नियुक्तिः, सर्वमाहृत्य कालपुरुषस्य वैविध्यं वैचित्र्यं च प्रतिपादितमत्र। क्वचित् शैली शिथिला वर्तते इति सत्यं, तथापि सर्वतोभावेनायमुपन्यासः साफल्यमण्डितो लक्ष्यते। श्रावण-कथकचतुर्वेदि-वाचस्पतिमिश्र-इरावती-अनामिका-चारुमत्यादिपात्रैः उपन्यासोऽयं क्रमशो गतिशीलो भवति। आदर्शवादी श्रावणः अन्ततो गत्वा संस्कृतभक्तो वर्तते अन्तिमे परिस्थितिभिः युध्यन् देदीप्यते। वाचस्पतिमिश्रस्य संस्कृतज्ञा पत्नी चारुमती श्रावणस्य गृहे रोचिष्णुतया ललित-व्यावहारिक-संस्कृतेन वार्त्तालापं कृत्वा प्रभावयति सर्वान्। उपन्यासे वैचित्र्यं विधातुं कथाकारः लघु लघु कथोपकथनं योजयति, क्वचित् संवादशैलीं क्वचित् पत्रशैलीमपि निवर्तयति।

३.५. *मूको रामगिरिर्भूत्वा* - हर्षदेवमाधवस्य नूतनः कश्चित्संरम्भो मूको रामगिरिर्भूत्वा इत्युपन्यासः। अत्र मेघदूताद्वस्तु सङ्गृह्य अभिशप्तयक्षस्य आत्मकथनशैल्या वासरिकारूपेण उपन्यासोऽयं सज्जितः। लेखकः मेघदूतीयान् शतं श्लोकान् विस्तारयति शतं पृष्ठेषु, ३६५ दिवसेषु! वस्तुत अत्र १५६ दिनानामेव दैनन्दिनी वर्तते। हर्षदेवो यथा कविरेव शृणुयात् मूकप्राणस्य मौनदहनम्। मूकवचनमपि तस्य महावाक्यायते यथा[35]- "अद्य रात्रिर्मूकाऽस्ति (यथा रतिक्रीडासु त्वम्)।" अस्मिन् उपन्यासेऽपि वयं तस्य महाभारतीयमानसं प्रत्यक्षीकुर्मः अग्रिमपङ्क्तिषु।

उपन्यासोऽयं चतुर्भिः मेघखण्डैर्विभाजितः - श्याममेघः, अरुणमेघः, रक्तमेघः, सुवर्णमेघश्चेति। ... उत्थिते शार्ङ्गपाणौ इति मेघदूतपंङ्क्तिं मनसि निधाय देवोत्थान-एकादशीतः (कार्तिकशुक्लैकादशी) प्रारब्धेयं वासरिका, समाप्ता च एकवर्षात्परं तस्मिन्नेव तिथौ। अत्र वर्णिता कथा संक्षेपेण एवमस्ति।

प्रथमभागे एकादशीतिथौ रामगिर्याश्रमेषु अवतीर्णो यक्षः विरहव्यथापीडितः सन् सर्वत्र तोलयति पूर्वतनसौभाग्येन सह इदानीन्तनं दौर्भाग्यम्। जडेषु चेतनेषु सर्वत्र पश्यति स प्रियायाः रूपम्। नारदमुखात् श्रुतां स्वीयपूर्वजन्मत्रयस्य कथां स्मरति यक्षः। माघकृष्णद्वितीयायां स पापरुचिपिशाचरूपेण स्थानभ्रष्टेन पुण्यदर्शनगन्धर्वेण सह मिलति। द्वितीयभागे यक्षः अनुभवति कापि प्रतिप्रातः तस्य कुटीरं परिष्कृत्य पुष्पैः सज्जीकरोति, रङ्गवल्लीभिः चित्रयति। चैत्रशुक्लद्वितीयायां प्रच्छन्नः स्थितः स तां नारीमाविष्करोति, तस्याः परिचयं प्राप्नोति सा "पार्थिवी"इति। वैशाखशुक्लद्वितीयायां पार्थिवी भारद्वाजमुनेः सकाशात् आकाशगामिनीविद्याकल्पग्रन्थं स्वीकरोति। तत्र सिद्धिलाभार्थं २३२ द्रव्याणामुपयोगः वर्णितोऽस्ति। उभावपि औषधीनां सञ्चयं कुरुतः। ततः वैशाखशुक्लपूर्णिमायां सिद्धिं विन्दतः। तृतीयभागे तौ श्रावणशुक्लद्वितीयायां यात्रां विधाय वेत्रवत्यास्तीरे कस्यचन राजमहाल-

[35] पृ० ६२, मूको., उपर्युक्तम्।

यस्य ध्वंसावशेषं दृष्टवन्तौ। तत्र यक्षो जानाति यत् पूर्वजन्मनि स विदिशासम्राट् पुण्यकेतुः आसीत्, पार्थिवी च दशार्णराजकन्या पद्मिनी। तत्र पितृदर्शनं कृत्वा दाम्पत्यं स्वीकृत्य रामेश्वरस्य दर्शनं कृतवन्तौ तौ। चतुर्थभागे यक्षः कामाख्यामन्त्रानुष्ठानं प्रारब्धवान्। आश्विनशुक्लनवम्यां माता दर्शनं दत्वा वरप्रदानं करोति। तेन सह साधुवेशिनः कालजङ्घाराक्षसस्य परिचयं, नाशोपायं च उपदिशति। विजयादशम्यां पापरुचेः साहाय्येन मृत्युदंष्ट्रापर्वतगुहां प्राप्य राक्षसं हत्वा पार्थिव्या उद्धारं करोति। दीपावल्यां दीपकरागेण लक्ष्म्याः कुबेरस्य च आराधनां करोति, कुबेरश्च क्षमां ददाति। कार्तिकशुक्लप्रतिपदि पर्थिवी माता भवितेति सूचनां प्रदाय तस्य शापमुक्तिसमये विरहकष्टं सोढुमनिच्छुका सा प्रतिष्ठते। दशम्यां कुबेरस्य दूतः समागतः। किन्तु कर्मभूमिं सिद्धिभूमिं वसुन्धरां विहाय यक्षो न गच्छति। सर्वमपि एकपदेन कवयति कविः - अहं रामगिरिर्भूत्वा स्थितोऽस्मि। अलकायाः प्रतीक्षां कुर्वन्। पृथ्व्याः प्रणयं प्रतिपालयन्। एको मूको रामगिरिर्भूत्वा।[36]

३.६. *अन्यच्च* - इत्युपन्यासो राधावल्लभीयलेखनीखचितः सद्यः प्रकाशितेषु श्रेष्ठतमः संस्कृतोपन्यासो यत्र औपन्यासिकः शास्त्रज्ञानसम्पन्नेन स्वबुद्धिवैशारद्येन सन्निवेशयति कनिष्ककालिकं महाभारतीयं चित्रम्। मातृसंस्कृतेरुपासको महाभारतीयचेतनायाः प्रवक्ता देशभक्तकथाकारो मातृभक्तपुत्रव्याजेन कथानायकमुखेन विरचयति मातृसूक्तं वैदिकर्षिरिव। माता सत्यमेव उपस्थिता इति स मनुते स्म मनाक्। ऋषिणा उपन्यासकारेण यत् मातृसन्धानं प्रारब्धं तदर्थं स्वर्गकामेन तेन स्वर्गसन्धानमपि कृतम्। यो मातृसूक्तं पठित्वा मातरमावाहयति मातृभूमौ स्वर्गमपि अवतारयति, ननु स ऋषिरेव।

अत्र त्रयः खण्डाः सन्ति, तत्र पुनः क्रमशः २२, ७, ११ भागाः सन्ति, ६५ सन्दर्भाश्च विलसन्ति, विशेषव्याख्यानसहिताः। "तेजस्वि नावधीतमस्तु"इति प्रथमे खण्डे २२ भागेषु कल्पितकथानायकस्य विशाखस्य प्रथमाश्रमस्य कथा वर्णितास्ति, प्रसङ्गतः तस्य पितृगृहस्य, गुरुकुलस्य बाल्यकालस्य च कथा निरूपिता। भद्रपुरीवर्णनेन प्रारब्धोऽयमुपन्यासो यत्र ठक्कुरः सरस्वतीभवने पुराणप्रवचनस्यायोजनं कृतवान्। ग्रन्थिकः "कपिलदेवहूतिसंवादे"प्रसङ्गप्राप्तं स्वर्गं वर्णयति। मातरमन्विष्य तेन स्वर्गकामः कथानायको विशाखः सहसा प्रविश्य प्रवचनसमये एव प्रतिवदति। वार्तालापं विधाय विशाखो तेन सह ठक्कुरगृहं गच्छति। विशाखस्य बाल्यकालस्य विविधक्रीडाः वर्णिताः अत्र। मात्राचरितानि व्रतानि वर्णितानि। प्रसङ्गतः व्रताचरणध्येयं, धर्मीयविवादं,

[36] पृ० १००, तत्रैव।

पञ्चदेवोपासनां, गुरुकुलं, मातॄणं, स्वर्गसन्धानं च सम्यक् वर्णयति कथाकारः।[37] तात्कालिकं समाजं वर्णयितुकामेन कथाकारेण साधारण-सामाजिकस्य शाकटिकस्य मुखे गाथानां सफलप्रयोगः कृतः। संस्कृतच्छायासहिताः गाथाः मनोहरन्ति। तदापि लौकिकगानानां गाथानां च आदर आसीदिति प्रतिपादितमस्त्यत्र। दिवसचक्राणां भव्यवर्णनेन कालस्य गमनं द्योतयति कथाकारः। माता सूक्ष्मशरीरेण तिष्ठति इति विचिन्त्य मातृसूक्तं रचयति विशाखः।[38] तत्र सुवर्णाक्षी इति कीर्तिता इति कौण्डिन्यः स्वमातरं प्रत्यक्षीकृतवान्। एवमेव कथाकारः स्वयं सूक्तं रचितवान्, पूर्णतया साहित्यिकप्रक्रियया तस्य साधारणीकरणं च कृतवान्। सातवाहन(हाल)स्य कवेः वर्णनम्, गाथानां लेखकानामपि वर्णनं सूतमुखेन कारयित्वा लौकिकसाहित्येन सह कमपि सेतुं कल्पयति कथाकारः। विशाखः विपाकस्य पितृपादं स्वर्गविषये पृष्ट्वा निरामयं जीवनमेव स्वर्ग इति ज्ञातवान्। भोजनार्थं चतुःशालं प्रविशता तेन ठक्कुरस्य कुशूलः अवलोकितः।[39] अत्र विविधधान्यानां मुद्रानां च नामनि दत्तानि सन्ति। सूतः प्रवचने भारतमहिमा-गोपीचन्दन-तिलकप्रकार-कार्पासमहत्त्वादिकं वर्णयति।[40] अक्षरेषु एव देवाः प्रतिष्ठिताः इति वदति सूतः। हठात् पुराणलेखनस्य प्रस्तावं प्रस्तौति पौराणिकः सूतः विशाखस्य समीपे। पुराणलेखनव्याजेन लेखनीनिर्माण-ग्रन्थनिर्माण-संशोधनविधानानि वर्णितानि। सूतानां परम्परा, स्त्रीयाजकस्य कथा, मातुरन्वेषणा, विशाखस्य गमनौत्सुक्यमत्र वर्णितानि सन्ति।[41] विशाखः पुराणलेखनं समाप्य स्वव्यथां गाथाभिः श्रावयति। मन्दिरप्रतिष्ठान्ते कापालिकैराक्रान्तः सूतो निधिदत्तस्य समीपे नीतः। कालिन्दी अपि त्रिशूलहस्ता श्वशुरं रक्षितवती। चिकित्सको निधिदत्तस्तक्षशिलायामाचार्यात् सुश्रुतात् पठितवान् इति श्रुत्वा स तत्र गन्तुं सन्नद्धो जातः। सूतवर्यमापृच्छ्य स वाग्भट्टं सूचयितुं हरिद्वारं प्रति प्रस्थितः। मार्गे आगताः सङ्गम-प्रतिष्ठानपुर-विदिशा-दशार्णदेश-मथुराः वर्णिताः, क्रमप्राप्ताः वैदेशिकाः, बौद्धभिक्षवश्चापि वर्णिताः, पुरुरवोर्वश्युपाख्यानस्य, मेघदूतस्य च वर्णनं जातम्।[42] तक्षशिलां प्राप्य विविधभाषाव्यवहरद्भिः विचित्रव्यवहारैः भीतभीतैः जनैः मिलितः सः। कनिष्कस्य राज्ये हिन्दूनामुपरि अत्याचारः श्रुतः। तक्षशिलाविद्यापीठे प्रवेशः निषिद्धः। इतस्ततः भ्रमित्वा वितस्तातीरे स्नात्वा सत्रागारे भुंक्त्वा प्रसुप्तो द्वयोर्वार्तालापं श्रुत्वा स्नानघट्टे उपालिना सह मिलितः। सहसा कनिष्केण समवदत्, तोरणध्वंसात् तं रक्षितवान् च। साक्षात् तक्षशिलायां प्रवेशं प्राप्य, पाठं समापितवान्। समावर्तनं जातम्। मिलिन्दप्रश्न इति पुस्तकमाचार्येभ्यः वसुमित्रेभ्यः समर्पणीयमिति गुरुदक्षिणा घोषिता।[43]

"सङ्गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्"इति द्वितीये खण्डे[44] ७ भागेषु विशाखस्य तक्षशिलातः काश्मीरयात्रा विशदीकृता। यथा - शा-

[37] पृ० ९-१५, अन्यच्च, उपर्युक्तम्। [38] पृ० २५, तत्रैव। [39] पृ० ७१, तत्रैव। [40] पृ० ७४-८०, तत्रैव। [41] पृ० ८९-९२, तत्रैव। [42] पृ० ११४-११८, तत्रैव। [43] पृ० १३५, तत्रैव। [44] पृ० १३८-१७३, तत्रैव।

कलपुरस्य वैशिष्ट्यं वर्णयन् कथाकारो मिलिन्दप्रश्नपुस्तकस्य नेपथ्यं विशदीकरोति यत् पुस्तकमेव यत्नेन नयति विशाख आचार्यस्य वसुमित्रस्य कृते। वितस्तायाः तीरे तस्य गमनं प्रचलति। अकस्मात् आतपः, अकस्मात् हिमवृष्टिः। सहसा आगता वात्या। कापि छाया अनुसरति तम्। सहसा शिलाघातेन तं पातयित्वा वस्तूनि तस्य गवेषयति स्म सा छाया। भिक्षुणा शान्तिशीलेन रक्षितः सः। अलकापुरीति गिरिग्रामादागतायाः अर्चायाः कृते पुस्तकविषये सूचयति शान्तिशीलः। डोम्भजातीयैः अपहृतस्य पुस्तकस्योद्धारः। उपन्यासमध्येऽपि थेरगाथा-प्राकृतगाथा-क्षणभङ्गवाद-प्रतीत्यसमुत्पादान् निपुणं वर्णयति कथाकारः। प्रचण्डो वात्यासारः। मेघाः स्फुटिताः। अलका प्लाविता। उभावपि तत्र गच्छतः। शान्तिशील एकाकिनीमर्चां स्वीकरोति।

"पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते, पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते" इति तृतीयखण्डे विशाखस्य इरावत्या सह विवाहस्य, किन्नरपुरस्य, इदानीन्तनशासकानां दुराचारस्य च कथा वर्णिता। कन्ययोः प्रणयपाशाबद्धो विशाखः स्मरति महाप्रलयदिने कथं शान्तिशीलेन सह अर्चायाः विवाहस्तेन कारितः।[45] गृह्यसूत्रानुसारं विवाहं कारयति - मन्त्रान् पठित्वा सप्तपदी-मधुपर्क-अरुन्धतीदर्शनादिविधिपूर्वकम्। वृष्टिहेतोः प्रवासे अक्षमे विशाखोऽन्ततोगत्वा सुश्रवसो गृहे स्थितवान्। सुश्रवाः तस्य मूलनिवासस्य किन्नरपुरस्य, इदानीं वासस्य नवकिन्नरपुरस्य च इतिहासं, भिक्षोः कच्चायनस्य दुराचारस्य, राज्ञ्याः तूर्णायाः पलायनस्य, राज्ञः किन्नरस्य शासनस्य, पुरोहितस्य मल्लटस्य अत्याचारस्य च कथां श्रावितवान्। महास्थविरेण वसुमित्रेण मिलित्वा तस्मै मिलिन्दपन्हं ग्रन्थमुपायनीकरोति। अश्वघोषस्य विषयेऽपि शृणोति। सामनेरेण शिल्हणेन गत्वा स प्रवरपुरे अश्वघोषेण मिलति। तस्य मित्रं विपाक एवासीत् सः। शिबिकया तं नवकिन्नरपुरं शीघ्रं प्रेषितवान् अश्वघोषः। नवकिन्नरपुरं प्राप्य विशाखो मल्लटेन सह युद्धे आघातं प्राप्तं सुश्रवसम्, एकाकिनीं चन्द्रलेखां दृष्टवान्, अपहृता इरावतीति श्रुतवान्। ततः अश्वघोषाय पत्रं लिखितवान्,

[45] पृ॰ १८५-७, तत्रैव।

महाराजात् कनिष्कात् साहाय्यस्य प्रदानाय। इरावती मल्लटस्य अनुयायिभिरपहृता, निर्दयं भुक्ता, वितस्तातीरे त्यक्ता, भिक्षुभिः सेविता अन्ततो भिक्षुणी जाता। अन्तिमे विशाखः किन्नरपुरस्य शासनदायित्वे नियुक्तः। नरश्चन्द्रलेखायां दृष्टिं पातयति। विशाखः किमपि कर्तुमिच्छति। गृहं परितः नरस्य सैनिकाः, तान् परितः व्यूहरचनां कृतवान् विशाखः। मल्लटः छुरिकया प्राहरत् विशाखम्। चन्द्रलेखा छुरिकामुद्धृत्य व्रणविरोपणचूर्णं लिप्तवती। मातः! इति सम्बोधितवान् स मातृसूक्तमुपांशु जपन्।[46] सुश्रवाः आगतः। कनिष्कस्य सैन्यमागतमिति सूचना आगता। पलायमानो नरो विधृतः।[47] ततः अन्यच्च किं जातमित्याकांक्षायामेव उपन्यासोऽयमवसितः।

३.७. *स्वर्गपुरे* - स्वर्गपुरे इति व्यङ्ग्योपन्यासः डॉ॰ प्रमोदकुमारनायकेन लिखितो वर्तते। अस्योपन्यासस्य पृष्ठभूमिरेवमस्ति- मर्त्यपुरस्य कोऽपि एकः प्रवञ्चना-निपुणः रसिकपुरुषः केनापि प्रकारेण स्वर्गपुरं प्राप्तुं सफलो भवति। तत्र स स्वस्वभावानुरूपं कुटिलं साम्राज्यं विस्तारयति। अस्य प्रकरणस्य स्वाभाविकं चित्रणं व्यङ्ग्यकारेण नायकवर्येण स्वोपज्ञोपन्यासे विभिन्नप्रसङ्गेषु विहितम्। केचन प्रमुखशीर्षका एवं सन्ति - यात्रा, गोपालग्रामे, स्वर्गरमणी, श्रमिकस्य गृहे, दुर्गतसेवायाम्, वनाञ्चले, वनस्य उन्नतौ, शिक्षालये, गुरुरूपेण, चिकित्साक्षेत्रे, शिल्पागारे, भिक्षुकनेता, आपणे, क्रीडाग्रामे, कुक्कुरव्यवसाये, साहित्यसम्मेलने, पत्रालये, यक्षपुरे तथा सेवकरूपेण आदि, आदि। अस्माकं शासकानां कर्मचारिणाञ्च शतं प्रतिशतमाकलनं कृतमस्ति व्यङ्ग्यविन्यासेन यथा- “अत्रत्य सर्वकारो यथोचितभावेन ऋणप्रदानव्यवस्थां नैव जानाति। नापि अस्माकं मर्त्यकर्मचारी इव ऋणग्रहीतृभ्यः दश प्रतिशतं धनं स्वीकरोति। केवलं स्वाभिलाषं विलिख्य यदि आवेदनं क्रियते, तर्हि ते एकसप्ताहाभ्यन्तरे ईप्सितं धनराशिं प्रयच्छन्ति। सुतरां मया पञ्चकोटिपरिमिताः सुवर्णमुद्राः ऋणरूपेण स्वीकृताः। लक्ष्यपत्रके अहं सूचितवान् यत्- स्वर्गराज्ये

[46] पृ॰ २११, तत्रैव। [47] पृ॰ २१२, तत्रैव।

कादम्बरीरसनिर्माणक्षेत्रे आधुनिकशैल्या मया व्यापकं परिवर्त्तनमानेतव्यमिति। निर्दिष्टे दिने स्वर्गपुरस्य कादम्बरीविभागमन्त्रिणा कामप्रियेण मम शिल्पागारस्य शुभोद्घाटनं जातम्।[48] अपि च मद्यपानेन मृतानां परिवारेभ्यः साहाय्यप्रदानं व्यङ्ग्येनोपस्थाप्यते कथाकारेण - "मर्त्यस्य मद्यपा इव स्वर्गस्य कादम्बरीपानकारिणः अतीव गुरुत्वपूर्णाः नागरिकाः भवन्ति। यथा युद्धक्षेत्रे प्राप्तवीरगतिकाय सैनिकाय सर्वकारः धनराशिं प्रददाति, तथैव कादम्बरीपानेन मृतकाय अपि प्रदातव्यः। नोचेत् तेषाम् अमरात्मनः कृते महान् अपमानो भवेत्। अस्माकं मर्त्यपुरे तथैव भवति। अन्नं विना प्रत्यहं जनाः विभिन्नेषु क्षेत्रेषु म्रियन्ते, अथ च यदि कश्चन मद्यपानेन म्रियते, तर्हि तस्य कृते राजकोष उन्मुक्तो भवति, एतदर्थम् अस्मदीया भूमिः देवभूमिः इति उच्यते। एतस्याः भूम्याः कृते देवाः तत्र जन्मग्रहणाय व्याकुलिताः भवन्ति। सुतरां भवन्तः मम वचनम् अन्यथा नैव कुर्वन्तु।"[49] प्रसिद्धसमीक्षकेण दृक्-सम्पादकेन बनमालिबिश्वालेन उपन्यासस्य पुरोवाचि उक्तं यत्

> स्वातन्त्र्योत्तर युग में चारित्रिक पतन के चलते भाँति-भाँति की विसंगतियों के कारण सामाजिक जन-जीवन अस्त व्यस्त हो गया है। इन विसंगतियों का संचयन कर डा॰ प्रमोद कुमार नायक ने हास्य-व्यंग्य के आलम्बन ग्रहण करते हुए कई हास्य-व्यंग्य कथाएं लिखी हैं। इसी क्रम में उन्होंने स्वर्गपुरे नाम से एक उपन्यास की रचना की है जिस का प्रकाशन कथासरित् पत्रिका के तृतीय अंक से प्रारम्भ होकर ११ वें अंक तक सम्पन्न हुआ। ... डा॰ नायक की व्यंग्य-कथाओं में सर्वाधिक वैशिष्ट्य यह है कि इनमें विभिन्न वर्गों का प्रतिनिधित्व करने वाले पात्र हैं। इन कथाओं में कहीं नगरीय जीवनशैली पर व्यंग्य है तो कहीं धर्म के नाम पर भ्रष्टाचार पर व्यंग्य है। यहाँ प्रशासनिक भ्रष्टाचार पर भी प्रभावशाली अभिव्यक्ति देखने को मिलती है। सामयिक राजनीति पर लेखक की पैनी दृष्टि दर्शनीय एवं मननीय है। यहाँ ग्राम-सभाओं से लेकर पञ्चायतों, मन्त्रिओं, नेताओं, राजनीतिज्ञों के आडम्बरपूर्ण पाखण्ड व्यवहार पर व्यंग्य है। प्रशासनिक तन्त्र व शिक्षाक्षेत्र में फैले भ्रष्टाचार एवं सामाजिक मानवीय मूल्यों के तीव्र ह्रास पर भी व्यंग्य है। भाव, भाषा एवं शैली में

[48] पृ॰ ३४, स्वर्गपुरे, उपर्युक्तम्। [49] पृ॰ ३६, तत्रैव।

परिवर्तन, प्राचीन मान्यताओं से विद्रोह तथा शास्त्रीय सीमोल्लङ्घन के प्रति नवीन साहित्यकारों के आग्रह की भी आलोचना करने में डा॰ नायक पीछे नहीं हटते। इनके साहित्य में कहीं नवयुगीन परिवर्तित परिस्थितियों का अंकन है तो कहीं एक पीढी काल की कर्मस्थिति का संक्षिप्त चित्रण है। वस्तुतः डा॰ प्रमोद कुमार नायक की गद्यरचना (कथा एवं उपन्यास) में मानवीय सङ्घर्ष, अन्तर्विरोध, दुर्बलता, ध्वस्त हो रहे आदर्श एवं पतित नैतिक मूल्यों का प्रतिबिम्बन है। इनका साहित्य एक प्रकार से वर्तमान जीवन का प्रतीक है।[50]

## ४. भारतभावना

विंशशतकस्य अन्तिमपर्यायं यावत् संस्कृतभाषाकवयः स्ववर्चस्वं प्रमाणीकृत्य समृद्धं साहित्यमरचयन्। अद्यतनीयाः कवयः कथाकाराः वा कालिदासं बाणभट्टं सुबन्धुं दण्डिनं वातिक्रमन्ते इति कथनं साहसमात्रम्। किन्तु रयीशमूको रामगिरिर्भूत्वा-अन्यच्चादिकथाग्रन्थाः तदेव प्रमाणयन्ति। समकालिकं संस्कृतकथासाहित्यं कयापि समृद्धभाषया तुलयितुमलं स्यात्। कथादर्पणे समाजस्य मुखं चित्रं च द्रष्टुं शक्नोति कोऽपि कथापाठकः। भारतीयतायाः प्रकृष्टोदाहरणरूपेण प्रो॰ त्रिपाठी प्रस्तौति कालिदासीयं मेघदूतम्। “इसमें भारत का भूगोल है, तीर्थ हैं, पावनभाव है। प्रेमकी वह अनन्यता और निष्ठा है, प्रकृति से एकमेक होने से जन्मी जीवन की लय और संगति है। इस संगति में भारत के जीवनबोध की विश्व को देन है।”[51] मेघदूतस्य वस्तुसौन्दर्येण मूकीभूय कविः हर्षदेवः रमते रामगिरौ। मेघदूतस्य विषये प्रोक्तं प्रत्यक्षरमन्वेति मूको रामगिरावपि। मेघदूताद्वस्तु सङ्गृह्य विनूतनशैल्या अभिशप्तयक्षस्य आत्मकथनशैल्या वासरिकारूपेण च विन्यस्तोऽयमुपन्यासो हर्षदेवेन। केचन पण्डिताः रोचकशैल्या संस्कृतेन स्वदैनन्दिनीं पूरयन्ति इति सत्यम्। तत्पुनरुपन्यासरूपेण यक्षस्य चेत्, गन्धः सुवर्णे! माघशुक्लसप्तम्याः दैनन्दिनी एवमस्ति - अनवरतयज्ञधूमाच्छादिते नभसि वेदमन्त्रघोषैर्गुञ्जत्यन्तरिक्षे धर्मश्रवणमग्नेषु ग्रामेषु इष्टापूर्तकर्मव्यापृतेषु सचिवेषु, धर्मशास्त्रनिर्दिष्टशिष्टाचारयुक्तासु प्रजासु विनापि दण्डेन नियन्त्रिते राज्ये मया शिवभक्तिपरायणं जीवितं यापितम्।[52] अन्यच्च इत्यस्य लेखकः स्वयमाविष्करोति मेघदूतम्, तत्

[50] पृ॰ ४-५, पुरवाक्, स्वर्गपुरे, उपर्युक्तम्। [51] पृ॰ १९, समकालिक संस्कृत-साहित्य में भारतीयता, दृक्-१५-१६, दृग्भारती, आवासविकासकलोनी, झूंसी, इलाहावाद। [52] पृ॰ १८, मूको॰, उपर्युक्तम्।

पुनः सांख्याचार्यस्य ईश्वरकृष्णस्य समीपे, ततः ब्रह्मचार्याश्रमे स्थितः कथानायको विशाखो निलीय पठितवान् अभिसारिकालक्षणम्।[53] अहो मेघदूतमहिमा! महाभारतीयभावनाया अपरमुदाहरणं प्रस्तुतमस्ति यदा कथानायकः काश्मीरे स्नानावसरेऽपि गायति महाभारतीयभावनायाः प्रतीकं "गङ्गे च यमुने चैव ..." श्लोकम्

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् यान्तु सन्निधिम्॥

काश्मीरेषु स स्नाति। पुराणमिमं श्लोकं पठति।[54] अत्रापि परम्पराप्रचलितश्लोकस्य साधुपाठविमर्शे लेखकः सफलकामो वर्तते। किं बहुना, यथार्थपूर्वपीठिकायां गाथासप्तशत्याः यत्र तत्र उदाहरणान्यस्मान् अवश्यमेव कनिष्ककालिके भारते प्रापयति। एवमेव यज्ञ-पुराण-तर्क-वानप्रस्थ-भिक्षूणां संस्कृतिं सांस्कृतिकसन्दर्भपुरस्सरमुदाहरन् कथाकारः भारतीयसंस्कृतेः अत्युत्तमां प्रतिच्छविं निर्माति। तथैव श्रीकालूरीहनुमन्तरावस्य कथासु सृजनात्मकानि अस्तिवाचकानि च वर्णनानि सन्तीति तैः कथास्वारस्यमपि वर्धते न कथमपि कथासौन्दर्यं हीयते। वर्णनचातुर्येण स क्वचित् पाठकं दाक्षिणात्यस्य कमपि समृद्धमग्रहारं प्रापयति एव। तस्य ग्राम्यवर्णनं यथा- "तस्मिन् ग्रामे प्रथमद्वितीयवीथ्योः सप्त ब्राह्मणकुटुम्बानि आसन्। ... सर्वाणि ब्राह्मणगृहाणि मृद्भित्तिमन्ति तालपत्रपटलयुतानि च आसन्। ... द्वितीयवीथ्यां त्रीणि गृहाणि क्षत्रियाणामासन्। तेषु द्वे इष्टिकाभित्तिभिः पक्वमृत्तिकाफलकैश्च निर्मिते। एकं पर्णपटलगृहम्। वीथ्याः अन्ते पर्णपटलगृहे स्वर्णकारः निवसति स्म। तत्पार्श्ववीथ्यामासीत् लघुपरिमाणः रामालयः। तदभिमुखं व्याप्तानि बहूनि पर्णच्छदगृहाणि वैश्यकर्षकतन्तुवायकुम्भकाररजकगोपादीनामासन्।"[55] प्राच्यतत्त्वविद्भिः प्रणीतानामेतेषामुपन्यासानां प्रतिपुटं विराजते भारतभावना। तस्या भावनाया वैशिष्ट्याधायकानां गुणानां परिगणनं निम्नोक्तरीत्या शक्यमिति प्रतिभाति।

४.१. *नामकरणम्* ऋग्वेदे पञ्चस्थलेषु "वयं स्याम पतयो रयीणाम्" इति वर्णनं लभ्यते। तम् ऋग्वेदीयं पदं यत् परिश्रमार्जितधनस्य प्रतीकं वर्तते, तं

[53] पृ॰ ५६, अन्यच्च, उपर्युक्तम्। [54] पृ॰ १७८, तत्रैव। [55] पृ॰ २०, नाति॰, उपर्युक्तम्।

स्वीकृत्य औपन्यासिकः रयीणाम् ईशः रयीशः इति व्युत्पत्त्या तं धनिकजनपर्याये प्रयुङ्क्ते।[56] विसर्ग इति गीतोक्तमेव नाम।[57] औपन्यासिकः श्रीदाशः स्वदार्शनिकभाषया तन्निरूपयतीत्थम् - "संसारः नाम त्यागक्षेत्रम्। त्यागनिष्ठत्वमस्य धर्मः। यदत्र सम्बन्ध्यते तत् सर्वं त्यज्यते। तेन भोगस्य परिपुष्टिर्भवति। भोगः कर्मणः पृष्ठभूः। त्यागश्च कर्मणः परिपाकता। भोगः त्यागश्चेति मार्गद्वयं संसारस्य। रोगः नियामकः। आरोग्यं कर्मस्वारस्यम्। त्यागो नाम कर्मसिद्धिः।"[58] कालाय तस्मै नमः, सीमा, अन्यच्च इति तु संस्कृतपरम्पराप्राप्तानि नामानि। मूको रामगिरिर्भूत्वा कवेः प्रत्यग्रतां सूचयति। स्वर्गपुरस्य कल्पना तु भारतीयसाहित्यं विना न सम्भवेत्। अन्यच्च इति नामकरणमेव प्रतिपादयति बहु किमपि वक्तव्यमासीत्, २१६ पुटान् विलिख्य अपि बहु किमपि अवशिष्टम्। कथं विवशो वक्ता सर्वत्र आत्मानं स्पष्टीकर्तुं न शक्नोतीति लक्षणीयमेवात्र। अस्य नामकरणस्य पुष्ट्यर्थं कथाकारः शताधिकवारमुच्चारयति ज्ञातसारेणाज्ञातसारेण वा अन्यच्चेति। वस्तुतः प्रथमखण्डस्य दर्शनात्परं समाप्तित्वरा द्वितीयखण्डं तृतीयखण्डं च संक्षिप्तमकारयदिति सहजतया अनुमीयते। सहसा समापनमपि अन्यच्चेति पाठकीयजिज्ञासां प्रत्यग्रीकरोतीति पुनर्वक्तव्यं नास्ति। उक्तं च दयानन्दभार्गवेण- "अन्यच्चेत्यत्र याः घटनाः उपस्थापिताः ताः सर्वाः गन्धर्वनगरलेखोपमाः पश्यत एव विलुप्यन्ते, चन्द्रलेखा वा स्यात्, तक्षशिला वा स्यात्, अलका वा स्यात्। अवशिष्यन्ते केवलं त्वादृशाः उपन्यासानुशीलननिर्मलीकृतमानसाः सहृदयाः पाठकाः।"[59]

४.२. *महाख्यानता* भारतीयताया भारतमुग्धतायाश्च भेदं निरूप्य प्रो॰ राधावल्लभत्रिपाठी वदति - "भारतीयता कोई स्थिर और जड अवधरणा नहीं हो सकती। भारतराष्ट्र जिस तरह निरन्तर विकसमान रहा है, उसी तरह भारतीयता की परिधि भी विस्तीर्ण होती रही है। भारतीयता अपने आप को प्रतीकों, मिथकों और आख्यानों में प्रकट करती आई है। - पर आख्यान को पूरे युगबोध के साथ साधना भी उतनी ही बड़ी चुनौती है। बहुत कम कवि भारतीय महाख्यानों की विचित्र वीणा

[56] ऋग्वेदः, ४.५०.६, ५.५५.१०, ८.४०.१२, ८.४८.१३, १०.२२.१०। [57] अक्षरः ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते। भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः॥ श्रीमद्भगवद्गीता, ८.३। [58] पृ॰ १४, विसर्गः, उपर्युक्तम्। [59] पृ॰ ६, सरस्वतीसौरभम्, अङ्क-१.२, सम्पा॰ डा॰ रमाकान्तपाण्डेयः, प्रका॰ जगदीशसंस्कृतपुस्तकालयः, ११४, झालिनियामार्गः, किशनपोलबाजार, जयपुरम्, ३०२००२।

के सारे स्वर इस तरह साध सके कि उनका अनुरणन आज के श्रोता सुनें।"[60] अन्यच्च इत्यत्र स्थले स्थले उद्धृतानि आख्यानानि इमं महाख्यानेन विपरिणमयन्ति। अत्रोद्धृतानि शास्त्राणि अस्य महाशास्त्रत्वं साधयन्ति। अत्रत्यानि चरित्राणि भारतीयजीवनधाराभिः ओतःप्रोतानि, तत्र वाचकान् निमज्जयन्ति, उन्मज्जयन्ति, महाभारतीयं जीवनचित्रं चित्रयन्तीति कथनं साहसमात्रं न स्यात्। एवं प्रतीयते औपन्यासिकः स्वजीवने शिक्षितं सर्वं किमपि समावेश्य स्वोपन्यासं ग्रन्थाति।

४.३. *विश्वकोषता* उत्तमे उपन्यासे पदे पदे औपन्यासिकस्य बहुश्रुतत्वं बहुवेदित्वं बहुपाठित्वं महानुभवत्वञ्च प्रमाणितं भवति। तथैवात्र आचार्यस्य त्रिपाठिवर्यस्य प्रतिभाभावितोऽयमुपन्यासस्तस्य प्रतिभाया विश्वतोमुखत्वं विश्वव्यापित्वं विश्वजनीनत्वं च प्रमाणयति। वेद-वेदाङ्ग-नाट्यशास्त्र-गौतमधर्मसूत्र-शृङ्गारप्रकाश-कुट्टिनीमत-विक्रमाङ्कदेवचरित-भविष्यपुराण-सुश्रुतसंहिताभ्य उद्धरणानि अत्र सन्ति एव, परन्तु कामसूत्र-गाथासतसई-थेरीगाथा-वाचस्पत्य-अमरकोशाश्चाप्यत्र न त्यक्ताः।[61] केवलं गाथासतसईतः एव सप्त गाथाः उद्धृताः सन्ति। गोपीलीलायां गानानि च संयोज्य कथं प्रवचनानि मधुरीक्रियन्ते, समाजाभिमुखीक्रियन्ते इति सप्रमाणमुपस्थापयति कथाकारः। गङ्गे च यमुने चैव … इत्यारभ्य समिधः लक्षणं, लेखनीनिर्माणं, ग्रन्थपठनपद्धतिं, लेखनपद्धतिं, संशोधनपद्धतिमित्यादिकं सर्वमपि प्रतिपादितमस्मिन् विश्वकोषे।[62] सत्यमुक्तं देवर्षिणा कलानाथशास्त्रिणा - "उपन्यास तत्कालीन भारत के साहित्य की जो विश्वकोषीय जानकारी देता है वह सप्रमाण है इसके लिए सन्दर्भ टिप्पणियों में वेदशास्त्र, साहित्य, आयुर्वेद आदि के ग्रन्थों के उद्धरण हैं, उन शब्दों के अर्थ भी दिए गए हैं जो हमारे साहित्य में और बाल्यकाल में उस समय प्रचलित थे।"[63] कनिष्ककालिकभारतादारभ्य काश्मीरेषु साम्प्रतिकेन मेघस्फोटनेन उज्झितग्रामस्य चित्रणं कथाकारस्य लेखन्या पुनर्जागरितमेव। देशस्य नद-नदी-वन-पर्वत-वृक्षलतादिभिः संवलितायाः मनोरमप्रकृतेः चारुचित्रणं सहृदयहृदयं प्रकामं विशदयति। अन्ततो भारतीयसंस्कृतेः जयगानं कृत्वा

[60] पृ-७-१२, दृक्-१५-१६, उपर्युक्तम्। [61] पृ॰ २१३-६, अन्यच्च, उपर्युक्तम्। [62] पृ॰ ७४-८०, तत्रैव। [63] पृ॰ ४, सरस्वतीसौरभम्, १-२, उपर्युक्तम्।

मातृसूक्तमपि संपश्यति आर्षमानसेन विशाखभावेन। इमामेव भावनां पुरस्कृत्य कदाचित् ध्वन्यालोककारेण महावाक्यकल्पना कृता स्यात्।

४.४. *पूर्वसूरिणामानृण्यं नवार्थसन्धानमन्यच्छायासौन्दर्यञ्च* मिथ्-प्रतीक-बिम्बानां नवार्थसन्धाने सफलयोद्धा भवति श्रीहर्षदेवः। परम्परायाः पूर्वसूरिभ्यश्च बिम्बग्रहणं स्वप्रतिभया च तस्य प्रत्यग्रीकरणं हर्षदेवीयकाव्यसौन्दर्यस्य मुख्यमाकर्षणम्। तेन प्रतीयते अत्र मूको रामगिरिर्भूत्वा इत्यत्र मेघदूतीय-साम्राज्यस्य नवनिर्माणं जातमिति। ज्येष्ठकृष्णद्वादश्यां पत्न्या सह भ्रमितानि स्थानानि इत्थं वर्णयति कथाकारः- "मेखलासु रघुपतिपदैरङ्कितः आम्रकूटपर्वतः, वनचरवधूभुक्तानि वनकुञ्जानि, उपलविषमे विन्ध्यपादे विशीर्णा रेवा, दशार्णदेशस्य पाण्डुच्छायोपवनवृत्तयः, वेत्रवतीजलप्रतिबिम्बिता रम्यहर्म्या विदिशा, विहगश्रेणीकाञ्चीगुणा निर्विन्ध्या, पवनप्रियतमस्य चाटुवचनानि शृण्वन्ती शिप्रा, रत्नतेजोभिः द्योतमाना उज्जयिनीविपणिपङ्क्तिः, युवतिजनस्नानवासितजला गन्धवती, कुन्दधवलतीरा गम्भीरा, उदुम्बरगन्धकषायप्रदेशो देवगिरिः, रन्तिदेवकीर्तिपताकेव चर्मण्वती, शङ्खनादाकुला दशपुररथ्याः, प्रचण्डयुद्धस्मृतिभीषणं कुरुक्षेत्रम्, बलरामसेविता सरस्वती, स्वर्गनिःश्रेणीकल्पा जाह्नवी, ...।"[64] इदं सर्वमपि कविना कालिदासस्य वचनैः पुनराविष्करोति अन्यच्छायासौन्दर्यमहिम्ना। नायिकावर्णने कथाकारः अतिशेते पारम्परिकान् कवीन्, यथा- "विस्मृतकमलवासा लक्ष्मीरिव, अकाण्डे विनापि समुद्रमन्थनं प्रादुर्भूता वारुणीव, माधवीं शोभां द्रष्टुकामा इव वनदेवी, धरणीतलप्राप्ता देवाङ्गनेव, विस्मृतदिवसकालेव कौमुदी, त्यक्तजलाशयप्रीतिः कमलिनीव सा अकृतकसौन्दर्येण राजहंसीव कमलाद् बिसतन्तुवत् मम मनः प्रसभं कर्षन्ती विचरति।"[65]

४.५. *प्रकरणवक्रता* औपन्यासिकः श्रीहर्षदेवोऽत्र यक्षस्य वासरिकां तु निरूपयति, तेन सह प्रकरणवक्रतां स्वीकृत्य यक्षस्य पूर्वजन्मनः कथां योजयति। आकाशतः पृथिव्याः विशेषतः भारतभूमेः प्राकृतिकसौन्दर्यं वर्णयितुकामोऽयं पार्थिव्याः सहयोगेन आकाशगामिनीविद्याभ्यासं कारयति। रामगिरौ निर्वासितो यक्षः आकाशगामिनीविद्यया पर्यटति भारतीयतीर्थेषु वनेषु मन्दिरेषु पुण्याश्रमेषु च। तत्र जनानां साहाय्यं करोति, रोगं दूरीकरोति, तैः सह सह-

[64] पृ॰ ५८, मूको॰, उपर्युक्तम्। [65] पृ॰ ३१, तत्रैव।

भोजनं करोति। विश्वहिताय एव विद्यायाः प्रयोगः इति समयेन स मधुविद्यां विन्दति, कामाख्यामन्त्रानुष्ठानं करोति। कस्मिंश्चिद् दरिद्रग्रामे निलीय सुवर्णवृष्टिं कृत्वा पलायते। एवमेव बहुजनहिताय स्वसामर्थ्यं व्ययीकृत्य निर्मलं सुखं प्राप्नोति। अन्तिमे रत्नेश्वराय क्षमां दत्वा सिद्धिभूमिं वसुन्धरां विहाय गन्तुमनिच्छुः यक्षः दूतहस्तेन वासरिकामेव समर्पयति स्वपत्न्यै भारते अवतरणाय आमन्त्रणं विज्ञाप्य।[66] तथैव स्वर्गपुरे उपन्यासस्य नायकः प्रतिष्ठते पुनः भारतभूमिं प्रति। अन्यच्च इत्यत्रापि ऐतिहासिककथायां कथाकारः विशाखस्य चरित्रं योजयति, तेन सह अश्वघोष-कनिष्क-ईश्वरकृष्ण-हाल-प्रभृतीनां सम्पर्कसेतुं रचयति।

४.६. *विषादं त्यक्त्वा दुःखवादस्य नवीकरणं तत्र रमणं वा* कालिदासीयः अस्तंगमितमहिमा यक्षः स्वसिद्धये प्रवर्तते। कृत्वा नवदृढसङ्कल्प इव स कर्मभूमौ स्वकार्मण्यस्य हस्ताक्षरं त्यजति। पार्थिवसुखेषु प्राकृतिकसौन्दर्येषु विहरन् आत्मारामपर्यायं प्राप्नोति। या निशा सर्वभूतानां तस्यां जागर्ति संयमी इति स्मरन् रूपे अरूपस्य, अरूपे रूपस्य सन्धानं करोति। पराधीनतायाः शृङ्खलं छित्त्वा स स्वस्वतन्त्रसत्तामाविष्करोति, आत्मसोन्दर्ये पुनारमते। अन्यच्च-कथानायकः मातृस्मृतिं सहकृत्वापि नवकिन्नरपुरस्य नवनिर्माणाय, तस्य शासनाय च सन्नद्धो जातः। स विषादं त्यक्त्वा पुनः सामान्यजीवने प्रत्यागन्तुमुपदिशति इरावतीम्। अन्ततो बौद्धभिक्षुणीरूपेण स्वात्मप्रकर्षं साधयति सा।

४.७. *जीवनबोधो जीवनमूल्यं पारिवारिकं चित्रं वा* यद्यपि "मूके रामगिरौ"स्वल्पकालिकमेव यक्षस्य पारिवारिकजीवनं वर्णितं तथापि कुत्रापि यक्षः न विस्मरति स्वप्राणप्रियाम्। रामगिरेः वनारण्येषु, चञ्चलप्रकृतौ, चपले मेघे, तेजोमये भुवनभास्करेऽपि कथाकारः आविष्करोति प्रियाचारुत्वम्। 'रमणीयं सूर्योदयं वीक्ष्य मुदितां याति मनः। सूर्यपूजाकर्मणि तव हस्ततलमेव मया कोकनदरक्तं दृष्टम्। तव नते मस्तके सौभाग्यसिन्दूरं सूर्यातपशोभां विरचयति स्म। अधुना सूर्यातपे तव सिन्दूरशोभां पश्यामि।"[67] पार्थिव्याः त्यागभावना, जातिस्मरत्वं, स्वामिनः सिद्धये तस्याः अनन्यसाधना भारतीयजीवनस्य रमणीयं चित्रमुपस्थापयति। रयीशे रामकरणशर्ममहोदयः कृतिमाध्य-

[66] पृ॰ १००, तत्रैव। [67] पृ॰ ४-५, तत्रैव।

मेन अहिंसायाः, लोककल्याणस्य, सत्यस्य, सदाचारस्य च उपदेशं ददाति। लेखको वाञ्छति यत् एतादृशः समाजः भवेत् यत्र धनिकाः समाजहिताय कार्यं कुर्युः। तेषां सर्वस्वं समाजाय भवेत्। लेखकस्याकांक्षाऽस्ति यत् अस्माकं देशस्य धनिकाः देशविकासाय मनसा, वाचा कर्मणा च योगं ददतु। विज्ञानस्य प्रयोगः हिंसायाः कृते अकृत्वा जनहिताय भवेत्। तदैव सर्वत्र शान्तिः भविष्यति, वसुधैव कुटुम्बकम् इति अवधारणा तदैव चरितार्था भविष्यति। विसर्गे कथाकारस्य जीवनबोधः कर्तव्यबोधः कर्माकर्मविवेकश्च उपन्यासं परिपचन्ति। यथा कलानिधेरुपदेशे- "जीवनं कर्ममयं भवतु नाम। किन्तु कर्त्तव्यविहीनं न भवतु। यं प्रति यत् कर्त्तव्यं तत् अवश्यं चिन्तनीयं निभालनीयं च। अन्यथा जीवनस्य सन्तुलनं न भवेत्।"[68] इति औपन्यासिकस्य वचनमेव शिरसि निधाय कथानायको जीविताशां पोषयति सकलं परस्मै समर्पयन्। कालाय तस्मै नमः इत्यत्र उपन्यासप्रयोजनमित्थं प्रतिपादितम् – "इमां नवलां यः कश्चन यदि पठिष्यति जीवनस्यार्थः कः, जीवितं कथं प्रचलति इत्येनं विषयं ज्ञास्यति। ... अपि च ज्ञास्यति नाहं कर्त्ता, नाहं कारयिता, किन्तु सर्वकारकः परमात्मस्वरूपः कालः"[69] इति।

४.८. *नाल्पे सुखमस्ति* इत्युदात्तभावना दीर्घकाव्ययात्रायाः परं हर्षदेवस्य कथायात्रेयमपि काव्यमयी वर्तते। लघुकमपि वाक्यं तस्य महाकाव्यमयं भवति। प्रथमखण्डस्य अन्तिमपङ्क्तौ यक्षस्य वचनमीशावास्योपनिषदः सम्पूर्णस्यापि कथाग्रन्थस्य च जीवातुभूतं वर्तते - "आसीच्च मे मनसि। धन्योऽयं लोको यत्र प्राप्यते शाश्वतं पदम्। प्रकृतिरेव भोगान् ददाति, किन्तु तपसा पूर्णता लभ्यते, या न लभ्यते दिव्यलोकेषु। दिव्यलोकास्तु वस्तुतः तपसां व्ययलोकाः। वस्तुतो धरित्र्यामेव पुण्यार्जनं शक्यम्। अत्रैव पञ्चभूतानां मायां क्षिप्त्वा जीवात्मा परमात्मनो दायादो भवति। अलौकिकोऽयं लोकः!"[70] कथाकारस्यास्य विलक्षणेयमुदात्तभावना अन्यत्र न लभ्यते। सीमा इत्युपन्यासे राष्ट्रपञ्चकस्य एकीकरणस्य मूलमन्त्रो वर्तते जनहितं लोककल्याणं वा। तदर्थं कथाकारः क्वचित् वैयाकरणशिरोमणिं नियुङ्क्ते, कुत्रचित् षड्यन्त्राचार्यं प्रयुङ्क्ते, अन्यत्र आश्रमं संस्थाप्य सौरविज्ञानाचार्यान् नियोजयति। युद्धविद्या-ब्रह्मविद्यादिसकलविद्यानां प्रयोगं

[68] पृ॰ ६५, विसर्गः, उपर्युक्तम्। [69] उपक्रमः, कालाय॰, उपर्युक्तम्। [70] पृ॰ २५, मूको॰, उपर्युक्तम्।

लोककल्याणाय एव मनुतेऽयमौपन्यासिकः। लेखकः प्रदेशानां सीमाविवादं, क्षेत्रवादं, महिलाधिकारं, लिङ्गानुपातं, भ्रष्टाचारम्, उत्पादनसमस्यां, प्रतिभावमूल्यायनसमस्यां, परमाणुज्ञानस्यानुचितप्रयोगं, समाज-संस्कृति-प्राप्त-पारिवारिकमूल्यं, कर्त्तव्यहननं च सम्यक् निरूप्य, तदर्थमुत्पन्नानां समस्यानां सूक्ष्माध्ययनं विधाय समाधानं प्रस्तोतुं प्रयतमानो दृश्यते।

४.९. *मातृसंस्कृतिसंवेदना* रयीशोपन्यासे लेखकः वैदर्भीरीत्या मुनीन्द्रस्य जनन्याः हृदयं विशदीकरोति - “कथङ्कारं जानीयास्त्वं मातृहृदयम्? प्रकृत्यैव ममतान्धं भवति तत्। जनाः कथयन्ति त्वमसि महापण्डितो महासिद्ध इति, किन्तु किं तेन पाण्डित्येन किं च तया सिद्ध्या यत्र न स्यात् सत्कारः स्नेहैकप्राणस्य मातृहृदयस्य?”[71] मन्त्रमातृकायाः साक्षात्कारस्य प्रक्रियां सम्यक् विशदीक्रियतेऽन्यच्चेत्यत्र यथा - “तदेव वदामि। भ्रातः विशाख, स्वर्गः शब्दैः निर्मातुं शक्यते। ऋषय ऋग्भिः स्वर्गं रचयन्ति स्म। यदि वयं मन्त्रान् रचयितुं प्रभवेम, तर्हि स्वर्गमपि रचयितुं प्रभवेम।... तस्मिन् स्वर्गे माता अवतरेत्। ... एवं चिन्तयतस्तस्य वैकल्यं घनीभूतम्। तस्मिन् घनीभूते वैकल्ये स मातृरूपम् अपश्यत्। तत्क्षणं स मातृसूक्तं साक्षादकरोत्। विशाखेनानुभूतं यत्तस्य सूक्तस्य प्रत्येकम् ऋचि माता समाहिता, अथवा ता ऋच एव साकल्येन मातृरूपा आसन्। सूक्तं मुहुर्मुहुस्तस्य पुरः स्फुरति, तस्य सर्वाङ्गमालिङ्गति तमवशमिव करोति स्म।” मातृसूक्तं रचयति विशाखः। अस्य सूक्तस्य विशाख ऋषिः, माता देवता, अनुष्टुप् छन्दः।[72] प्रक्रियामेवं निरूपितवान् कथाकारः- “विशाखो भूमौ उपविश्य मातृमण्डलं निर्मितवान्। मातृसूक्तं पठित्वा मातुराह्वानं कृतवान्। माता साक्षात् तस्मिन् उपविष्टा आभाति।”[73] अन्ततो गत्वा पत्न्यां चन्द्रलेखायामपि मातृत्वमाविष्करोति मातृसूक्तं देवीसूक्तं वा स्मरन् - या देवी सर्वभूतेषु मातृरूपेण संस्थिता इति। तदर्थं कदाचित् स्वकीयम् ऋषित्वं वा मातृसूक्तस्य सूक्तत्वं वा दर्शयितुकामः कथाकारः पुनरावर्तयति एकवारमन्तिमे, मन्त्रवद् उपांशुरूपेण द्विवारम्। एषा माता सत्या सनातनी सरस्वती तु नास्ति!

ऋषिस्त्वं च कविस्त्वं च सत्यरूपा ऋतम्भरा।

[71] पृ॰ ८, रयीशः, उपर्युक्तम्। [72] पृ॰ २५, अन्यच्च, उपर्युक्तम्। [73] पृ॰ २६, तत्रैव।

सुव्रता मृत्युहन्त्री त्वं सावित्री परिनिष्ठिता ॥[74]

यस्याः प्रत्युत्तरेण त्रिपाठिलेखनीं नमन्नपि ऋषिकल्पो दयानन्दभार्गवो अपश्यत् त्रिपाठिसूक्तम्-

त्रिपाठीति काव्यविदं शश्रमणं
दिवे दिवे सुमृळीकं वृणीमहे।
उरुगायः कविक्रतुः क्रान्तद्रष्टा
विचर्षर्णि दैवीं वाचं नमस्यति ॥[75]

४.१०. *नारीसंवेदना* मातृसंस्कृतेर्जयगानमतिरिच्य अन्यच्चेत्यत्र अन्यनारीपात्राणि अपि स्वमहत्त्वं प्रतिपादयन्ति। तानि विवशतामनुभवन्तीति सत्यं, परं वाचकेषु कारुण्यं पूरयितुमलं सन्ति। ठक्कुरस्य सूतस्य विशाखस्य च करुणाप्लाविता विधवा कालिन्दी शेषे स्वश्वशुरं रक्षति, कालीरूपेण त्रिशूलं धारयित्वा कापालिकं प्रहृत्य। काचित् पितुः और्ध्वदेहिकं संस्कारमपि कृतवती स्त्रीयाजकेन। विधवाविवाहमपि वर्णयति कथाकारः। दाने प्राप्तायाः स्त्रियाः सामाजिकस्थितेः वर्णनमित्थं करोति - "सर्वेभ्यः स एकैकां दासीं दाने अददात्। ... पङ्क्तिषु स्थापिताः यस्य या रुचिता भवेत् सा ग्राह्या इति चोक्तम्।"[76] वैवश्यं विस्तारयति विशाखस्य द्वितीया माता - "अहं पिशाची नास्मि, अहं विवशाऽस्मि, सन्तप्तास्मि, मम केवलमयमेवापराधो यद्रूपवती नीचकुले प्रसूता च।"[77] चन्द्रलेखाविषये वदति - "दिनद्वयं तेषां वन्दिनी। तैः सा निर्दयं भुक्ता। अर्धमूर्च्छिता च वितस्तायास्तटे त्यक्ता।"[78]

४.११. *नूतनशब्दनिर्माणम्* अद्यावधि अस्माभिः लक्ष्यते यत्, नूतनशब्दसङ्घटनव्याजेन किं किं न सङ्घटितवन्तः किं वा न त्रोटितवन्तो जनाः। रयीशकारेण आङ्ग्लशब्दानामपि प्रयोगः कृतः, यथा - जीपयानम्, हेलिकाप्टरविमानानि, फैक्सविधिना, वोटबैंकम्[79] इत्यादयः। उपन्यासे लोकोक्तीनामपि प्रयोगः कृतः, यथा - व्रणे क्षार इव।[80] सरलसंस्कृतेन लिखितः प्रचलितसूक्तिप्रवचनैः सहितोऽयमुपन्यासः कालाय तस्मै नमः पोलिस-टिकेट-रैलस्थानकत्रिचक्रशकट-पाथेयपेटिकादिशब्दान् उपायनीकरोति। परन्तु अन्यच्च इत्युप-

[74] मातृसूक्तम्, पृ० २१२, तत्रैव। [75] पृ० ८, सरस्वतीसौरभम्, १-२, उपर्युक्तम्। [76] पृ० ३२, अन्यच्च, उपर्युक्तम्। [77] पृ० ४४, तत्रैव। [78] पृ० २०५, तत्रैव। [79] पृ० १०, रयीशः, उपर्युक्तम्। [80] पृ० ९, तत्रैव।

न्यासस्य कर्त्रा यत् श्लाघनीयं साधितमस्ति तत्तु पुरातनप्रसिद्धशब्दानां व्यवहारे आनयनम्। यथा - ठक्कुरः, तुम्बिकम्, प्रतन्वती, वीरुत्, अलसाला, फलिनी, शृङ्गाटकः, पतद्ग्रहः, शालाक्यं, शशः, स्त्रीयाजकः, कौमरभृत्यं, अङ्कोलः, अक्षोटः, परिवेणः, उपहस्तिका, हसन्ती, द्रङ्गः, कपिशीर्षकम्। समेषां सन्दर्भाः अपि दत्ताः सन्ति। तदानीन्तन-नगरनामनि अपि संस्कृतीकृतानि एव- भद्रपुरी (भदौही), ऋषिरसा (सिरसा), पुष्कलपुरम् (पेशावर), इरावती (रावी), शाकलपुरम् (स्यालकोटनगर)। एवमेव आभाणकानां संस्कृतीकरणं दर्शनीयमेव - कियतां घट्टानां वारि निपीतम्[81] इत्यादि। तत्र कारणद्वयं स्यात्। १. कनिष्ककाले कथायाः प्रापणम्, २. विस्मृतप्रायाणां शब्दानामादर्शरूपेण प्रयोगः। उक्तं खलु - एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः ... इति महाभाष्यकारेण।

४.१२. *परम्पराणां खण्डनं मानवीयमूल्यानां संस्थापना च* वास्तवस्य पक्षधर औपन्यासिकः शाश्वतिकमानवीयमूल्यानां संस्थापनार्थं रूढीनां खण्डनमपि करोति। मातृदर्शनं, स्वर्गरचनं, स्त्रीयाजकञ्च वर्णयता तेन प्रतिपादितं यत् - अहं जन्मना जातिं न मन्ये,[82] मातुः ऋणं भवति,[83] न स्वर्गो न वा नरकः[84] ऋषयः ऋग्भिः स्वर्गं रचयन्ति स्म,[85] भवतो वासुदेवस्य कथनं न निर्दुष्टम्,[86] अस्मिन् महादेशे एतावन्तो धर्मसम्प्रदायाः, एतावन्तो भेदाः, परस्परं कलहः। अयं कलहो निवारणीयः, यस्य मनो यं धर्ममभिनिविशते स तं धर्मं निर्वहतु, परन्तु अन्यस्य न छिनत्तु। मूलं तु सर्वेषामयमेव मन्त्रः - आत्मा प्रथमं ज्ञातव्यः इति,[87] देवो नास्ति, वेदो नास्ति, अस्ति केवलं मनुष्यः।[88]

४.१३. *परम्पराणां सातत्यं नवीकरणं च* मूको रामगिरिर्भूत्वा इत्युपन्यासो भारतीयपरम्पराणां व्रतोपवासपूजापर्वणां, पशुपक्षिवृक्षलतानां, मासानामृतूनामन्ततोगत्वा निसर्गलक्ष्म्याः काव्यमयविन्यासं करोति। अत्र १५६ दिवसानां दैनन्दिन्यां शताधिकवन्यपशुपक्षिणां निरूपणं कृत्वा तैः सह स्वप्रियासारूप्यं सम्भावयति, शताधिकभारतीयपर्वणां समुज्ज्वलवर्णनं विदधाति, ऋतुचित्रं च नित्यनूतनरूपेण विस्तारयति कथाकारः यक्षरूपेण। कदाचित् तत्र आदर्शरूपेण कविः शब्दकोशं पञ्चाङ्गं च स्वीकृतवान् स्यात्! विद्या-विद्यास्थान-शास्त्रागम-मन्त्र-तन्त्र-राग-सङ्गीत-साधनाभिः यक्षः

[81] पृ० १६, अन्यच्च, उपर्युक्तम्। [82] पृ० ६, तत्रैव। [83] पृ० १३, तत्रैव। [84] पृ० २३०, तत्रैव। [85] पृ० २५, तत्रैव। [86] पृ० ९२, तत्रैव। [87] पृ० १९८, तत्रैव। [88] पृ० २१, तत्रैव।

क्षणमिव वर्षं, परिशेषे जीवनं यापयितुं सिद्धिप्राप्तये च प्रस्तुतो भवति। विविधपक्षिणां वर्णनं यथा - "बलाका अमैथुनगर्भभरालसा डयन्ते। प्रतिसूर्यकाणां गात्रेषु वर्णपरिवर्तनं दृश्यते। अजगरस्य मसृणशरीरात् सरन्तो जलबिन्दवो तडागोपान्तवृक्षे गवयत्वचि मसृणतरं स्पर्शं जनयन्ति। तमालपर्णेषु मृदङ्गोपरि हस्ततालवज्जलाङ्गुलिः स्पृशति। आषाढस्य गृहं दात्यूहस्य कण्ठे वर्तत इति मन्ये। चातकस्य तृषा मम नेत्रयोः प्रविष्टा। अहं त्वां द्रष्टुकामः, हंसरसितमयेन मार्गेण त्वां प्राप्स्यामि। कलविङ्कविहगकण्ठशोभाधरं गगनम् आवयोः दूरत्वं रचयति। मयूरपिच्छकलापेषु वर्णरेखा विस्तरन्ति।"[89] वन्यपशूनां वर्णनं यथा आषाढशुक्लपञ्चमीतिथौ- "नागकेसरवृक्षशाखायां कृकलासः स्वरक्तवर्णां ग्रीवां नामयन् स्वैरं विहरति। जनकतनयास्नानपुण्योदके जलाशये सर्पकञ्चुलिकामसृणानि जलदवृन्दानि श्वेतनीलानि प्रतिच्छायारूपेण स्पन्दन्ते। नवप्ररूढदूर्वाङ्कुरैः क्षतविक्षतः शशकः शनैः शनैः(मत्समः पीडाविक्लवः) वटवृक्षकोटरं प्रति प्रयाणं कृत्वा विविक्तमाश्रयते।"[90] रयीशे प्रकृत्याः चारुवर्णनमपि लक्ष्यते- "आवाहयत् सन्ध्यामरुणरागा प्रतीची। आवाहयच्च राकापतिरागारुणा प्राची रजनीं सद्यः। नीडेष्विव विहगा नीरवचूङ्कृतयोऽलञ्चक्रुः सर्वेऽपि यथास्थानं शय्याः स्वाः स्वाः।"[91] एकस्मिन् स्थाने तमाखूसेवनस्य स्वाभाविकवर्णनं कुर्वन् लेखकः कथयति- "यथा पूर्वाभ्यासं तमालपत्रं कञ्चुकचूर्णं च चूर्णवटिकाया आदाय पिष्णंश्च तत् सम्भूतं निहितं वामपाणौ दक्षिणाङ्गुष्ठेन सविभ्रममालपितुमारेभे।"[92] देशकालवातावरणादिचित्रणे नितरां पटुः परीक्षितशर्मवर्यः देशस्य तात्कालिकीं स्थितिं सम्यक् निरूपयति - "देशपालकाः संरक्षकाः शासकाः मन्त्रिणः राष्ट्रभक्तिहीनाः देशभक्तिशून्याः ब्राह्मणभक्तिरहिताः देशभाषाविषये शत्रवः केवलं पदवीभक्ताः सिंहासनासक्ता अन्यायेन धनार्जनलोलुपाः सन्ति। प्रजाश्च तदनुगुण्यं चरन्तः केवलं जीवनयापनतत्पराः भवन्ति।"[93] विदिशाया गतगौरवं स्मरन् कथाकारः तस्या इदानीन्तनस्वरूपेण अन्तस्तपति कालमहिमानमनुध्यायन् - "विदिशा अधुना एकः पङ्कणः इव भाति। साँचीस्तूपस्तु बौद्धानां गतगरिमाणं घोषयन्

[89] पृ॰ ६१, मूको॰ उपर्युक्तम्। [90] तत्रैव। [91] पृ॰ ११, रयीशः, उपर्युक्तम्। [92] पृ॰ १२, तत्रैव।
[93] पृ॰ २, कालाय॰, उपर्युक्तम्।

प्रकृत्यां निश्चलः तपति। कालः सर्वदा निर्दयः। सः सर्वदा तेन किं करणीयं तत्कर्म विनालस्यं यथाकालं यथासमयं करोति। विदिशायाः वैभवो गतः। बौद्धानां धर्मप्रचारोऽस्तं गतः। अयं कालमहिमा कालाय तस्मै नमः।"[94] वाराणसी-ओटावा-बेनिस-नगरीणां भव्यं वर्णनमपि अयमुपन्यासः पोषयति। वाराणस्याः वर्णनं यथा - "सकलधरातलधराधरोत्तुङ्गहिमनगशृङ्गमुकुटभूषिते, विश्वसंस्कृतिजेगीयमान-सनातनधर्मसंस्कृतिविराजिते, भुवनतलनागरिकजनमण्डलप्रस्तूयमानमहितकीर्तिमण्डलमण्डनमहिते भारतवर्षे, सकलभुवनतल-विनुतचतुर्दशविद्यास्थानभूतायां, शुण्डमण्डितवेदण्डमण्डलतुलितकनककुण्डलमण्डितप्रकाण्डपण्डितमण्डितायां भारतीयसंस्कृत्याः प्रधानकेन्द्रभूतवाराणास्यां … ।"[95] अन्यच्च इति उपन्यासोऽयं भारतीयपरम्पराणां व्रतोपवासपूजापर्वणां, पशुपक्षिवृक्षलतानां, मासानामृतूनामन्ततोगत्वा निसर्गलक्ष्म्याः काव्यमयविन्यासं करोति। शताधिकवन्यपशुपक्षिणां निरूपणं कृत्वा शताधिकभारतीयपर्वणां समुज्ज्वलवर्णनं विदधाति, ऋतुचित्रं च नित्यनूतनरूपेण विस्तारयति कथाकारः विशाखरूपेण। विद्या-विद्यास्थान-शास्त्रागम-मन्त्र-तन्त्र-राग-सङ्गीत-साधनाभिः उपन्यासस्य प्रतिपुटं परिव्याप्तं वर्तते। मार्गे आगताः सङ्गमप्रतिष्ठानपुर-विदिशा-दशार्णदेश-मथुराः वर्णिताः, क्रमप्राप्ताः वैदेशिकाः, बौद्धाः भिक्षवश्चापि वर्णिताः, पुरुरवोर्वश्युपाख्यानस्य, मेघदूतस्य च वर्णनमत्र लभ्यते। मातुः स्मरन् तस्याः व्रताचरणानि स्मरति विशाखः, ठक्कुरस्य कुशूले विविधधान्यानि पश्यति, आयुर्वेदाचार्यस्य वाटिकायां विविधवृक्षाणां साक्षात्कारं करोति। कुलव्रताचरणविषये विशाखमाता वदति - "इमानि व्रतानि मम मात्रा उपदिष्टानि। तस्यै तस्या मात्रा … मम मातामह्या … उपदिष्टानि। इमानि अस्माकं कुलव्रतानि। मातुः गौरवं तु सर्वेभ्यः अतिरिच्यते। मातुरुपदेशात् कुलधर्माच्च व्रतमाचरामि। कुलधर्मं न हास्यामि।"[96] नलिनीदलगतजलस्येव तरलजीवनस्य चित्रीकरणे आचार्यस्य लेखनी महीयते। उक्तञ्च दयानन्दभार्गवेण -

आग्रमध्यान्तग्रन्थिभिर्विमुक्ता सौख्यदायिनी।

[94] पृ॰ १९१, तत्रैव। [95] पृ॰ १, तत्रैव। [96] पृ॰ ११, अन्यच्च, उपर्युक्तम्।

जयतान्निर्ग्रन्थिः श्रीमद्राधावल्लभलेखनी ॥[97]

४.१४. *हठात् समापनम्* अद्यतनीयकथासंसारस्य समापनं ज्ञातसारेण न मधुरीक्रियते न वा वृथोपदशैः भाराक्रान्तम्। यत्र कुत्रापि कथा समाप्यते, येन पाठकस्तदनन्तरमपि चिन्तयितुं बाध्यो भवति। "तदानीमेव सुश्रवा आगतः। स आह - इदानीं सर्वमुपपन्नं जातम्। कनिष्कस्य सैन्यं पृष्ठतः आगतम्। पलायमानो नरो विधृतः।"[98] एवमेव सहसा समाप्तोऽयमुपन्यासः।

४.१५. *लक्षणस्य सङ्गमनम्* "कविगतसमाधिनिष्यन्दभूतं विविधविद्यावदातं सकलशास्त्रतत्त्वसमन्वितं जीवनस्य सर्वाङ्गीणं रूपं निर्दिशत् जगतो नानावस्थानां परिज्ञाने प्रमाणभूतमभिनवकल्पनाभिरामं काव्यमुत्तमोत्तमम्।"[99] एवमेव आधिभौतिकाधिदैविकाध्यात्मिकेति त्रिषु स्तरेषु चरितार्थतां गतं काव्यमेव भारतीयतायाः प्रतिमानं भवेदिति उत्तमोत्तमकाव्यलक्षणं सुष्ठु सङ्गच्छतेऽत्र। अथवा "जीवनस्यैकदेशनिरूपणपरमाख्यानं कथा, गद्यबद्ध उपन्यासो महाकाव्यमयी कथा।"[100] इति राधावल्लभीयं लक्षणमपि सुष्ठु सङ्गच्छते। हर्षदेवस्य तु वाक्यमेव महाकाव्यमयत्वं भजतेति का कथा उपन्यासस्य? यथा- "चक्रवाको ननु भाग्यवान् अस्ति यतः असौ चीत्कारं कर्तुं शक्तिमान् अस्ति। चैतन्यरहितोऽहं न श्रावयितुं शक्नोमि मे विषादम्। पुटपाकप्रतीकाशोऽसौ मामेव पचति मयि।"[101] त्रिपाठिकृतस्योपन्यासस्य महाकाव्यमयत्वं विश्वकोषत्वन्तु सिद्धमस्त्येव।

५. *उपसंहारः* एवमेव ज्ञातमस्माभिर्यदेतेषु उपन्यासेषु कश्चन एवंविधो भावः परिस्फुरति, यस्तं तमुपन्यासं सर्वसाधारणपाठकस्य बोधगम्यं कारयित्वा तस्य चिरन्तनत्वं सनातनत्वं सार्वकालिकत्वं च विधाय राष्ट्रस्य संयोगात्मकं पक्षं द्रढयति। इयमेव प्राच्यज्ञानपूरिता भारतभावना कथिता विद्वद्भिः, या सम्यगालोचिता।

अन्तत उपसंहारमुखेन अन्यच्च इत्यस्य कृते शर्ममञ्जुलतया उक्तेन वचनेन सर्वेषामेतेषां कालजयिनीनां कृतिनां कृते स्ववचनमाविष्करोमि तावत्

> अतः अन्यच्च परम्पराओं को बताने की गाथा है, शास्त्रों को पहुँचाने का प्रयास
> है और विज्ञान को सिद्ध करने की प्रयोगशाला है। यह एक ऐसा विलक्षण

[97] पृ॰ ८, सरस्वतीसौरभम्, १-२, उपर्युक्तम्। [98] पृ॰ २१२, अन्यच्च, उपर्युक्तम्। [99] उत्तमकाव्यलक्षणम्,प्रथमाननम्,रसगङ्गाधरः। [100] अभिनवकाव्यालङ्कारसूत्रम्, सू॰ ३.१.१३., उपर्युक्तम्। [101] पृ॰ ६५, मूको॰, उपर्युक्तम्।

उपन्यास है जिसने अपनी प्रस्तुति से संस्कृत उपन्यासों के मध्य एक दीर्घ रेखा खींच दी है अब हम सिर्फ दूसरी रेखा का इन्तजार कर सकते हैं।"[102]

सत्यमेव एस्°एल्° भैरप्पस्य सार्थ-धर्मश्री-आवरणादि-कन्नडोपन्यासान्, मनोजदासस्य अमृतफलम्, प्रतिभारायस्य याज्ञसेन्यादीन् ओडियोपन्यासान् विहाय प्रान्तीयभाषायामपि सर्वगुणसम्पन्नोपन्यासानामभावो लक्ष्यते किं पुनः संस्कृते। अन्यच्च उपन्यासः तथाविध उपन्यासो वर्तते, यः शिवराजविजयेन समारब्धस्य संस्कृतोपन्याससाम्राज्यस्य अवसानं संसूचयन् अभिनवकालस्य वैश्विकफलके नित्यनूतनोपन्याससाम्राजस्य अयमारम्भं विदधाति।

[102] पृ° २५, सरस्वतीसौरभम्, १-२, उपर्युक्तम्।

# आधुनिकसंस्कृतकवितायाम् इन्द्रियग्राह्यता-इन्द्रियव्यत्ययश्च
## (डॉ. हर्षदेव माधवः)

वाचकाः सामान्यरूपेण काव्यपठनं मूकभावेन कुर्वन्ति। काव्यस्य गानं वा उच्चैः पठनमकृत्वा ओष्ठकम्पं विना काव्यं वाचयन्ति ते। मुद्रणयन्त्रस्य आविष्कारेण सह काव्यानि मुद्रितानि जातानि, काव्यास्वादकला चक्षुर्गम्यकलेव जाता, किन्तु पुरातनकाले काव्यस्य पाठो भवति स्म। सभायां कवयः उच्चैः पठन्ति स्म। अतः काव्यपठनकला श्रुतिगम्यकला वर्तत इति विस्मृतं विद्वद्भिः। वस्तुतः श्रुतपूर्वाः शब्दाः कर्णौ नेत्राभ्यां समर्पयतः, नेत्रे हृदयाय मनसे च समर्पयतः। अतः काव्यपठनं दृश्यं च श्राव्यं च वर्तते।

काव्ये तीव्र-कोमल-स्वराः, कठोर-मृदु-व्यञ्जनानि, स्वरव्यञ्जनसङ्कुलनम्, लयस्य आरोहावरोहौ, लयस्य द्रुतविलम्बित-गतिः, स्वरभारः, विरामचिह्नानि, नादसङ्कुलता, नादाभावे मौनम् - एनत् सर्वं श्रुतिग्राह्यं वर्तते।[1]

कविता त्रिगुणात्मिका कला वर्तते। तस्यास्त्रयो गुणाः - आकृतिः, नादः, अर्थः इत्येते वर्तन्ते। मुद्रणकलाप्रयुक्त्या आकृतिवैशिष्ट्यं जायते। प्राचीनकाव्येषु बन्धरचनानिर्मितानि चित्रकाव्यानि आकृतिवैशिष्ट्यं सृजन्ति। छन्दोबद्धरचनासु नादसौन्दर्यमायाति। अर्थातिरेकयुक्तेषु ध्वनिकाव्येषु आकृति-नादयोरुपेक्षा क्रियते।

आधुनिकविश्वकवितायाम् आकृतेर्महिमा वर्तते।

चीनदेशस्य 'आइडीओग्राम्', युरोपस्य 'एब्लेम' 'केलिग्राम' ग्रीकदेशस्य 'टेकनापीगीना' लेटिनभाषायाः 'फीग्युरेटम' जर्मनदेशस्य 'बील्द्देदिश्ट'इत्यादीनां विधानां काव्यानि प्रसिद्धानि। दोसीआदीस 'पुटेनहाम' 'एल्सीआती' 'क्लोर्ल्स' 'वीधर' 'मारीनेत्ती' 'आपोलीनेर' 'डीलन् टॉमस'इत्यादिभिः कविभिः 'वेदी'-'कुठार'-'अण्ड'-'क्रोस'-

[1] निरञ्जनभगत 'स्वाध्यायलोक - २' 'कवि अने कविता' गुर्जरग्रन्थरत्नकार्यालयः, अमदावादम् १९९७, पृ० १५०, तत्रैव पृ० १५१।

'मद्यपात्र'-'पुच्छ'-'हीरक'-'वर्षाधारा'-'शववाहिनी'-'शय्या'-'तारक'-इत्यादीनामाकृतिषु काव्यानि रचितानि सन्ति।[2]

आधुनिककवितायां बिम्बानां प्राधान्यं वर्तते।

या वस्तुनः पदार्थस्य वा ऐन्द्रियभावान् जागरयति तादृशी अभिव्यक्तिरेव बिम्बमस्ति। मूलोद्दीपनाभावे पूर्वेन्द्रियजन्यावबोधस्य पूर्णतः वा अंशतः पुनर्निर्माणकर्त्री सचेतना स्मृतिः अर्थात् बिम्बम्। इन्द्रियानुभूतिबोधकः शब्दो बिम्बमस्ति।[3]

## चित्रात्मकता

काव्यानुभूतिं प्रत्यक्षां कारयितुं कविवाचश्चित्रात्मकता आवश्यका। अत एव बिम्बे दृश्यरूपताया महत्त्वं स्वीक्रियते। बिम्बेन कविः स्वानुभूत्यै चित्रात्मकशब्दरूपं ददाति। समग्रज्ञानम् इन्द्रियानुभवजन्यमस्ति। अत एव कविर्यद्यत् पश्यति तस्य प्रभावो ज्ञानेन्द्रियग्राह्यो भवति। तेन प्रभावेन मनसि चित्राणि सृज्यन्ते। तेभ्यश्चित्रेभ्यो बिम्ब-विचार-तरङ्ग-कल्पनाः विकसन्ति।[4]

बिम्बं तत्क्षणमेव जातानुभूतिरस्ति यस्य कृते स्थलकालबन्धनानि न सन्ति। बिम्बस्य गाढसम्बन्धो दृश्यसंवेदनेन सह वर्तते।[5]

## मूर्तता

बिम्बं मूर्तं (concrete) भवेत्। अमूर्तं वस्तु बिम्बेन मूर्तं भवति। अनुभूतिरित्थं मूर्ततां भजते। बिम्बस्य विषयो मूर्तो वा अमूर्तो वा भवेत्। बिम्बनिरूपणेन वस्तु इन्द्रियग्राह्यं भवति। कविः अमूर्तविषयस्य निरूपणं मूर्तरूपेण करोत्यतः कविप्रतिभावशात् प्रत्यक्षीभवति अमूर्तं वस्तु।[6]

[2] 'स्वाध्यायलोक' १, पृ० १६१। तत्रैव पृ० १५३। [3] *Dictionary of World Literary Terms.* Ed. Joseph J. Shipley, p. 156. *Encyclopedia Britannica*, vol. 12, p. 103. Robin Skelton : *The Poetic Image*, p. 90 ; Susan K. Langer : *Feeling and Form*, p. 48. [4] यशवंत त्रिवेदी 'काव्यनी परिभाषा' आर्० आर्० शेठनी कंपनी, मुम्बई १९७८, पृ० ९१। [5] डॉ० मधुभाई कोठारी 'आधुनिक कवितानो चहेरो' शब्दलोक प्रकाशन्, अमदावाद् २००६, पृ० ५२। [6] नीतिन वडगामा 'कल्पन : विभावना अने विनियोग' युनि० ग्रन्थनिर्माण बोर्ड, अमदावाद् १९९३, पृ० १२।

### इन्द्रियग्राह्यता

काव्यबिम्बं नास्ति शब्दचित्रं, किन्तु इन्द्रियग्राह्यता अनुभूतिं मूर्तां करोति। मनसा सर्वेन्द्रियाणां सम्बन्धो वर्तते। ऐन्द्रियसंवेदनाग्राह्यबिम्बानि प्राण-युक्ताणि सजीवानि प्रभावकानि च भवन्ति। दृश्यं, श्राव्यम्, आघ्रेयं, स्पर्श्यं, रस्यं वा सर्वेन्द्रियग्राह्यां बिम्बं कलात्मकतया चमत्कृतिं जनयति।[7]

आचार्यरहसविहारी मन्यते यत् -

काव्यसृष्टिक्षणे कर्तुश्चित्ते नानानुभूतयः।
कल्पनामधिरोहन्त्यो वैखरीव्यक्तिबिम्बिताः॥
भावकेन्द्रियसंस्कारात् ता भावावेष्टितास्तथा।
प्रत्यक्षमिव दृश्यन्ते काव्यबिम्बः स कथ्यते॥
स बाह्याभ्यन्तराभ्यां च करणाभ्यां द्विधा मतः।
बाह्ये दृश्यं ध्वनिः स्पर्शो गन्धास्वादौ च पञ्चधा॥
आभ्यन्तरे स्थितो भावः, प्रज्ञां चेति द्विधा कृतः।
प्रत्येकं बहवो भेदाः सङ्करैकलभेदतः॥[8]

आचार्यो राधवल्लभो मन्यते 'यत् साक्षात् क्रियते तद् भवति मूर्तिमत् बि-म्बात्मकं वा। स भामहस्य मतानुसारं वर्णनीयस्य अर्थस्य चित्रता, उदा-त्तता, विस्मयावहता कथाया नाट्यात्मकता शब्दानाम् अनाकुलता इति तत्त्वानि स्वीकुरुते। वस्तुतः साक्ष्यालङ्कार एव काव्यबिम्ब इति तस्य नि-रूपणं वर्तते। तेन बिम्बस्य नादात्मकता स्वीकृता, किन्तु काव्यबिम्बे प-ञ्चेन्द्रियाग्राह्यताविषये न किञ्चिदुक्तम्।[9]

### बिम्बानां पञ्चेन्द्रियग्राह्यता

दृश्यबिम्बं यथा

श्यामश्वेतकपोतभासि मसृणैस्तोयार्धरिक्तैर्घनै-

[7] तत्रैव पृ॰ २३। [8] आचार्य रहसविहारी द्विवेदी 'नव्यकाव्यतत्त्वविमर्शः' दूर्वा द्वितीयोन्मेषः अप्रैल्-जुन् २००५, पृ॰ ९५। [9] आचार्य राधावल्लभः 'आधुनिकसंस्कृतकवितायां बिम्बवि-धानम्' सागरिका ३७।१-२। (वि॰ सं॰ २०००), पृ॰ १३७-१४५।

वर्णामिश्रणशेषलक्ष्मसदृशैः पात्रे दिगन्तात्मके।
रक्तादिप्रवरान् निदाघनिशितानुद्रिक्ततेजस्विनो
मेने प्रावुडपास्य चित्रकरणे छायाप्रभेदानलम्॥[10]

अत्र वर्षासमयस्य विविधवर्णसृष्टिः, अर्धरिक्तपयोदानां दर्शनं, दिगन्तात्मकं पात्रम् - इत्यादि चाक्षुषं बिम्बं भवति।

भेडः शिखरे।
शैलरुग्णशरीरे
श्वित्रलाञ्छनम्॥[11]

अत्र भेडस्य श्वेतवर्णः, श्वित्रलाञ्छनस्य श्वेतवर्णः, रुग्णस्य श्यामशरीरं, पर्वतस्य श्यामवर्णः शिखरस्य मुखेन साम्यम् - एतत् सर्वं चक्षुर्गम्यं बिम्बं सृजति।

श्राव्यबिम्बं यथा

घूघूकारेण।
कपोतानां प्रपूर्णा
निर्जना वाणी॥[12]

अत्र 'जलविहीना, निर्जने वने स्थिता वापी कपोतानां घूघूकारेण पूर्णा'इति कपोतनादो जलाभावं पूरयतीति श्राव्यबिम्बं वर्तते।

छपत्छपत् प्रकुर्वन्ति इमे धावन्ति बालकाः।
नूनं कुतकुतं तेन धरादेहे प्रजायते॥[13]

अत्र बालकचरणानां शब्दः, तेषां चरणाघातेन पृथिव्या देहे कुतकुतानुभवः - श्राव्यबिम्बं जनयति।

[10] गोविन्दचन्द्रपाण्डेयः 'भागीरथी' राका प्रकाशन्, इलाहाबादम् २००२, पृ॰ ६१। [11] हर्षदेवमाधवः 'ऋषेः क्षुब्धे चेतसि' श्रीवाणी अकादमी - अमदावाद २००४, पृ॰ ९। [12] 'ऋषेः क्षुब्धे चेतसि', पृ॰ ८। [13] डॉ राधावल्लभ त्रिपाठी 'सन्धानम्, सागरम् १९५५, पृ॰ ८५७।

पक्षप्रहारैश्चञ्चुश्लेषैः गुटरगुटरगूँकारैः
मानैरनुधावनैरथो मदनाज्ञापालनचारैः।
द्वाभ्यां तथा तृतीयस्योत्सारणैर्यत्र सव्यूहः
अश्मभ्योऽपि हि प्रेमकलामुपदिशति कपोतसमूहः॥[14]

अत्र 'गुटरगुटर' ध्वनिः, पक्षसञ्चारः, उत्सारणशब्दः, धावनशब्दः-इत्यादीनां नादवैभवं श्राव्यबिम्बं रचयति।

आघ्रेयं बिम्बं यथा

पारिजातकम्।
त्वया सह यापिताः
काश्चिद् यामिन्यः॥[15]

अत्र प्रियया सह यापितानां यामिनीनां स्मृतयः पारिजातस्य दर्शनाद् भवन्ति। प्रियतमायाः प्रणयः पारिजातमसृणोऽस्ति। पारिजातं दिव्यं प्रसूनमिति प्रसिद्धमतः प्रणयेऽपि अलौकिकता गम्यते। पुष्पं नश्यति, किन्तु गन्धोऽविनाशी तथैव प्रणयोऽपि। प्रियतमापि पारिजातकोमला भवेत्।

सद्यः सीरसमुत्कृष्टा सुरभिं भूरिशश्च भूः।
लावण्यामृतसम्पृक्ता ललनेव विमुञ्चति॥[16]

अत्र भूमेः सौन्दर्यानुभूतिः गन्धेन भवति।

रस्यं-रसेन्द्रियग्राह्यं बिम्बं यथा -

प्रत्यग्रारक्तताम्रान् मधुररसभृतः किञ्चिदम्लत्वलेशान्
बाष्पोत्तप्तान् म्रदिम्ना सहजधृतियुजा स्वादशाबल्यभाजः।
सेवानासेवमानाः शिशिरधवलतां काचवातायनेभ्यः
बाह्योद्याने सुपिष्टां शिशिरकरतनुं दृष्टवन्तो नु कीर्णाम्॥[17]

[14] डॉ रमाकान्तशुक्लः 'सर्वशुक्लोत्तरा', देववाणीपरिषत्, दिल्ली २००४, पृ० १६। [15] 'ऋषेः क्षुब्धे चेतसि', पृ० १५। [16] डॉ राधावल्लभ त्रिपाठी 'लहरीदशकम्, संस्कृतपरिषत्, सागर १९९१, पृ० १४। [17] भागीरथी, पृ० १५६।

अत्र बाष्पोत्तप्तानि सेवफलानि, तेषां मृदुता, चन्द्रमसः चन्द्रिकाचूर्णं, सेवफलानां मधुराम्लत्वमयः स्वादः इत्यत्र रस्यं बिम्बं भवति।

स्पर्शेन्द्रियग्राह्यं स्पर्श्यं बिम्बं यथा

चिक्काणाऽसौ चिरिण्टी चकाशे यथा।
चित्रलेखार्पिता मान्मथी पुत्तली॥
दुष्टान्धकारः
श्यामभुजेन
ब्रह्मचारिणीं वाणीमाश्लिषति।

**बिम्बस्य मनोग्राह्यता**

पाश्चात्यविवेचकाः बिम्बस्य पञ्चेन्द्रियग्राह्यतामेव स्वीकुर्वन्ति। किन्तु मन उभयेन्द्रियमस्ति। अतः जनोऽयं बिम्बस्य मनोग्राह्यतामपि स्वीकुरुते। प्रतिभाशीलः कविः पञ्चेन्द्रियग्राह्यपदार्थानां रूपान्तरं मनोभावेषु करोति तदा मूर्तिविषयो मनोग्राह्यो भवति। मनोग्राह्योपमानेन अप्रस्तुतेन वा साधर्म्यवशान् मनोग्राह्यबिम्बस्य रचना शक्या। तथैव अमूर्तविषयो मूर्तप्रस्तुतेन ग्राह्यो भवति। यथा

पावकं प्रज्वाल्य
संन्यासी
स्वस्मृतीः प्रज्वालयति॥[18]
विक्षिप्तदीनतासु च
चीत्करोति
शैलकल्पक्षुधा॥[19]
जनसम्मर्दः
परामृशन्ति जात्माः
प्रेयसीं शान्तिम्॥[20]

[18] हर्षदेवमाधवः 'कणणक्या क्षिप्तं माणिक्यनूपुरम्', श्रीवाणीअकदेमी, अमदावादम् १९९९, पृ० ५४। [19] केशवचन्द्रदाशः 'ईशा', पृ० ४। [20] 'ऋषेः क्षुब्धे चेतसि', पृ० ५३।

### **इन्द्रियव्यत्ययः** (Synaesthesia)

यदा काव्यसंवेदनानि नैकेन्द्रियाणां युगपद् भवन्ति तदा एकेन्द्रियप्रत्यक्षः पदार्थः अन्येन्द्रियग्राह्योऽपि भवति। कदाचिद् एकेन्द्रियस्य कार्यम् अन्यद् करोतीति कविना कल्प्यते तदा 'इन्द्रियव्यत्ययः'इति परिभाषा प्रयुज्यते।[21]

खगः पिबति
चन्द्रिकाम्। सूर्यातपं
निकामम् अत्ति॥[22]

अत्र चन्द्रिकासूर्यातपौ नेत्रग्राह्यौ, किन्तु योगसाधकाय तौ रसनेन्द्रियग्राह्याविति सूच्यते।

चन्द्रिका मृगीं
मृगं कण्डूयते तं
व्याधाक्षि पृष्ठे॥[23]

अत्र व्याधाक्षि कण्डूयनकर्म करोति। चन्द्रिकायां मृगः प्रणयावेगयुक्तो जातः। व्याधः तं हन्तुमिच्छति अतः तीक्ष्णदृष्ट्या तं पश्यतीति भावः।

क्षणमुदिता मदयन्ति स्मृतयः स्वजनस्य दूरसंस्थस्य।
वाग्वासः परिधाय स्फुरन्ति चैताः सुवर्णमयम्॥[24]

अत्र स्मृतयो मदयन्ति - मदिरायन्ते - रसेन्द्रियग्राह्यास्ता एव सुवर्णमयं वाग्वासं परिधाय स्फुरन्ति - मूर्ता इव भवन्तीति वाचश्चक्षुगम्यतापि लक्ष्यते।

दीपशिखाचुम्बनरागे

[21] सं॰ चन्द्रकान्त टोपीवाला, परेश नायक, हर्षवदन त्रिवेदी 'अधुनिक साहित्यसंज्ञाकोश' गुजराती साहित्य परिषद्, अमादावादम् १९८६, पृ॰ २४१ [22] ऋषेः क्षुब्धे चेतसि', पृ॰ ५१। [23] 'ऋषेः क्षुब्धे चेतसि', पृ॰ ५०। [24] जगन्नाथपाठकः 'आर्यासहस्रारामम्' गङ्गानाथ झा संस्कृत विद्यापीठ, इलाहाबादम् १९९५, पृ॰ ३६।

समरसाऽभवत्
तुलसीच्छाया॥[25]
प्रकाशे
प्रज्वलन्ति किंशुकानां वनानि
उताहो
द्रवीभवन्ति रूपाण्यप्सरसाम्।[26]

इत्थं आधुनिकसंस्कृतकाव्यरचनासु इन्द्रियग्राह्यता इन्द्रियव्यत्ययश्च चमत्कृतिं सृजतः।

[25] 'ईशा', पृ॰ ४३। [26] हर्षदेवमाधवः 'सुधासिन्धोर्मध्ये' श्रीवाणी अकादमी, चांदखेडा २००२, पृ॰ १०।

## Guruvāyupureśamāhātmyam – A Study (*Premalatha V. V.*)

The *Guruvāyupureśamāhātmyam*[1] is a campūkāvyam written by Prof. A. V. Sankaran (1925–2000), a versatile Sanskrit scholar who flourished in Kerala in the 20th century. As a prolific writer both in Sanskrit and Malayalam, he has to his credit more than 30 works. His magnum opus is *Tīrthapādapurāṇam*, a Sanskrit kāvyam written in purāṇam style concerning the life history of Chattampi Swamikal[2] in around 63,000 verses in Anuṣṭup metre.

Born in 1925, in a Warrier family in Palakkad District, through 76 years of his meaningful and gracious life he enriched the Sanskrit Literature with his exquisite and elegant works graced with a beauty that showed his erudition and fluency in the Sanskrit Language. He has touched almost all sections of Sanskrit Literature, such as purāṇam, khaṇḍakāvyam, campūkāvyam, nāṭakam and stotrakāvyam. *Guruvāyupureśamāhātmyam* is the second campūkāvyam of the author, the first one being *Maṇikaṇṭhīyam* which delineates the story of Maṇikaṇṭha or Ayyappa, the deity enshrined in Śabarīmālā.

### Campu literature

Campūkāvyams in Sanskrit literature have a unique style of narration, intermingling both prose and poetry. Daṇḍin, an exponent of alaṅkāraśāstram, in his book entitled *Kāvyādarśaḥ* has defined campūkāvyam as *gadyapadyamayī kācic campūr ity abhidhīyate* (1.31).

Even though a style of narration that intermingles prose and poetry has been familiar since the Vedic period itself, this cannot be included in the campū type of kāvyas. The prose in campūkāvyam is rhythmic in narration, abounding in alamkārās, heavy with Anuprāsās, filled with melodious words and written in a style which abounds in long compounds. The verses in campūkāvyas are usually aesthetic and elegant. This type of creation of kāvyas shows the author's caliber and command over the language in narration of both prose and poetry.

[1] A.V. Sankaran: *Guruvayupuresa Mahatmyam.* Guruvayur: Guruvayur Devaswom 2000. [2] On whom, see Raman Nair Raghavan and Sulochana Devi Laxmi: *Chattampi Swami: An Intellectual Biography.* Trivandrum: Chattampi Swami Archive, Centre for South Indian Studies 2010.

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः।
हृद्या हि वाद्यकलया कलितेव गीतिः॥[3]

Bhoja, author of *Rāmāyaṇacampūḥ* remarks that the graceful prose mingled with poetry is as sweet as music with all its accompaniments. Campūkāvyas are of later origin of around 10th century, and this type of narration flourished especially in South India. The temple art form called cākyārkūttu,[4] which originated in Kerala, with the style of presenting stories in an interesting manner by mixing devotion, satire etc. used campūkāvyas for their performance. These campūkāvyas are commonly called prabandhās.

## Guruvāyupureśamāhātmyam

Guruvāyupureśamāhātmyam is the last published work of its author. This campūkāvyam, also known by the name prabandha, can be used for the performance within the temple art form prevalent in Kerala, cākyārkūttu. The content of the book is a story taken from *Nāradīyapurāṇam* extolling the māhātmyam of Śrīguruvāyūrappa, the deity enshrined in Guruvāyūr, which is also famous by the name Bhūlokavaikuṇṭham.

The book was published by Guruvāyūr Devasvam and in the introduction of the book the publishers express their gratitude to the author for adding one more feather to the māhātmyam of Śrīguruvāyūrappa.

## Content of the campūkāvyam

The Pāṇḍavas, having accomplished the duties of their long and meaningful lives, retired after enthroning their heir King Parikṣit, and, completing their mahāprasthāna, reached Heaven. King Parikṣit who was as mighty as his forefathers ruled the kingdom well. One day, while hunting in the forest, he happened to see a dead snake and tied it round the neck of an old sage sitting there in deep meditation. On seeing this vulgar deed, the son of the sage cursed the king to die of snake bite within seven days. The curse came to pass in due course and the king died by the bite of the snake Takṣaka.

[3] *Ramayana Champu of Bhoja.* Chapter 1. Edited by Pandit Ramnath, Varanasi: Amarabharati 1979, verse 3ab. [4] See, for instance, *Natyakalpadruma by Padmasree.* Manimadhava Chakyar. Vallathol Nagar, Cheruthuruthi: Kerala Kala Mandalam.

Janamejaya, the son of King Parikṣit who succeeded him on the throne, decided to take revenge and for that purpose started a sarpayajña in which thousands of serpants were burnt in the sacrificial fire. When the turn came for Takṣaka, he took refuge in Indra. The priests conducting the sarpayajña, in turn, decided to charm Takṣaka along with Indra with the power of mantras. In mortal fear Indra took refuge at the feet of his preceptor Bṛhaspati, who, in turn, appeared before Janamejaya and advised him to put an end to the sarpayajña.

The continuation of this story from this point is where the content of *Guruvāyupureśamāhātmyam* starts.

By the advice of sage Bṛhaspati, Janamejaya stopped the sarpayajña. Even though the king eventually saved himself from the sin of killing thousands of innocent serpents, he became the victim of the dreadful disease of leprosy as a result of his other sinful deeds. The golden lustre of his body disappeared and he became tarnished by the disease. He went through so many treatments, but all in vain. He spent his days in remorse cursing himself.

Once a sage named Ātreya happened to visit the kingdom and on perceiving the affliction of the king he was deeply moved. The sage advised him to go to the Guruvāyūr Temple in Kerala and worship the deity Śrīkṛṣṇa with great devotion. Then, on the request of the king, Ātreya tells the story of the idol dwelling in the temple which was consecrated by the Devaguru and Vāyu.

A couple named Sutapas and Pṛṣṇi worshipped Lord Brahman for a long time and pleased with their penance Brahman blessed them with a divine idol of Viṣṇu. They received the idol with great delight and worshipped Lord Viṣṇu longing for a son with all virtues. Pleased with their unparalleled devotion Viṣṇu, appeared before them and immersed them in an ocean of joy by revealing that he himself will incarnate as their son, not once but thrice for the benefit of the world.

His first birth as the son of Sutapas and Pṛṣṇi was as Pṛṣṇigarbha, a famous scholar, who was the preceptor of the Sanakas. In the next birth Sutapas became Kaśyapa and Pṛṣṇi became Aditi. Viṣṇu incarnated as Vāmana. In this birth also the same idol of Viṣṇu was handed over to the couple and they worshipped the idol with great devotion. In the next birth Kaśyapa and Aditi took birth as Vasudeva and Devakī and Lord Viṣṇu incarnated as Lord Kṛṣṇa, the essence of all kinds of virtues. The same

idol of Lord Viṣṇu was handed over to them in this birth also and Kṛṣṇa consecrated the idol in a divine temple in Dvārakā for the benefit of the entire world.

Bhagavān Kṛṣṇa, after completing his life in incarnation (*avatārakarma*) was planning to go back to Vaikuṇṭha, his original abode. The Yādavas or the subjects of Dvārakā were ruining themselves by their own pride and cruel deeds. One day, some sages arrived at Dvārakā in order to express their devotional salutations to Bhagavān Kṛṣṇa who is actually Brahman personified. The Yādava youths, ever full of tricks approached the sages with Kṛṣṇa's grandson Sāmba dressed up as a woman.

The youths asked the sages the sex of the baby the woman would give birth to, a boy or a girl. The sages got angry with their impudence and cursed them that the lady would deliver an iron rod which would ruin the whole dynasty of the Yādavas.

The Yādava youths became perplexed and they examined the body of Sāmba eagerly. They saw a small piece of iron pressed to the thigh of Sāmba. The frightened Yādavas informed Ugrasena of all that had happened. By his advice they ground the iron rod into powder and threw it into the sea along with the last piece of iron.

In due course of time, the powdered iron was washed back on to the seashore and there they grew up into reeds with sharp edges. The drunk Yādava youths eventually fought against each other with these sharp reeds and killed themselves. The last piece of iron was swallowed by a fish and reached the hands of a hunter who in turn made it into an arrow head. Bhagavān Kṛṣṇa was sitting under a Pippal tree and the hunter who mistook the foot of Kṛṣṇa as the face of a deer shot the arrow at it. On seeing what had happened the hunter lamented his mistake. Bhagavān Kṛṣṇa comforted the hunter and went back to his abode Vaikuṇṭha as he had accomplished all the duties of his avatāra. Then Dvāraka was engulfed by sea and that marked the end of Yadu dynasty.

As instructed by Kṛṣṇa earlier, Uddhava recovered the idol of Mahāviṣṇu from the ocean and travelled South along with Bṛhaspati (Devaguru) and Vāyudeva searching for a suitable sacred spot to locate the idol. When they reached Kerala they found a lake full of lotus flowers and saw Lord Śiva standing beside it. On Śiva's advice, Guru and Vāyu together enshrined the idol at that place, which became famous by name Guruvāyūr. Later, Viśvakarma, the architect of heaven, built a temple

there. This holy idol has been existing there ever since, conferring blessings to all his devotees who take resort on Him in the form of Bhagavān Kṛṣṇa.

Having narrated the story of the origin of Guruvāyūr Temple to King Janamejaya, Sage Ātreya advised him to go to Guruvāyūr Temple and worship the deity Lord Kṛṣṇa with devotion as a remedy to his dreadful disease. Relieved and hopeful on hearing the advice of Sage Ātreya, the king made arrangements for the journey to Guruvāyūr and reached there as fast as he could along with his retinue.

As soon as he reached the temple he surrendered himself at the lotus feet of Bhagavān Kṛṣṇa. He stayed there, attended every pūja conducted there from morning till night and worshipped the deity wholeheartedly. After a few days Bhagavān appeared in his dreams and conveyed to him that he would be purged of his sins and fully recover from the illness. He blessed the king and instructed him to look after his kingdom well till the end of his life. He also told him that he would merge with the lotus feet of Bhagavān in the end.

The next morning, the king got up from his sleep as a new man. He was completely cured of his disease and his body was shining like gold. Filled with joy and devotion, he extolled Bhagavān with words from his heart. He went back to Hastināpura with his heart filled with devotion to Śrīguruvāyūrappa and ruled his country for the rest of his life with benevolence and prosperity. Here ends the story of Guruvāyupureśamāhātmyam.

In the last verse the author mentions that this book is his offering at the lotus feet of Chattampi Swamikal whom the author considered as Parambhaṭṭārakan and Viśvaguru and worshipped as Bhagavān Kṛṣṇa himself. The author dedicates the book also to P. C. Vasudevan Ilayathu who was his guru in the field of Sanskrit literature. The book was published by Guruvayoor Devaswam on October 2000 posthumously.

The script is in Malayalam and a detailed interpretation of the campūkāvyam, also in Malayalam, has been rendered by the author in order to make the book relishing and easy for the readers. As the title of the book indicates, the work is an definately an additional feather to the glory of Bhagavān Kṛṣṇa of Guruvāyūr Temple.

## Guruvāyupureśamāhātmyam – A true campūkāvyam

In campūkāvyas both prose and poetry have equal importance. The author of a campūkāvyam has the chance to show his caliber both in verse and prose in one kāvyam itself. This is one special aspect of campūkāvyas. He has his freedom to use prose or verse wherever he wants, apt to the situation of his choice in his narration.

In his *Guruvāyupureśamāhātmyam* the author has fully utilized this peculiarity of campūkāvyam in the best possible manner in the narration of the story. There are 52 verses and 15 prose passages in this beautiful campūkāvyam.

## Poetical beauty of verses

The 52 verses in *Guruvāyupureśamāhātmyam* in 9 different metres shine like 52 gems sewn together in a garland. There are 15 verses in Sragdharā, 11 verses in Śārdūlavikrīḍitam, 9 verses in Anuṣṭup, 6 verses in Vasantatilakam, 3 verses in Upajāti, 3 verses in Gītī, 2 verses in Mālinī, 2 verses in Mandākrāntā and one verse in Puṣpitāgrā metre.

The first verse in sragdharā metre itself is a gem of beauty and exemplifies the author's skill in expressing his thoughts in an exemplary style.

आस्तम्बादाविरिञ्चं फलमनुभवति स्वस्वकर्मानुरूपं
सर्वोऽपि प्राणिवर्गो भरत! कुरुकुलक्षेमसौभाग्यसिन्धो!
अश्रेयः कर्मणोऽस्मादहिवनहवनाद्वारयात्मानमेवम्
देवाचार्योपदेशात्सपदि गतरुषः सत्रतोऽसौ व्यरंसीत् ॥

The poet confers the fact to the whole world through the first stanza that from the blade of a grass to the Lord Brahman, the creator, all things in the world have their own natural dharma and everybody is susceptible to undergo the effects of his deeds (*karmaphalam*). Nobody is free from this inevitable law of nature. The author is conveying this moral through Devaguru Bṛhaspati who advises King Janamejaya to retrieve himself from the cruel deed of killing innumerable innocent serpents through sarpayajña, conducted by the king in order to take revenge of his father Parikṣit's death by snake bite.

The verse 11 in sragdharā metre describing the idol in Guruvāyūr Temple will catch much attention among the readers.

यत्रास्ते हन्त भाग्यं धरणितलजुषां मानुषाणां समेषां
पुण्यश्रीविग्रहात्मा शमलपटलिकातूलवातूलतेजाः ।
मुक्तिं भुक्तिं च दित्सन्निजपदयुगलीसक्तलोकाय नित्यं
प्रत्यग्राम्भोदकान्तिप्रचुरिमकमनीयाङ्गसंस्थो मुकुन्दः ॥११॥

The content of the poem is as follows: Bhagavān Kṛṣṇa shines in Guruvāyūr Temple bestowing all kinds of blessings to his devotees and casting away all kinds of sins like the wind casts away cotton.

The words *hanta bhāgyam* recollect the last line of the first poem in *Nārāyaṇīyam* of Melputhur Narayanabhattathiri,[5] *hanta bhāgyaṃ janānāṃ*.[6] This verse extolling the glory (*māhātmyam*) of Śrīguruvāyūrappa excels in beauty and is a classic example of the author's scholarship in the usage of śabdālaṅkāram and arthālaṅkāram in an elegant way.

In the verse 15 the author explains the kindness of God and the importance of bhakti by a maxim.

कठिनतरतपोभिः प्रीणितोऽहं युवाभ्या-
मजनिरपि जनिष्याम्यात्मजत्वेन नूनम् |
त्रिषु जनिषु पितृत्वेनानुगृह्णामि वां किम्
भुवि तु पुनरसाध्यं भक्तिभाजां जनानाम् ॥१५॥

What feats are not possible for those who are deeply immersed in bhakti! Nothing is there in the world which cannot be attained by ardent devotion to God.

Through the 5 verses from 43 to 47 Janamejaya praises Lord Kṛṣṇa of Guruvāyūr Temple on the occasions of the pūjās conducted 5 times in the temple; morning, midnoon, noon, evening, and night calling the deity by name and praying with deep devotion to save him from the dreadful disease. The prayer of the king on the occasion of the pūja at night is noteworthy.

वन्दे भवन्तमजितं जितपञ्चबाणम्
श्रीवासुदेव! कमला खलु तिष्ठते ते |

[5] On this famous author, see M. Krishnamachariar: *History of Classical Sanskrit Literature.* Delhi: Motilal Banarsidass 1989, §173 (p. 254). [6] See *Nārāyaṇīyam. Nārāyaṇabhaṭṭapraṇītam* [...] *Gaṇapatiśāstriṇā saṃśodhitam.* Vārāṇāsī: Bhāratīya Vidyā-Adhyayana Kendra 1992, p. 2.

उल्लाघतार्थमनुगृह्य पदाब्जभृत्यम्
मां दीनमेनमवरोधगृहं विश त्वम् ॥४७॥

After the last pūja at night the God is believed to retire for the night to the harem where Lakṣmī Devī is waiting for her beloved.

The verse 50, which narrates the concluding part of the story is also noteworthy.

तल्पोत्थितो नरपतिर्निजमूर्तिमारा-
दालोक्य रोगरहितां नवकाञ्चनाभाम् |
स्वप्नेनुभूतमिव सर्वममंस्त कुष्ठम्
स्वप्नोपमं जगदिदं हि विवेकभाजाम् ॥५०॥

The king who woke up from bed in the morning was astonished to see his body completely cured of the dreadful disease and shining like gold. The disease and the pain he had undergone felt like a dream to him. The last stanza includes another maxim:

स्वप्नोपमं जगदिदं हि विवेकभाजाम्

For learned people the world itself is a dream. The author tries to convey the real truth of the world through this beautiful and crucial stanza of the verse. By the blessing of Lord Guruvāyūrappan, the king became aware of the real truth of this mundane world—this is the inner meaning of this maxim in this context.

The author has specialised in depicting maxims in his verses and they impart an additional grace to the kāvyam. The lofty ideas and morals found in the verses elevate the dignity of the poems. Please note the following verses.

अपराधः कृतः कश्चिद्धृतात्मसु महात्मसु |
न केवलं स्वनाशाय वंशनाशाय संभवेत् ॥२५॥

The Yādava youths who tried to play tricks on the great sages were cursed by them. The author clarifies the situation by saying that the wrath of great people will affect not only the cursed one but the whole race he

belongs to. By the curse of the sages the whole Yādava dynasty came to ruin. We should not ridicule reverential people but should respect them and seek their blessings.

इच्छा दैवी खलु विजयते शापकृष्टैरिव द्राग्-
वीचीहस्तैस्सकलमपि तन्मौसलं धूलिजालम् |
तीरं नीतं बत जलधिना चैरकत्वेन जातम्
चोद्वर्त्तम् तज्झषकवलितं लुब्धहस्तं प्रपेदे ॥२७॥

Even though the iron rod was ground into powder and thrown into the ocean it was washed back to the sea-shore by the hands of waves. Alas, only the will of Lord happens in this world. Everything in this universe occurs only by the will of the Almighty. Here even the ocean, however mighty, had to obey this inevitable rule and accept the will of the Almighty.

The maxims found in verses 1 and 50 have already been explained. The erudition and versatility of the author in explaining morals may be said to take him to the level of a scholar with spiritual realisation, one who has attained the real truth of life. Only people who are one the transcendental plane can write such maxims which will lead the reader to follow the right path in their lives.

## Poetic beauty of prose

There are 15 prose passages in *Guruvāyupureśamāhātmyam* with varied lengths. Good prose passages in rhythmic long compounds embellished with alaṅkāras impart an indescribable experience to the reader. The prose passages in campūkāvyas usually follow this kind of narration and only illustrious writers with high literary skills can deliver such poetical magic in their works. Hence the famous saying *gadyaṃ kavīnāṃ nikaṣaṃ vadanti.*

Here, in this campūkāvyam, the author has taken every effort to make the prose passages relishing to the reader by śabdālaṅkāras and arthālaṅkāras. Figures of speech like upamā, rūpakam, utprekṣā etc. are abundantly used and give a gracious and glorious effect to the whole kāvyam.

The author has the peculiar caliber of embellishing his prose with pūrṇopamā based on śleṣālaṅkāram. It seems the description of nature found in *Kādambarī* of Bāṇabhaṭṭa has influenced the author much and the author has tried his best to impart a similar experience to the readers who can enjoy the prose in its true sense. His scholarly command over the Sanskrit language can be seen in the following prose passages.

> विरतोऽपि सत्रात् … मुद्रादरिद्रपीडापनीतनिद्रः, सुभद्रगुणमाद्रवतीतनयो जनमेजयः कृष्णसख इव कुचेलः, दुर्वासर इव निष्प्रकाशः, निःस्व इव निस्सुखः, प्रजापतिरिव रसनानियन्त्रितभारतीविलासः, पतिव्रतारत्नमिव परपुरुषदर्शननिवर्त्तितनिजाङ्गयष्टिः … वासरायितनिमेषः, मासायित-वासरः, वत्सरायितमासः, युगायितवत्सरश्च जीवितयात्रां कथं कथमपि निर्वर्त्तयामास ।

In the first prose passage of Guruvāyupureśamāhātmyam the author describes the status of King Janamejaya who has become a victim of the dreadful disease leprosy. Janamejaya (*upameya*) is compared to various things (*upamāna*). For example, in *kṛṣṇasakha iva kucelaḥ*, Janamejaya is compared to Kṛṣṇa who has a friend Kucela. The word Kucela has two different meanings. In the case of Kṛṣṇa, Kucela means his friend Kucela the Brahmin, and in the case of Janamejaya, Kucela means one who has got a celā (cloth) which has become dirty, stained by the blood and puss oozing out of the open wounds of leprosy. In *niḥsvaḥ iva niḥsukhaḥ*, Janamejaya is compared to a poor man. The poor man is so unhappy because of his poverty and in the case of Janamejaya, he is also unhappy because of his poor health.

Like this, King Janamejaya is compared to eight different upamānas by śleṣālaṅkāram. The beauty of the Sanskrit language has been fully exposed by the poet through figures of speech similar to this in almost all prose passages in *Guruvāyupureśamāhātmyam*.

In prose passage number 4, the idol of Mahaviṣṇu presented by Lord Brahman to the couple Sutapas and Pṛṣṇi is depicted by the author in a very aesthetic way. The idol is compared to lightning (*kṣaṇaprabhā-vyūham iva ghanaprakāśāvaham*), Mount Mahāmeru (*mahāmerum iva kalyāṇanilayanam*, citrālaṅkāram (*bāndhaviśeṣam iva sarvatobhadram*), a great kāvya (*prabandhaviśeṣam iva rasātmakam*), Devī Sarasvatī (*vaid-hātraṃ kalatram iva nikhilavibudhalokābhivanditam*), Sun (*pūṣāṇam*

*iva doṣāntakaraṃ padmākṣam*), the spring season (*vasantasamayam iva*), a group of Gandharvas (*gandharvagaṇam iva kalakaṇṭhollasitam*) and the ocean (*apāṃ nidhānam iva suśobhanakramakaram*). The one and the same idol is compared to nine different upamānās based on śleṣālaṅkāram. All the upamānas are the best of their kind.

Moreover *saundaryottarato 'pi sundarataram*, adapted from *Nārāyaṇīyam* of Melputhur impart an additional beauty to this prose which indicates that the idol is the same one dwelling in Guruvāyūr Temple.

In prose passage number eight, the alaṅkāram called virodhābhāsaḥ is introduced by the author at the time of description of Śrīkṛṣṇa whom the sages behold when they reach Dvārakā. A few examples are noted below.

- *nikhilalokapārijātasyāpi apārijātasya* — Though Kṛṣṇa is *pārijāta* (one who bestows everything desired by the people) he is *apārijāta* (one who destroys enemies).
- *apārthasyāpi pārthasakhasya* — Though Kṛṣṇa is *apārtha* (one who need not take anything from anybody) he is *pārthasakha* (one who is the friend of Arjuna).
- *niśceṣṭitasyāpi suceṣṭitajanacittaviṣṭarapraviṣṭasya* — Though he is *niśceṣṭita* (one who is without any activity as he is Parabrahman) he is *suceṣṭita* (one who has taken form and dwells in the hearts of devotees).
- *kṛśodarasyāpi kukṣigatasamastāṇḍabhāṇḍaṃ* Though he is *kṛśodara* (one with a lean stomach) he is *kukṣigata* … (one who bears the whole universe in his stomach).
- *pakṣarahitasyāpi pakṣivaraketanasya* — Though he is *pakṣarahita* (one who is impartial to everybody) he is *pakṣivaraketana* (one who has got the emblem of Garuḍa in his flag).

The alaṅkāra called *mālopamā* can be seen in the same passage mentioned above.

> … सच्चिदानन्दस्वरूपस्य श्रीकृष्णस्य दूरादेव दर्शनेन विस्मृतान्यविचाराः, परिप्रीत्या नन्दनवनीमिव वनीपकाः, माहेयीमिव वत्सकाः, विद्यामिव उद्वणाः गुणाः, मन्त्रमिव मन्त्रार्थाः, प्रभुमिव प्रेष्याः, महायोगिनमिव महनीयसिद्धिविशेषाः, सारसिनीमिव कलहंसाः, परतत्त्वमिव निगमान्तशब्दाः, प्रजेश्व-

रमिव प्रजाः, प्रजापतिमिव सनकादयः, भूतनाथमिव विभूतयः, सवितारमिव गायत्रीपादाः …

When the sages see their master Kṛṣṇa from a distance, they become overwhelmed with joy and they approach Him like refugees to Nandanavana, calves to a cow, virtues to vidyā, meanings to a mantra, employees to an employer, sidhis to a yogi, swans to a lotus-lake, principles of vedānta to Parabrahman, subjects to their king, Sanakas to Brahmadeva, austerities to Parameśvara and the pādās of gāyatrī to the sun.

The beauty of Kerala is described in prose passage thirteen.

… केरकेदारभूताम् धराम्बुधिमध्यगां पिण्डीकृतभुवनसौन्दर्यखण्डैस्तत्र-तत्रपतितैरिव सस्यश्यामलशैलकूटव्रजैर्विराजमानाम्, भारताम्बिकाऽऽपा-दलम्बमानपुष्कलकेशपाशान्तपौष्पपरिष्कारायिताम्, अनवरतकलविरु-तनिरवधिशुकशकुनिगायमानकृष्णगुणनिकायाम्, विमलजलतरंगिणीझ-लझलारवप्रशस्यमानप्रकृतिरामणीयकाम्, केरलधरामच्छपत्यधर्मजाता-वलम्बमहादयहृदयमहोदयोदयमहीपतिमहीयमिति समुदयमानबहुमानः, परिपक्वदाडिमीफलपाटलिम्नि नहिमधाम्नि अपश्चिमगिरिशृङ्गपुनरुत्पतनाय पतति पश्चिमसरस्वति हरिवृताम् अपरामिव द्वारावतीं पुरुविनयप्रसरपुरु-हूतप्रमुखसुरजाताभिवन्द्याम् गुरुपवनपुरीं कच्चरमण्डलककच्छुराङ्गो राजा कण्डकिताङ्गः प्रविवेश।

King Janamejaya with his retinue reaches Kerala to worship Guruvāyūrappan. The greenery of Kerala, inlcluding the mountains, valleys and rivers impart mental happiness to him and he arrives at Guruvāyūr as if he has entered Dvārakā. The brilliant description of the natural beauty of Kerala takes the reader to himself perceiving a scenery or a panoramic picture so wonderful that it confers the feeling of having a sumptuous feast.

The last prose passage (No. 15) is spoken by King Janamejaya, who here with great devotion extols the deity in Guruvāyūr Temple on the complete cure of his disease. This forms the concluding part of the story, and is written in the daṇḍaka style. The *Śyāmaladaṇḍakam* of Mahākavi Kālidāsa has influenced the poet in writing this daṇḍaka. For example:

... मणिखचितपुरटमयकोटीरकेयूरमञ्जीरकाञ्चीगुणश्रेणिवलयाङ्गुलीयादि-भूषाविलासिन् ! आनीलसुषमभरकर्णान्तविश्रान्तपतितानुकम्पार्द्रनेत्रयुग-लिन् !

This passage itself is a stotrakāvyam which is beautified by śabdālaṅkāram and arthālaṅkāram intermingled in an aesthetic manner. The skill of the author in depicting lofty ideas in simple but gracious style reveals his sublime sensibility and profound scholarship in the usage of the Sanskrit language.

With the author's lucid commentary in Malayalam, which explains the rhetorical peculiarities and the inner meanings of some difficult words, which aids in a performance true to the author's spirit, this campūkāvyam is suitable for the performance of cākyārkūttu, a famous temple art form of Kerala, and has been performed twice.

The main rasa of this kāvyam is definitely bhakti and the author does not eschew the opportunity to show his devotion to Lord Guruvāyūrappan. It is beyond doubt that this campūkāvyam adds another golden feather to the literary career of A. V. Sankaran, the author, and the devotional fervor which pervades every nook and corner of the kāvyam makes it a devotional campūkāvyam in its true sense.

## आधुनिकसंस्कृतकवितायां बिम्बविधानम् (डॉ. मञ्जुलताशर्मा)

नवकविता वैविध्यमयं जीवनं प्रति आत्मवत्या व्यक्तेः प्रतिक्रियास्ति। अस्यां व्यक्तिं समाजं च उभयमपि मापयितुं सामर्थ्यं वर्तते। कामम्, एषा शास्त्रीयलक्षणानां पूर्णाऽनुगामिनी न स्वीक्रियेत, परमिदं निश्चितं यदस्याः कथोपकथनं कवेश्च नूतना आत्मानुभूतिः पाठकान् श्रोतॄन् च बध्नतः। वस्तुतः आधुनिककाव्यस्य अभिव्यक्तिः सम्प्रेषणीयता चेति द्वावपि पक्षौ प्रभावपूर्णौ स्तः। अर्वाचीनकविः स्वलेखनस्य विद्यमानासु मर्यादासु सति च संघर्षे स्वात्मानं प्रत्यस्थापयत्। परिणामतः स परिस्थितिभिः संयुध्य किञ्चन नूतनं लेखितुं संकल्पबद्धोऽस्ति।

नवस्वरूपवत्सु कवितासु कानिचन तादृशान्येव आन्तरिकपरिवर्तनानि सञ्जातानि। तस्मादेव तासां स्वरूपे व्यञ्जनायां च क्रान्तिप्रवर्तकं परिवर्तनमायातम्। अस्माकं चिन्तनं, प्रतीका उपमानानि रसानुभूतिः जीवनं प्रति दृष्टिरिति सर्वं परिवर्तितं वर्तते। परिवर्तनस्य परिदृश्येऽस्मिन् अनुभूतेः सर्वाधिकं यः पक्षः प्रभावितः, सोऽस्ति आधुनिककाव्यस्य बिम्बयोजना। अर्वाचीनसंस्कृतकाव्यं बिम्बस्य परिकल्पनां विनाऽपूर्णमेव। बिम्बः कस्यापि वस्तुनो मानसं रूपमस्ति। तस्य चाक्षुषत्वं तन्नाम तच्चक्षुषा गृहीतं स्यादिति नास्त्यनिवार्यम्। स व्यक्तेः कल्पनायां, स्मृतौ, चेतनायां चोपस्थितो भवति। साहित्यस्य स्रष्टा शब्दानुपयुज्य बिम्बाङ्कनं करोति। स च पाठकस्य चैतन्यवति मनसि अचेतनस्तरे शयानाः संवेदनाः मूर्तिमतीः करोति। पूर्वानुभूतिभिः संचिता एता मूर्तिमत्यः संवेदनाः किंवा मानसप्रतीतय एव बिम्बनाम्ना कथ्यन्ते। ताभिरेव अस्माकं मस्तिष्कस्य नैका शक्तयः (मुखतः स्मृतिः कल्पनाश्च) स्वात्मनः कार्यं संपादयन्ति। इत्थं बिम्बः कवेः अन्तस्तलस्य तत्पुष्पं यस्य परागेषु कल्पनाया वर्णाः प्रतिभाया हिमार्द्रशीकराः, चमत्कारस्य च सुगन्धः सन्ति। आङ्ग्लायां कल्पनाय "इमेज" शब्दः प्राप्यते। अयं "इमेज" एव बिम्बः। आधुनिककाव्यं बिम्बानां परिकल्पनां विना अपूर्णमस्ति। काव्ये बिम्बस्य प्रमुखं कार्यमस्ति भावानां सरलतया,

सहजतया वा सम्प्रेषणम् । परं चिन्तनेन साकं बिम्बानामर्थवत्ताऽपि परिवर्तिता । अद्य बिम्बानवगन्तुं भावकेन सहृदयेन सामयिकवातावरणं च प्रति संवेदनशीलेनापि भाव्यमित्यनिवार्यं मन्यते । यथा बनमालिबिश्वालस्य "प्रियतमायां" मुखोपरि पूर्णिमायाः चन्द्रस्य विधानमकृत्वा अमावास्यायाः चन्द्रो दर्शितः -[1]

त्वन्मुखमण्डले,
कोऽप्युदेति अमावास्यायाः चन्द्रः

यद्यपि पूर्वतनसाहित्ये पूर्णिमायाः चन्द्रो हि सदा प्रियाया मुखमण्डलस्य शोभामातनोति । तथा च यदाऽपि मुखस्य वर्णनं भावेषु समवतीर्णं, तदा कवये पूर्णचन्द्रमस एवानुभूतिर्जाता । अनुभूयते विरहे घोरं तमः संयोगे च पूर्णश्चन्द्रः । परम् अर्वाचीनकविना यस्य बिम्बस्य ग्रहणं कृतं स अमावास्यायाः चन्द्र एव भवितुं अर्हति । अमावस्याया गहनरात्रौ निगूढश्चन्द्रः प्रणयिनो दीर्घं विरहं व्यक्तं करोति । सा कालरात्रिः तमसा केवलं पीडाया अनुभवमेव न कारयति, परं चन्द्रमस उदयस्य प्रतीक्षायां प्रतिपलं मरणं (प्रणयिन्याः दुस्सहं चिरवियोगं) व्यञ्जयति । इत्थं स्पष्टीभवति यत् संस्कृतस्य अर्वाचीनकाव्यधारया आत्मनः पन्थानः परिवर्तिताः । तदीयाया अभिजातीयमानसिकतायां किञ्चित् विपरिणमितम् । आधुनिक्या कवितया नवीनबिम्बानां माध्यमेन अस्या भाषायाः कथ्यं सार्वजनीनं कर्तुं प्रयासः कृतः ।

एतद्वदेव बनमालिबिश्वालस्य एकमिम्बात्मककाव्येषु "वेलेण्टाइन् डे सन्देशः" अपि एकः प्रशस्यः प्रयासः कथयितुं शक्यते । प्रकृतरचनायां प्रायः सर्वाः पङ्क्तयः यूनां युवतीनां हृदयपटलोपरि द्वाराचारं कर्तुं सन्नद्धा दृश्यन्ते ।

प्रियतमे हृदयं ते पयोहिमं किञ्चित्

[1] प्रियतमा, पृ॰ २५ ।

अहमस्मि ज्वालामुखी, कश्चिद्दावानलः । बिभेम्यहमुष्णेन मे
हृदयस्पर्शेण ।
तरलयिष्यति नु क्वचित् । हृदा सह त्वदस्थिपञ्जरः ।[2]

अन्यत्रापि हासस्य अश्रूणां च बिम्बा अत्यन्तं नवीनाः आकर्षकाश्च सन्ति -

उत्फुल्लयोरधरयोस्तव
प्रियतमे यदा हासो झरेत्
तदा मन्ये मदङ्गने झरन्ति पुष्पाणि
झरन्ति चेत् नेत्रयोरश्रूणि
झरन्तीह पक्वानि पत्राणि ।[3]

एकस्मिन् प्रसङ्गेऽन्यस्मिन् कविः प्रेम्णो गङ्गाजलेन मनोगतानां दुर्भावनानां प्रक्षालने नवमेकमर्थं नवं चोपमानं समानयति । अस्मिन् प्रेम्णः पावित्र्येण सह दुर्भावनानां पूर्णतया निरासस्य सङ्केतोऽस्ति ।

एहि एहि प्रिये अद्य
वेलेण्टाइन-डे पालयावः
प्रीतिगङ्गाजलेन च
मनोगताः दुर्भावनाः सर्वाः क्षालयावः[4]

इत्थं बिम्बयोजना शब्दानां तादृक् ऐन्द्रिकं चित्रमस्ति, यद् मानवीयैर्भावैः संवेगैश्चानुप्राणितं भवति । शाब्दिकचित्राणि इमानि लोकव्यवहृतानि ह्येव प्रभावीनि भवन्ति । यदि चित्रमिदं केवलं कवेः अनुभूतेः स्तरस्यैव, तर्हि तत् पाठकानां श्रोतॄणां च हृदयं स्प्रष्टुं न क्षमते । यथा हर्षदेवमाधवस्य "लॉसएन्जलिस ओलम्पिक समारोहः" "कोलरडोप्रदेशे प्रस्तरमयाः शैलाः" उत्तरध्रुवप्रदेशः इत्यादिकवितानां बिम्बा अनुपभुक्तत्वाद् अप्रभाविनः प्रतीता भवन्ति ।

[2] वेलेण्टाइन डे सन्देशः, पृ॰ १२।९। [3] तत्रैव ३४।७४। [4] तत्रैव ५३।१०२।

इदमपि तेन सहानिवार्यं तत्त्वं यदेते बिम्बा विषयानुकूलाः स्युः । ये बिम्बाः केवलं अलङ्करणाय प्रयुज्यन्ते, ते काव्यं निष्प्राणं कुर्वन्ति, नीरसयन्ति च । क्वचिदेते दृश्यकल्पनस्य रूपे भवन्ति क्वचित् स्पृश्यकल्पनस्य स्वरूपे । गीतविधायां बिम्बविधानं शिल्पस्य नवीनतायाः समायोजनं च माताप्रसादत्रिपाठिनां रचनासु द्रष्टुं शक्यते ।

केशवचन्द्रेण मुक्तछन्दसि कविता लिखिताः । तासु आधुनिकजीवनस्य विसङ्गतीनां परम्परा-आधुनिकतयोर्द्वन्दस्य, ग्रामस्य निष्कलुषस्मृतीनां जटिलानां प्रतीकानां बिम्बानां च अद्भुतः प्रयोगो दृश्यते

> निधिभवनस्य / अलिन्दे यथा / श्रूयते भौतिकतास्वरः / विक्षिप्तदीनतासु च / चीत्करोति / शैलकल्पक्षुधा / कमहं श्रावयिष्यामि / प्रसूतिकाव्यथां मम ?[5]

अत्र भौतिकसंस्कृतेः विकृतिः वर्णिता । दीनानां विलापः क्षुधाया विकरालं व्यापकं रूपं च प्रसवपीडावदेव कष्टकारि वर्तते । अत्र प्रसवस्य पीडाया असह्यता, वैभवं प्रति तिरस्कारश्च कवेर्नवीनबिम्बग्राहकतां व्यक्तीकरोति । इत्थं हि अन्यत्रापि स्वात्मनो ब्रह्मानन्दे विलयस्यानुभूतिः चमत्करोति ।

> नाहं निक्षिप्तकन्दुकः / प्रत्यागमिष्यामि / भूतलं संस्पृश्य परमेको /मिमिलिषुः / आषाढस्य बिन्दुः ।[6]

जीवनं कन्दुको नैव, जलस्य बिन्दुरस्ति, यः पतितः पुनर्न निवर्तते । स तु तस्मिन् परमपुरुषे एकाकारो भवति । अत्र जलबिन्दुः य आषाढमासस्य प्रथमा सुखानुभूतिरस्ति ब्रह्मानन्देन समं मोक्षं ध्वनयति । अत्र कवेः आध्यात्मिकं चिन्तनं पूर्णतया प्रस्फुटति ।

महाराजदीनपाण्डेयस्य काव्यबिम्बाः पूर्वनियोजिता न भवन्ति । ते निरायासं तत्काव्यस्य विषयीभवन्ति । यथा मौनवेधकाव्ये कविर्वदति यत् निशस्त्रीकरणसम्मेलने एकतः तृणाग्न्योः क्रीडा भवति, अपरतः सभ्यता

[5] ईशा पृ० ५ । [6] ईशा पृ० १ ।

स्वशिरसि आणविकास्त्राणां पुटकं निधाय नृत्यति। अन्यत्र एकस्मिन् प्रसङ्गे -

> त्वद्यौवनगङ्गाजले
> प्रवक्ष्यामि पत्रं भूत्वा प्रिये
> निःसहायौ पादौ च मे
> न बधान प्रियतमे
> त्वत्पवित्रप्रेमनागपाशे[7]

अत्र यौवनस्य अमूर्तता, गङ्गाजलस्य मूर्तता, स्पर्शास्वादबिम्बोपस्थित्या च अभिव्यक्तता। इत्थं बिश्वालस्य प्रियतमाकाव्ये एकस्यैव बिम्बस्य विविधानि रूपाणि। यानि च पञ्चेन्द्रियग्राह्याणि सन्ति। सहैव सरलानि सहजानि च।

डॉ॰ माधवस्य संस्कृतरचना सम्प्रति विश्वस्तरे काव्यनिर्मितिप्रवृत्तिमादाय निजस्य स्वतोधारायां प्रवर्तते। आधुनिके जीवनसन्दर्भे पुराकल्पानां विपुलः प्रयोगः, सार्थकचित्रकल्पनिर्माणं लघुपरिकल्पमूलकं बौद्धिकं विधानं बिम्बानां प्रयोगः कवेः पुरोगामित्वं वैशिष्ट्यं च प्रतिपादयति।

डॉ॰ हर्षदेवा यदा बिम्बप्रवाहमवतरन्ति, तदा न जाने कियदलभ्यमौक्तिकानां राशिं स्कन्धे निधाय तटमायान्ति। ते बिम्बानां उत्कृष्टा सर्जकाः सन्ति। तेषां विचारोऽस्ति।

> मोनोइमेज एक पहिये की साइकिल चलाने जैसा खतरों से भरा हुआ प्रयोग है। बिम्ब में रूढता नहीं आनी चाहिये। केवल अभिधा बिम्ब की बाधक है।[8]

तेषां बिम्बानां कतिपयानि उदाहरणानि सन्ति

> कृषीवलः / स्वभाग्यं वपति / किन्तु दुर्भाग्यं प्ररोहति।[9]

[7] प्रियतमा पृ॰ ९५। [8] दृक ३, पृ॰ ५२। [9] निष्क्रान्ता सर्वे, पृ॰ १३९।

यथार्थस्त्वयं यद् वप्यते तत् प्राप्यते। परं कृषकस्य दुर्भाग्यमस्ति यत् स परिश्रमपूर्वकं स्वस्वेदकणैः क्षेत्रं सिञ्चन् अपि दीनो हीनश्च तिष्ठति। कदाचित् आत्महत्यां कर्तुमपि सन्नद्धो भवति।

अन्यच्च

बुद्धस्य भिक्षापात्रे / निमज्जितमस्ति /अणुबोम्बदग्धनगरम्।[10]

बुद्धः शान्तेः प्रतीकोऽस्ति। तद्याच्ञा आणविके युगेऽस्मिन् मन्ये निष्फला जायते। माधवेन एकस्मिन् सम्पूर्णखण्डे शतस्य शतादिकानां वा बिम्बानां काव्यगोदावरी समवतारिता। लघुलघुकवितासु बिम्बानां प्राणबिन्दुस्ता मूर्तिमतीः करोति। क्वचित् कवेः वेदना जले निर्वस्त्रं कूर्दति तर्हि क्वचिद् रिक्ते चैकपत्रे स्वहस्ताक्षराणि कृत्वा स्वीयनिःशब्दतायाः प्रमाणं ददाति। एकेनैव निदर्शनेनास्य शिल्पं परिचीयेत। वेदनायाः समीपे शब्दा न सन्ति, अतः मौनमये धनादेशपत्रे वेदना हस्ताक्षरं करोति। माधवकवेः दृश्यकल्पनस्य बिम्बो भूयान् हृदयग्राही वर्तते -

इन्द्रधनुषः / प्रसाधिनी अभ्रः केशान् / संस्कारयति।[11]

मेघेन्द्रधनुषः कङ्कतिकां समादाय स्वीयकेशान् संस्कारयति। वर्षणान्तरं रिक्तो मेघः तदन्ते च प्रसृतमिन्द्रधनुः। कवेरियं कल्पना नितान्तनवीना मौलिकी चास्ति। कविमाधवेन केवलं दीपमधिकृत्य पञ्चाशतोऽधिका बिम्बाः प्रस्तुताः।

डॉ॰ राधावल्लभत्रिपाठिभिः परिवर्तनकाव्ये बुक्कतां शूनां अर्धरात्रे च दूरतः आगच्छति शृगालानां विरसे ध्वनौ बिम्बाः प्रयुक्ताः। तेषां जीवनवृक्षकाव्ये जनस्यैकस्य एकलत्वस्य तज्जिजीविषायाश्च वर्णनं जीवनस्य नवान् अर्थान् उपमानान् च मार्गयते -

स्थास्याम्यहमेकाकी स्थाणुः प्रेतवने यथा
नग्नो निष्प्रभशाखश्च भस्मीभूतमनोरथः।

[10] निष्क्रान्ता सर्वे पृ॰ १२७। [11] ऋषेः क्षुब्धे चेतसि, पृ॰ १५।१०।

अत्र स्थाणोर्बिम्बः सर्वथा समुचितः साभिप्रायश्चास्ति। स्थाणुशब्दः श्मशानवासिनं शिवं व्यनक्ति, अपरतश्च शुष्कवृक्षस्य परिदृश्ये जीवनस्य नीरसतां, संवेदनहीनताम्, अस्तव्यस्तताम् एकलत्वं श्मशानस्य च नीरवतामपि प्रकटयति ।

अभिराजराजेन्द्रमिश्राणां कवितायामपि मृत्योः भीषणं दृश्यं, जीवनसन्ध्यायाः प्रत्यक्षं साक्ष्यं धूलिभित्तौ अवलम्बितं जीवनमपि जीवनसत्यं बिम्बितं करोति -

मणिकर्णिकाघट्टे दिष्ट्या स्थितोऽहम्
सत्यादृते सर्वैः स्निग्धैश्च्युतोऽहम्
स्वप्ने मया किञ्चिद् दातुं प्रतिज्ञातम्
आजीवनं तस्मात्प्रेतैर्वृतोऽहम्[12]

एतदतिरिक्तं हिमपातगाथायाम् मिश्रवर्यस्य बिम्बप्रयोगोऽतीव हृदयग्राही । देवदारोः शाखासु लम्बिता हिमस्तबकास्तथा प्रतीयन्ते यथा दिग्वध्व आकाशगङ्गायां स्नान्ति । आर्द्रवस्त्राणि शोषयितुं शाखासु लम्बयन्ति ।

स्नान्तीभिरायतनभस्तटिनीजलेषु
प्राच्यादिदिग्वलयमञ्जुलकामिनीभिः
शोषाय देवतरुसानुषु लम्बमानाः
पिण्डा लसन्ति तुहिनस्य सिताञ्चलाभाः[13]

वस्तुतोऽर्वाचीनानां संस्कृतसाधकानामेका दीर्घा शृङ्खलास्ति, यैः साहित्यसर्जनस्य नवप्रयोगाणां मध्ये बिम्बविधानं सहजतया स्वीकृतमस्ति । बिम्बप्रयोगे तथ्यमिदं सर्वतः प्रवर्तते यद् अधिकांशस्थलेषु कविना दृश्यात्मकचित्राणां विधाने समधिकः यत्नः कृतोऽस्ति । फलतः न केवलं शब्दानां चमत्कार एव भवति, परं लघुलघुबिम्बा एकं विस्तृतं चित्रकाव्यं सृजन्ति

[12] श्रुतिम्भरा, पृ० ७५। [13] अरण्यानी ६६।२|

। बौद्धिकताभावना मनोविनोदादिषु यदुच्यते तत्सर्वं कवेः नवनवोन्मेषशालिन्याः प्रज्ञाया वशीभूतं सत प्रत्यक्षं प्रतीयते ।

वास्तवार्थस्त्वयं यत् समयस्य धारा परिवर्तिता जाता । कविता दीर्घरूपात् निर्गत्य लघुरूपे संक्रान्ता । फलतः आधुनिककविता रसालङ्काराभ्यां केवलं चरित्रचित्रणाच्च अतिक्रान्ता भूत्वा बिम्बस्य धरातलं गतास्ति । कविभिः कविताया रूपस्योपरि विशेषं ध्यानं अकृत्वा व्यक्तिसत्ये व्यापकसत्ये च दृष्टिः केन्द्रिता कृतास्ति । काव्यस्य नवीनतायां पाठकानामाकर्षणं तदैव भवति, यदा सा चमत्कारस्य शिखरं स्पृशति । अर्वाचीनकवितां तदीयभावभूम्यां मुक्ताहारे प्रोतयितुं श्रेयो बिम्बविधानस्यैवास्ति । अस्मिन् विधाने कविः प्रत्येकं बिम्बे भास्वरमणिवत् नैकेः उपकल्पनैः सह अनुपमाया आभायाः सृष्टिं रचयति, यस्यां प्रतीकानाम्, अनुभवानां, कल्पनानां च विराट् संसारो भवति । सामान्यैः शब्दैः कल्पनां सत्यस्य भावप्रवणतां च बिम्बेषु समवतारयितुं कवेः प्रयासस्तच्छक्तेरुन्मेषं प्रकटयति । असन्दिग्धं, न प्राचीनकाव्ये प्रयुक्ताः अलङ्कारास्तस्य बिम्बस्य स्पर्शं तु कुर्वन्त्येव, परं भावनिरूपणं नैव ।

आधुनिकसंस्कृतकाव्यसरणौ बिम्बात्मकाः काव्यतरङ्गा आनन्दस्य सृष्टिं कुर्वन्ति । सहृदयं च रसयन्ति । कवेः सर्जनात्मकचेतना नूतनं भावविश्वं सृजन्ती रचनाधर्मिताया नवा सम्भावना निर्दिशन्ति । बिम्बेषु भावानां गहनताया अर्थस्य च सघनतायाः सन्तुलनं तिष्ठति चेत् सा रसानुभूतिः पाठकं ब्रह्मानन्दं प्रति नयति । कवेः कारयित्री प्रतिभा किं वा तस्य कर्तृत्वशक्तिः सफलीभवति । इत्थं भाति यदियं बिम्बानां प्रच्छदवृता मुग्धा नायिकासदृशी कविता सखिलखिलाशब्दं हसिष्यति ।

अन्ततः कथयितुं शक्यते यत् आधुनिकैः कविभिः परम्पराम् अत्यक्त्वैव अर्वाचीनं काव्यं समयेन समं योजितम् । अद्य कवेः समीपे नवं जीवनं नूतनानि लक्ष्याणि परिवर्तितानि च जीवनमूल्यानि सन्ति । अत एव स युगबोधः परिपक्वोऽस्ति । भावकस्तैः प्रस्नावितं भावस्रोतो दृष्ट्वा सहसा वदन्ति ।

है उनकी सादगी भी तो कुछ इक फबन के साथ,
सीधी सी बात भी है तो एक बांकपन के साथ।

**उपर्युक्तग्रन्थसूचिः**


– प्रियतमा । बनमाली बिश्वालः । पद्मजा प्रकाशनम् । इलाहाबादम् १९९९ ।
– वेलेण्टाइन-डे सन्देशः । बनमाली बिश्वालः । पद्मजा प्रकाशनम् । इलाहाबादम् २००० ।
– ईशा । केशवचन्द्रदाशः । लोकभाषाप्रचारसमितिः । पुरी १९९२ ।
– दृक ३ । समीक्षात्मकपत्रिका । इलाहाबादम् ।
– निष्क्रान्ता सर्वे । हर्षदेवमाधवः । श्रीवाणी अकादमी । अहमदाबादम् १९९७ ।
– ऋषे क्षुब्धे चेतसि । हर्षदेवमाधवः । श्रीवाणी अकादमी । अहमदाबादम् २००४ ।
– श्रुतिम्भरा । अभिराजराजेन्द्रमिश्रः । वैजयन्तप्रकाशनम् । इलाहाबादम् १९८९ ।
– अरण्यानी । अभिराजराजेन्द्रमिश्रः । वैजयन्तप्रकाशनम् । इलाहाबादम् १९९९ ।

# काश्मीरक्रन्दनम् - एकम् आलोचनम् (डॉ. श्रीमती सुकेश शर्मा)

संस्कृतनाट्यानामुद्भवोऽपि वेदेभ्यो मन्यते। संस्कृतसाहित्ये पुरुषनाटककारैरिव महिलानाट्यकर्त्रीभिरपि प्रभूतं योगदानं कृतम्। यत्र प्राचीननाट्यकर्त्रीषु विजयाभट्टारिका, जयन्ती, शारदा देवी त्रिवेणी इत्यादयः प्रसिद्धाः सन्ति तत्र अर्वाचीननाट्यकर्तृषु डॉ॰ रमा चौधरी, श्रीमती लीलारावदयाल, श्रीमती कमलारत्नम्, डॉ॰ वनमाला भवालकर, डॉ॰ रत्नमयी देवी दीक्षितः, डॉ॰ वीणापाणिः पाटनी, डॉ॰ नलिनी शुक्ला मिथिलेश कुमारी मिश्रा, ब्रह्मचारिणी बेला देवीत्यादयः।

प्रसिद्धाः सन्ति एतासु अन्यतमैका डॉ॰ मीराद्विवेदिमहाभागा अस्ति, यया काश्मीरजनानां जीवनयातनानां मनोवेदनां च काश्मीरक्रन्दनम् इति संकलने सुतरां मर्मस्पर्शिनी अभिव्यक्तिः कृतास्ति। अभिनयदृष्ट्यापि डॉ॰ मीराया उक्तसङ्कलनस्य पञ्चापि रूपकाणि सफलानि सन्ति।

काश्मीरक्रन्दनम्[1] डॉ॰ मीराद्विवेदिमहाभागया प्रणीतं पञ्चरूपकात्मकम् एकाङ्कनाट्यसंकलनं वर्तते। तत्रा प्रथमं काश्मीरक्रन्दनम्, द्वितीयं संघर्षविरामः, तृतीयं पुनर्वासम्, चतुर्थं प्रत्यावर्तनम् पञ्चमं च निदानम् इति।

अन्ताराष्ट्रियातङ्कवादस्य ज्वलन्तीं समस्यां काश्मीरजनानां आतङ्कवादजनितं जीवनविप्लवं च अधिकृत्य विरचितमिदं नाट्यगुच्छम्। सर्वप्रथमं काश्मीरक्रन्दने रूपके नाट्यपरम्परामनुसृत्य मङ्गलाचरणे सूत्रधारः आशीर्वचोभिः सहृदयानां सामाजिकानां मानसमभिषिञ्चति। यथा[2] -

न यत्रास्ति सौख्यं न वा दुःखलेशं न पुण्यं न पापं न वा रागद्वेषौ।  
न जातिर्न मृत्युर्नवा बन्धमोक्षौ सदा स्वप्रकाशः शिवः साक्षिभूतः॥  
अखण्डश्चिदात्मा विभुर्व्यापको यः क्रियाज्ञानयुक्तो निराकार एव।  
पशूनां पतिः पाशनाशं हि कृत्वा शिवत्वं प्रदद्यादसौ नः परेशः॥

[1] मीरा द्विवेदी - काश्मीरक्रन्दनम्। दिल्ली - परिमल पब्लिकेशन् २००९। [2] तत्रैव पृ॰ १।

'काश्मीरक्रन्दनम्' नाटकस्य श्रीगणेशोऽपि सूत्रधारस्य श्रवणपथपतितेन काश्मीरमातुः क्रन्दनेन भवति। सूत्रधारेण कृतस्याभिवादनस्य प्रत्युत्तरस्वरूपे प्रदत्तवचांसि काश्मीरमातुः वेदनामुदघाटयन्ति। यथा[3] -

> काश्मीरमाता - किमाशिषं[4] दद्याम्? क्षतविक्षता दीनदीनाऽहमात्मरक्षायामेवासमर्थास्मि।
> सूत्रधारः - मातः! भवत्याः[5] सुकुमारकलेवरे तु बहुक्षतानि विद्यन्ते, क्षतजोऽपि प्रवहति कस्येदमनाचरितम्?
> काश्मीरमाता - अरे तस्यैव दुर्वृत्तस्य लुण्ठाकस्य कितवपाकस्य। मामपहर्तुमिच्छति। श्वपाक इव[6] स पाको मम खण्डं खण्डं कर्तुं वाञ्छति।

सूत्राधारेण सह काश्मीरमातुः संलाप एष प्रस्तावनायामेव संसूचयति भारतपाकमध्ये विद्यमानातङ्कवादसंत्रस्तकाश्मीरजनानां भीषणभयावहविकरालसमस्यया सततपीडिता याः काश्मीरमातुः वेदनाम्।

प्रथमस्य रूपकस्य प्रथमे दृश्ये लेखिकया पाकाधिकृतकाश्मीरे पाकसेनया बलात् दारकाणामपहरणं कृत्वा तेषां जेहादिसेनायां भर्त्रभियानं वर्णितम्। यदा पाकसैनिकाः बलपूर्वकमेकस्याः वृद्धायाः कनिष्ठं पुत्रं कर्षन्ति, तदा तस्याः आर्तवचांसि हृदयविदारकाणि प्रतिभान्ति।[7]

> वृद्धा - नैव नैवं। न तत्र प्रेषयिष्यामि। ... यो यस्तत्र गतो न पुनरावृत्तः। वर्षद्वयात् प्राग् मम ज्येष्ठं पुत्रमप्यपाहरन्। अद्यावधि किमपि न ज्ञातं तस्य विषये, कुत्रास्ति, किं खादति, किं करोति, जीवति वा न वा?

वृद्धा माता सैनिकानां पादयोः पतति, पाकसेनासमक्षे तस्याः क्रन्दनस्य मार्मिकं चित्राङ्कनं कृत्वा लेखिका सहृदयानां मानसमाकर्षति। तद् यथा[8] -

> वृद्धा - अहं वः पादयोः पतामि। मम वृद्धायाः एकमेवाश्रयं मा हार्ष्टम्। ... नाहं किञ्चिदभिलषामि। मम वृद्धावस्थायाः एक एव काष्ठदण्डोऽयमवशिष्टः।

[3] तत्रैव पृ० १। [4] आशीषं इति पुस्तके पाठः। अस्मिन्पुस्तके शुद्धिपत्रं न वर्तते। [5] भवतः इति पुस्तके पाठः। [6] श्वपाकेव इति पुस्तके पाठः। [7] तत्रैव पृ० २-३। [8] तत्रैव पृ० ३।

पाकसैनिकाः यदा तस्याः निर्णयं अर्थलोभेन परिवर्तितुमिच्छिन्ति तदा वृद्धा माता साक्रोशं भणति -

> छलमस्ति सर्वम्। मम ज्येष्ठपुत्रमप्येवमेव प्रलोभ्यापाहरन् वर्षद्वयप्राक्। अद्यावधि स नैव पुनरावृत्तो न वा प्राप्तश्च साहाय्यराशिः।

वृद्धायाः आर्तनादाः गुञ्जन्ति यथा[9] -

> कदा नु … दुग्धपायिनः शिशवः पितृभ्यां वियोज्यन्ते, मुग्धा बालिका अपहृत्य बलात्कारेणोपभुज्यात्मघाताय प्रेर्यन्ते, वृद्धास्तु कशाघातेन वृद्धत्वाद् मोच्यन्ते। … आ अल्लाह ! रक्षतु मम बालकम्। मुक्तिं दत्वेतेभ्यः दानवेभ्यः।

नाटकस्य द्वितीये दृश्ये पाकस्थितानामातङ्कवादिनां सर्वविधविस्फोटकनिर्माणे सञ्चालने च प्रशिक्षणं प्राप्य हिन्दुस्तानस्य सीमायां प्रविश्य आतङ्कवादिनां हिंसकगतिविधीनां वर्णनमस्ति यथा[10] -

> दलनायकः - तत्रा त्वया सर्वप्रथमं श्रीनगरस्याकाशवाणीकेन्दं विस्फोटनीयं यतो हि तस्य प्रतिध्वानः दिल्लीपर्यन्तं प्रसरन् हिन्दुस्तानस्य केन्द्रियप्रशासनं सावचेतयेत्। … अनन्तरं विमानपत्तनमपि विध्वंसनीयम्।

परिवारस्य विघटनं विनाशं च दृष्ट्वा मातुः वेदनां प्रकटयन्त्यः इमाः पंक्तयः दर्शनीयाः[11] -

> अपश्यदेतेषां कुचेष्टाम्।[12] मम मुग्धा बालकाः तेषां[13] दुरभिसन्धिं न परिचिन्वन्ति। सर्ववृत्तजातानि[14] पश्यन्त्यहं[15] किमपि प्रतिकर्तुं न पारयामि।

रूपकस्य तृतीये दृश्ये यदा रियाजः स्वभ्रातरं रज्जाकं मिलति, तदा रज्जाकः पाकाधिकारिणां दुरभिसन्धिमुद्घाटयति यत् हिन्दुमुस्लिमसौहार्द-

[9] तत्रैव पृ॰ ४। [10] तत्रैव पृ॰ ५। [11] तत्रैव पृ॰ ६। [12] एतेषा कुचेष्टा इति पुस्तके पाठः। [13] तेषा इति पुस्तके पाठः। [14] सर्वं वृत्तजातानि इति पुस्तके पाठः। [15] पशन्त्यप्यहं इति पुस्तके पाठः।

केन्द्रस्य हिन्दुस्तानस्यापकीर्तिं कृत्वा विश्वस्य सहानुभूत्यर्जनम् तेषां ध्येयम्। ते काष्ठपुत्तलिकां कृत्वा नर्तयन्त्यस्मान्। तद्राजनीतिः कथमपि अस्मद्धितार्थं नास्ति। निहन्त्येषा परस्तादस्मान् एव। अतस्तेषां दुरभिसन्धिं विज्ञाय न हिंसाकार्ये पदं कुर्याः। विध्वंसाभियाने आगता भवता कथं विवाहो रचितः ? रियाजस्यानेन प्रश्नेन पाकिस्तानस्य। अपरां कुटिलां नीतिं रज्जाकः अनावृणोति। यथा[16] -

> शृणु, अस्य ग्रामस्य मौलवी पाकगुप्तचरः आतङ्कवादी चास्ति। सुरक्षाप्रदानायात्र विध्वंसाभियाने आगच्छतां युवकानां विवाहमस्य ग्रामस्य कयाचिदपि युवत्या सह कारयति। अन्वेषणाभियाने सेना विवाहितं युवकं ग्रामस्य वास्तव्यमवगच्छति। स्वकार्यं सम्पाद्य सः पुनः आजादकाश्मीरे परावर्तते। अत्र प्रभूता एवम्भूता युवतयः स्वशिशून् पालयन्ति यासां पतयः अस्मात् ग्रामादपसृत्य न पुनरायाताः। आतङ्कवादिनः ताभ्य आजीवनं यन्त्रणां ददति।

आतङ्कस्य मूले एकामपरां समस्यां निर्धनतां प्रत्यपि लेखिका जनमानसमाकर्षति। रज्जाकः कथयति[17] -

> यदाहमागमनाय संकल्पितवान् वर्षचतुष्टयप्राक् तदा कथियोऽहं यत् तव परिवारः परिपालयिष्यते। ब्रूहि त्वमेव किमेवं कृतम् ?
> रियाजः (ससंकोचम) - एकस्मिन् काले भोजनमपि दुष्करमासीत्
> रज्जाकः - किमद्यापि ते विश्वासयोग्याः ?

दृश्यताम् रज्जाकस्योक्तिः[18] -

> अरे विध्वंसमार्गं परित्यज्य शान्तिमार्गं भज। हिंसावल्लरीषु न पच्यन्ते स्वादूनि फलानि। अहिंसनमेव मूलमिस्लामधर्मस्य, दीनरक्षणमेव कर्तव्यं मुस्लिमानाम्।
> रज्जाकः (रियाजस्य शरीरे बद्धाग्नेयास्त्राण्यपसारयन्) - पश्य वत्स। भानोः प्रथमरश्मिस्तव नवजीवनप्रभातमभिनन्दति।

अन्ते सूत्रधारः काश्मीरमातरं सम्बोधयति यथा -

[16] तत्रैव पृ॰ ९। [17] तत्रैव पृ॰ ९। [18] तत्रैव पृ॰ १०।

मातः। अपश्यत् तव बालकेषु जागृतिः आयाति विवेकश्च संचरति। ते पाकस्य दुरभिसन्धिं परिचिन्वन्ति। शीघ्रमेव भवत्याः क्षतानि नाशं गमिष्यन्ति। हर्षाश्रूणि स्रावयन्ती काश्मीरमाता कथयति "तथास्तु"।

भरतवाक्ये लेखिकया अखण्डसमृद्धभारतराष्ट्रार्थं शुभसंकल्पना प्रदत्ता। यथा[19] -

सुजला सुफला भूयाद् धरेयं शस्यशालिनी
भीत्यातङ्का विनश्यन्तु प्रजाः सन्तु च निर्भयाः।
पाकिस्तानस्य कश्मीरो न भूतो न भविष्यति
भागोऽयं भारतस्यैव न विभाज्यः कथञ्चन॥

इत्थं काश्मीरमातुः क्रन्दनेन आरभ्य आतङ्कवादस्य समाधानपूर्वकं विविधपक्षान् सन्दर्श्य लेखिकया हर्षाश्रूणि स्रावयन्तीं काश्मीरमातरं प्रस्तुत्य काश्मीरक्रन्दनं नाटकं सुखान्तं कृतम्।

**सङ्घर्षविरामरूपकम्**

डॉ॰ मीराद्विवेदीमहाभागया विरचितं द्वितीयं नाटकमस्ति। अस्यापि शुभारम्भः पार्वत्याः पितृदेवहिमालयस्याराधनयुतेन मङ्गलाचरणेन भवति यथा -

विभात्युदीच्यां दिशि देवकल्पो हिमालयो वै जगति प्रसिद्धः।
क्रोडस्थिताश्चास्य विभान्ति नित्यं कश्मीरकेदारकुमायुँखण्डाः॥
यः स्वात्मजायाः पदचिह्नयुक्तस्तस्यास्तपस्याव्रतसाक्षिभूतः।
जगन्निवासस्य निवासभूमिर्हिमालयोऽसौ विकरेच्छुभं नः॥

प्रस्तावनायां नटीसूत्रधारयोः सम्भाषणेन संसूच्यते यत् शिशिरकालः समुपागतः। सूत्रधारः शिशिरे काश्मीरसौन्दर्यं वर्णयन् कथयति[20] -

सर्वतः श्वेतप्रच्छदावृतेव धरेयं सितक्षौमयुता तपोनिरता योगिनीव नीरवा शान्ता च परिलक्ष्यते।

[19] तत्रैव पृ॰ ११। [20] तत्रैव पृ॰ १३।

परं नटी प्रतिवादं कृत्वा कथयति[21] -

> शान्ता? मया तु न परिलक्ष्यते। परप्रायोजितातङ्केन इमा खिन्ना विषादयुता विधवेव संलक्ष्यते।

प्रस्तावनायामेव आतङ्कवादिनामागमनं सूत्राधारेण संसूच्यते। रूपकस्य प्रथमदृश्ये चायपानगृहे छायाकारः मनीषः वार्ताहरः दीपराजश्च काश्मीरस्यातीतवैभवगाथां स्मरन्तौ उग्रवादेन संत्रस्तकाश्मीरस्य वर्तमानदुर्दशायाः चर्चां कुरुतः यथा[22] -

> दीपराजः - स्वर्गायमाने काश्मीरे पुराकालादेव केसरदेवदारुचिनारादिवनस्पतीनामिव वैदिकबौद्धशैवसूफिमोहम्मदीयसिक्खादिधर्मपादपानां समष्टिः कश्मीरियतरूपेण पल्लविता पुष्पिता च। परं सम्प्रति उग्रवाददावानलेऽस्मिन् दग्धायमानेयं दरीदृश्यते।

यदा मनीषः स्मरति[23] -

> उन्नतशैलशिखरेषु वक्रसरण्यः सर्पाकृतिनदीनदा अच्छोदसरोवराश्च कीदृशाः रम्याः सन्ति।

दीपराजः पुनः संयोजयति[24] -

> परं सम्प्रति न दृश्यन्ते शिकाराणि जलगृहाणि डलह्रदे, न श्रूयन्ते वेणुनिनादा न वा सन्तूरस्य सप्तस्वरा क्षेत्रे क्षेत्रे। शून्यनीडेषु सघनच्छायेषु चिनारवृक्षेषु न श्रुतिगोचराः खगकुलकलरवाः। विगतयौवनेव न दर्शयति स्वविलासान् वितस्ता। ... केसरकेदाराणां सुवासोऽपि न जाने कुत्रा विलुप्तः।

मनीषः सहमतिं ददाति[25] -

> नूनं कश्मीरधरायाः वैभवं कवलीकृत्य पुष्टिं गतोऽयमुग्रवादः।

चायपानसेवकजहीरस्य कथनं काश्मीरवासिनां वेदनां वर्णयति यथा[26] -

[21] तत्रैव पृ० १३। [22] तत्रैव पृ० १४। [23] तत्रैव पृ० १४। [24] तत्रैव पृ० १४। [25] तत्रैव पृ० १४। [26] तत्रैव पृ० १५।

> याल्लाह ! कदा समाप्तिमेष्यत्युग्रवादोऽयम् ?
> दीपराजः - सर्वकारकृतसङ्घर्षविरामप्रत्युत्तरे तैय्यबसङ्घटनेन निर्दोषाः ट्रकचालका विमुग्धनागरिकाश्चापहरणानन्तरं जघन्यतया व्यापादिताः।

मनीषः पुनः पृच्छति[27] -

> शमोपदेशकस्य बुद्धस्य मूर्तिभञ्जकाः किमवगन्तुं शक्नुवन्ति शान्तिसन्देशम् ?

अत्र विषये दीपराजस्य प्रत्युत्तरः दर्शनीयः[28] -

> उग्रवादिनां कृते सङ्घर्षविरामस्य कोऽप्यर्थो नास्ति। भुजङ्गाय दुग्धार्पणवत् वर्तते तेभ्यः शमोपदेशः।
> जहीरः - रमजानमासकृतसङ्घर्षविरामे ते इस्लामानुयायिनः नैवास्मान् काश्मीरान् पीडयिष्यन्ति इति मे विश्वासः।

यदा जहीरः आतङ्कवादिषु विश्वासं दर्शयति, तदा मनीषः कथयति यत् - "अतीवमुग्धोऽसि। नास्ति कोऽपि धर्मः सम्प्रदायो वातंकवादिनाम्, जनानां रक्तपानेन ते पुष्टिं गच्छन्ति।" जोगिन्दरसिंहः (चायपान गृहस्वामी) आतङ्कवादिनाम् प्रकृतिमुद्घाटयति यथा - "आतङ्क एव तेषां धर्मः, हिंसा एव तेषां सहचरी, विघटनमेव तेषां मित्रम्।"

द्वितीये दृश्ये आतङ्कवादिनः हिन्दुस्तानसर्वकारकृतशान्तिप्रयासान् कथम् उपहसन्ति इति आतङ्किनो विलालस्यादेशो दर्शयति[29] -

> विलालः - श्रूयतां वयं सर्वे जेहादिनः, आतङ्क एवास्माकं खुदा। तस्यैव वयं पूजकाः ... रे शाहबुद्दीन। त्वं प्रान्तवर्तिषु ग्रामेषु येन केनाप्युपायेन धनानि सङ्गृहाण। रे अकरम ! त्वं मोहम्मदभट्टेन सह राजमार्गे यातानि सैन्ययानयूथानि विध्वंसय। ...

अन्यस्मिन् प्रसङ्गे यदा वशीरस्य भगिनी शबीना आतङ्कवादिनां शिविरे आगत्य अतीव रुग्णां मातुः वेदनां निवेदयति तदा वशीरस्य याच्ञा, यत्

[27] तत्रैव पृ० १५। [28] तत्रैव पृ० १६। [29] तत्रैव पृ० १८।

रुग्णां मातरं द्रष्टुम् अनुमतिं ददातु शीघ्रमेव पुनरागमिष्यामि तदा दलनायकस्य विलालस्य कथनम् आतङ्कवादिनाम् अमानवीयं व्यवहारिकपक्षमुद्घाटयति यथा[30] -

> विलालः - नैवं जेहादिनामस्माकं न कापि अम्मी, न वा आपा भावुकतायाः अत्र न किमपि स्थानम्।

स्वयंभूधर्मरक्षकाः इमे आतङ्कवादिनः नारीणाम् प्रति कीदृशीं लोलुपदृष्टिं धारयन्ति इति विलालस्याट्टहासेन सूचितम्। यथा[31] -

> पूर्वमेव एव कथितं मया यदस्मादृशानां न माता न पिता न बन्धुः न वा भगिनी ... इयं सुन्दरी तु मया स्वाधिकारिसमक्षं प्रस्तोतव्या। अतीव प्रहृष्टो भविष्यति। अनन्तरं महिलातंकवादिदलेऽपि प्रेषयिष्यते।

दलनायकस्य धर्मविरुद्धवचांसि श्रुत्वा वशीरः तं बध्नाति। दीपराजः मनीषश्च काश्मीरस्य प्रख्यातसूफिस्थानं चैरार-ए-शरीफस्य घटनां स्मारयन्तौ कारगिलयुद्धे मृतानां सैनिकानां मृतदेहानपि पाकः न स्वीकृतवान् कथं ते भवितुं शक्यन्ते तव हितसंरक्षकाः, एते भृतिखच्चराः आतङ्कस्यैव विस्तारकाः, न सन्ति अस्मद्धितैषिणः न वा विश्वसनीयाः।

दीपराजो मनीषश्च आतङ्कवादिनां कुटिलपाशे निबद्धानां पथभ्रष्टयुवकानां मतिभ्रममपसारयन्तौ तान् राष्ट्रस्य मुख्यधारया सह योजयितुं प्रेरयतः। पश्चात्तापग्रस्ता एते युवकाः हृदयेन क्षमां याचन्ते। मार्गभ्रष्टा एते युवकाः स्वगृहं परावृत्ताः। भारतसर्वकारकृतसङ्घर्षविरामस्यापि इदमेव साफल्यमस्ति। अन्ते भरतवाक्ये प्रदत्तया शुभसङ्कल्पनया यवनिकापातः भवति यथा -

> मम जनिभुविभालं शारदाभूमिभागं
> हिमशिखरिकिरीटं देवलोकायमानम्।
> कलुषितपथगामी भ्रष्टपान्थः कथञ्चिद्
> असुरकितवजाल्मो स्प्रष्टुं न क्षमेत्तम्॥

[30] तत्रैव पृ॰ १८। [31] तत्रैव पृ॰ १९।

सर्वे जयहिन्द उद्घोषयन्ति

### पुनर्वासरूपकम्

पुनर्वासरूपकम् इत्याख्यं तृतीयं नाटकमपि

सृष्टिस्थितिविनाशाय स्वेच्छाज्ञानक्रियाधरः
आनन्देन लयङ्कृत्वा शक्तिपातैः कृपाङ्किरः।
हिमलिङ्गस्वरूपो यः पञ्चकृत्यं करोति वै
अमरनाथनाथोऽसौ निःश्रेयसं[32] प्रददातु नः॥

इति मङ्गलाचरणेन शुभमारभ्यते। सूत्रधारः नटीमाकारयति यत् 'पुनर्वासम्' नामकं नाट्यं नाटयितव्यम्। परं प्राक् कलकलगामिन्या वितस्तायाः श्रुतिरसायनैः तरङ्गरवैः स्वकलकण्ठं सम्मेल्य श्राव्यतामेका गीतिः।

वितस्तायाः नद्याः सौन्दर्यमधिकृत्य गुम्फितगीतैः आरभ्यते प्रस्तावना यथा[33] -

कश्यपमेरौ लसति वितस्ता
मन्दं मन्दं वहति वितस्ता
चक्राकारसरणिसंस्खलिता।
उपलविशीर्णा लास्यसमेता
कलकलजलरवमृदुसंगीता॥१॥ कश्यपमेरौ ...

गुञ्जनयुक्ता उन्मदभृङ्गाः
कलरवनिरताश्चपलविहङ्गाः।
केसरकुसुमैर्मरुत्सौरभैः
सुखदशीतला यस्या कुञ्जाः॥२॥ कश्यपमेरौ ...

सघनचिनारास्तुङ्गाः सरलाः
देवदारुविटपा अतिरम्याः।
रजतसमाभैः स्वच्छनिर्झरैः

[32] निःश्रेयं इति पुस्तके पाठः। [33] तत्रैव पृ० २५।

रुचिरा यस्यास्तटप्रदेशाः ॥३॥ कश्यपमेरौ ...

(गीतध्वनिः परिवर्तते)

मन्दं मौनं वहति वितस्ता
सकलजना आतङ्कैर्ग्रस्ताः
नेतारो जनतन्त्रोऽशक्ताः।
तक्षकवेशैः कुटिललुण्ठकैः
निरापदा नहि रम्यप्रदेशाः ॥४॥ मन्दं मौनं ... कश्यपमेरौ ...

कश्यपमेरौ लसति वितस्ता
नौवासाः पर्यटकैर्हीनाः
युवकाः सर्वे वृत्तिविहीनाः।
शासनतन्त्रे भ्रष्टाचारैः
अर्थाभावे जनता दीना ॥५॥ मन्दं मौनं ... कश्यपमेरौ ...

दारुणदुरितं हरतु वितस्ते!
कश्यपमेरौ लसतु वितस्ते!

गीतावसाने पारिपार्श्विकः सदनं संसूचयति यत् संघर्षविरामस्योपलक्ष्ये कृतात्मसमर्पणानामकरमजब्बारमुश्ताकानाम् अद्यास्ति मुक्तिदिवसः। षाण्मासिकस्य सश्रमकारावास्यावधिरद्यैव पूर्णतां भजति तेषां स्वागताय चलनीयमस्माभिः।

प्रथमे दृश्ये अकरमजब्बारमुश्ताकस्य संवादैः संसूच्यते यत् भारतसर्वकारसाहाय्येन तेषां 'पुनर्वासः' भविष्यति यतो हि "न्यायालयेऽभियोजनकाले न्यायाधीशेन समादिष्टः प्रान्तीयसर्वकारं आत्मसमर्पणकृतेभ्यो योगक्षेमाय।"[34]

द्वितीयदृश्ये अकरमेन भग्नावशेषं जीर्णशीर्णं स्वगृहमवलोक्यते। आशङ्कापूर्णहृदयेन प्रतिवेशिगृहस्य द्वारमभिहन्ति। प्रतिवेशिना महमूदेन संसूच्यते यत्[35] -

तव समर्पणवृत्तान्तमधिगत्य अत्रागत्य च असौ पितरौ बालौ भ्रातृजायाञ्चैकस्यां पङ्क्तावुपस्थाय गुलिकास्त्रेणैकैकशः भ्रस्जितवान्। अन-

[34] तत्रैव पृ० २७। [35] तत्रैव पृ० २९।

> न्तरं यदा क्रोधाग्निः न परिशान्तस्तदा बमविस्फोटेन गृहमपि विस्फोटितम्। कोऽपि नावशिष्टोऽत्र। भीता वसतिजनाः कपाटान्तरालात् सर्वं वृत्तान्तजातं पश्यन्तोऽपि भयेन न किमपि प्रत्युपकुर्वन्।

इदं श्रुत्वा अकरमः क्रन्दति[36] -

> हा पितरौ ! हा दुर्ललितौ बालौ। हा प्रिये। मम दुष्कृतेर्दुर्विपाको युष्माभिर्भुक्तः। हन्त ! व्यर्थं मम जीवनम् … अधुना नावशिष्टं मम जीवनस्य किमपि प्रयोजनम्। नास्ति नास्ति मे जीवनाभिलाषा।

प्रतिवेशी महमूदः सान्त्वयति[37] -

> मित्र। हतविधिपरिपाकः केन वा लंघनीयः। अतो मा शुचः

कपाटे खटखटेतिशब्दैः संसूच्यते यत् राज्यपालकार्यालयात् अकरमार्थं सन्देशपत्रामानीय सन्देशवाहकः शोकसंवेदनासार्धम् द्विलक्षरुप्यकात्मकं धनादेशपत्रं, पुनर्वासप्राथमिकविद्यालये शिक्षकपदस्य नियुक्तिपत्रं च विद्यते।

प्रशासनेन प्रदत्तसाहाय्येन अकरमस्य वेदना द्विगुणतरी वर्धते। यथा[38] -

> भोः निष्करुण दैव! गृहाणेदं मम परिवारस्य मृत्युशुल्कं द्विलक्षरूप्यकात्मकं यदा मम परिवारे सर्वे जना आसन्, तदा तेषामुदरपूर्तिर्दुष्करासीत्। तेषां योगक्षेमाय त्वयाहं विघटनकर्ता कृतः। अधुना कोऽपि नावशिष्टस्तस्यायं पुरस्कारः ?

प्रतिवेशी महमूदः सान्त्वनावचनैः पुनः अकरमस्य जीवनगतिम् सञ्चारयति[39] -

> धैर्यं धारय भ्रात! विधिना ललाटलिखितं मार्जितुं कोऽलम्। … प्रशासनसहयोगेन नवजीवने प्रविश। अध्ययनाध्यापनेषु चित्तं संयोज्य नैवानुशोचयिष्यसि निजदुःखम् … नवाशाया सञ्चारो भवतु तव जीवने।

[36] तत्रैव पृ॰ २९। [37] तत्रैव पृ॰ २९। [38] तत्रैव पृ॰ ३१। [39] तत्रैव पृ॰ ३१।

तृतीयदृश्ये कृतात्मसमर्पणस्य मुश्ताकस्य ग्रामरक्षासमितौ नियुक्तिर्भवति ततः कर्नलप्रतापसिंहः कैप्टनकर्णवीरश्च मुश्ताकेन प्रदत्तसेवार्थं तस्मै साधुवादान् वितरतः।[40]

> धन्योऽसि मुश्ताक! तवादृशानां युवकानामवश्यकतास्ति स्वदेशाय। यदि कतिपये जना एव निर्भीकाः स्युस्तदा मुष्टिमिता आतङ्कविस्तारकाः स्वतः एव देशात् पलायिष्यन्ते।
> मुश्ताकः - अस्मिन् ग्रामे मया केषाञ्चिद् युवकानामेकं सङ्घटनं निर्मापितम्। शनैः शनैः लोकेष्वपि जागर्तिरायाति। अवश्यमेव सफलं भविष्यामः।

आभिः पङ्क्तिभिः संसूच्यते यत् प्रशासनस्योदारतापूर्णसहयोगेन जनजागृतिभिश्च आतङ्कवादपथे भ्रान्ता युवकाः प्रत्यावर्तितुं शक्यन्ते।

चतुर्थे दृश्ये प्रशासनेन कृतात्मसमर्पितातङ्कवादिनां पुनर्वासाय प्रदत्तधनराशिं ग्रहीतुं सर्वकारीयकार्यालये गतस्य युवकस्य एतत्कथनं तत्र व्याप्तभ्रष्टव्यवस्थामुद्घाटयति। जब्बारनामकयुवकः यदा जिलाधिकारिकार्यालये समुपस्थिते भवति तदा कथयति[41] -

> महोदय, एकेन मासेनाहं भवत्कार्यालयं परिभ्रमामि। न कोऽपि शृणोति माम् न वा प्रत्युत्तरमपि सम्यक्तया ददाति। मम पुनर्वासायानुदानरूपेण स्वीकृतस्तु लक्षरूप्यकात्मकराशिः परन्तु नाद्यावधि प्राप्तः।

जिलाधिकारिमहोदयेन आहूतस्य रामदीनस्यापि कथनेन सर्वकारीयकार्यालये व्याप्ता विलम्बिनी जटिला च कार्यप्रणाली सम्यक् प्रदर्शिता भवति।

रामदीनः कथयति[42] -

> महोदय, अपरजिलाधिकारिणं यदाहं पृष्टवान् तदासावकथयत् यद् विकासखण्डाधिकारि समीपे प्रहितं तदनुदानपत्रम्। तत्र पृष्टेन ज्ञातं यत् पुनर्वासाधिकारिसमीपेऽस्ति तत्। तत्र गमनेन ज्ञातं यत् तत्तु प्रधानलिपिकस्य पार्श्वेऽस्ति। तत्पश्चात् प्रधानलिपिकस्य कक्षे गत्वा पृष्टवान् तदाज्ञासिषम् यत् सः सप्ताहं यावदवकाशार्थं गतः।

[40] तत्रैव पृ० ३३। [41] तत्रैव पृ० ३४। [42] तत्रैव पृ० ३५।

पञ्चमदृश्ये पुनः जब्बारस्योक्तिः भ्रष्टतन्त्रस्य दुर्दशामेव कथयति - “यावत् त्वदीया ग्रन्थिर्नैवोष्णायिष्यते तावन्नैव प्राप्स्यते सञ्चिका।” अपरञ्च - “ऋज्वङ्गुल्या नैव निःसरति घृतम्। कर्णे भुशुण्डिकां स्थापयेच्चेत् तत्कालमेव लप्स्यते सा” सञ्चिका। अनया पङ्क्त्या सूचितं यद् भ्रष्टकार्यशैल्यपि आतङ्कवादं जनयति। प्रधानलिपिकस्य कथनव्याजेन लेखिका सर्वकारकार्यालयेषु व्याप्तं भ्रष्टाचारमुद्घाटयतीति यथा वदति।

प्रधानलिपिकः[43] -

> निस्सारय प्रथमं विंशतिसहस्ररूप्यकाण्यनन्तरं गृहाण स्वानुदानस्य धनादेशपत्रम्।

जब्बारस्याक्रोशं दर्शयन्ती उक्तिरपि द्रष्टव्या[44] -

> अहो धिगस्त्वस्मै। उत्कोचभक्षकोऽसावातंकवादिभ्योऽपि हीनतरः। अस्मदीयं धनमपि अस्मभ्यं न ददाति। इच्छाम्यस्य गलमर्दनं कुर्याम्।

सर्वकारप्रदत्तानुदानराशिप्राप्त्यर्थं कष्टसाध्यप्रयासाः न केवलं भ्रष्टतन्त्रव्यवस्थां अनावृतां कुर्वन्ति अपितु तैः आतङ्कवादोऽपि जायते प्रसरति च इत्यपि दर्शितं भवति।

षष्ठे दृश्ये - पुनरपि लेखिकया चित्रिताः आतङ्कवादजन्या दुष्प्रभावाः। अत्र जब्बारस्योक्तिर्दर्शनीया[45] -

> ग्रामेऽतीवावहेलनीयं जीवनं यापयामि। यत्रा कुत्रापि गच्छामि जनास्तिरस्कारेण पश्यन्ति। परस्परं सम्भाषमाणास्ते दूरादेवागच्छन्तं मामवलोक्य कर्णाकर्णि कुर्वन्ति। तेषां शङ्कालवः दृष्टयो मामद्यापि घातुकमेव अवगच्छन्ति। … मम बालानां स्थितिरस्मादपि शोचनीया। विद्यालये सहपाठिन उपहसन्ति, न च सहैव क्रीडन्ति। विद्यालयात् निष्कास्य मात्रा सह ते सर्वे ह्य एव मातामहगृहं प्रहिताः। …किं कुर्याम्? प्रादेशिकसर्वकारेण स्थानीयप्रशासनमादिष्टं

[43] तत्रैव पृ॰ ३८। [44] तत्रैव पृ॰ ३८। [45] तत्रैव पृ॰ ४१-४२।

> पुनर्वासानुदानाय। तद् ग्रहीतुं कार्यालयात् कार्यालयान्तरं व्यचरम् किन्तु किमपि न सिद्धम्। उत्कोचभक्ष्या गृध्रवृत्ताः प्रवञ्चनपराः सर्वे। येन केन प्रकारेण ऋणं कृत्वा विंशतिसहस्ररूप्यकाणि प्रधानलिपिकाय प्रदत्तानि तथा च स्वानुदानस्य धनादेशपत्रां प्राप्तं परं ... सम्प्रति बैंककर्मचारिणः पीडयन्ते, ते कथयन्ति यत् विंशप्रतिशतं सुविधाशुल्कं देहि। अस्माकं राशौ सुविधाशुल्कं ग्रहीतुं तेषां कोऽधिकारः? विंशप्रतिशतं धनं प्रदाय किमवशिष्टं स्थास्यति मम पार्श्वे। ... वर्षत्रयात् प्रागेकदा अस्य बैंकप्रबन्धकेन स्वकोषागारस्यैककोटिरूप्यकाणि बन्दूकबलेन अस्मदधीनानि कृतानि। अद्य शान्त्या स्वधनं याचे तत्प्रदाने सुविधाशुल्कं याचते सः। मम त्वियं दृढ़मतिर्यत्पूर्वाचरितं मार्गं एव अस्मद्धिताय। जनास्तदास्मान् आद्रियन्ते स्म, धनादिकं ददति स्म, अद्य त एव तिरस्कुर्वन्ति। अतः शान्त्यासाध्यं यत् तत्सर्वं शस्त्रेण साधयिष्यामि।

यदा जब्बारः परिश्रान्तः शान्तिपथं विहाय आतङ्कपथमारोढुं पुनः प्रयतते तदा मुश्ताकः सन्मित्रवत् तं बोधयति[46] -

> वयस्य! द्वैधीभावं परित्यज्य गृहाण नूतनं सङ्कल्पं, नवमार्गः कठिनः कष्टकरश्चात्र न मे विमतिः परमसावेव श्रेयस्करः ग्राह्यश्च ... आगच्छ, मित्रतां साक्षीकृत्य शपथं कुरु यत् पुनः शस्त्रं नैवोत्थास्यसि।

जब्बारः संयतः सन् कथयति[47] -

> शपथं करोमि नैवोत्थास्यामि शस्त्रं, तथा च पुनः पुनः प्रतिहन्यमानोऽप्यहं विघ्नैः सत्पथं न परित्यजामि।

अन्ते च नाटकस्य शोभनसंकल्पभावनया लेखिकया भरतवाक्यं प्रस्तूयते -

> लभमाना पुनर्वासमात्मकर्मरता जनाः
> भ्रष्टाचारविनिर्मुक्तेर्हृष्टास्स्युश्च सुशासने।
> परप्रायोजितातङ्कैः सीमास्सन्तु निरापदाः
> काश्मीरेषु विलसन्तु सुखशान्तिसमृद्धयः॥

[46] तत्रैव पृ॰ ४३। [47] तत्रैव पृ॰ ४३।

**प्रत्यावर्तनम्**

प्रत्यावर्तनं नामकं रूपकं देवाधिदेवमहादेवस्याराधनया प्रारभ्यते। "विघ्नापहारी शिवः सर्वेभ्योऽत्रोपस्थितेभ्यो भद्रं वितरतु" इति सूत्रधारेण मङ्गलशुभेच्छया सहृदयसमाजः अभिषिञ्चितः। प्रस्तावनायाम् नटी सूचयति यत् रत्नाकरपण्डितस्य परिवारः महाशिवरात्रिपर्वणि भवानीशङ्करयोः स्तवनार्थं शिवालयं गच्छति।

रूपकस्य प्रथमे दृश्ये वर्णितं हामिदः (रत्नाकरपण्डितस्य सेवकः) रशीदः (रत्नाकरस्य प्रतिवेशी) स्वयं रत्नाकरश्च त्रयोऽपि सौहार्दपूर्णवार्त्तायां संलग्नाः सन्ति। यत्र एकतः रत्नाकरः ईदपर्वणि हामिदार्थं नववस्त्राणि दातुमिच्छति, तत्रैव अपरतः रशीदोऽपि महाशिवरात्रिपर्वणि निर्मितं नैवेद्यस्य आस्वादनार्थं रत्नाकरपण्डितं निवेदयति। अनेन वृत्तान्तेन लेखिकया काश्मीरप्रान्ते विद्यमाना साम्प्रदायिकी सौहार्दपरम्परा चित्रिता। एतस्मिन्नन्तराले गुलिकानां विस्फोटकानाञ्च भीषणध्वानं श्रुत्वा रत्नाकरपण्डितः देवालयं प्रति गतवतः स्वपरिवारस्य सुरक्षाविषये चिन्तातुरः वर्तते। रशीदोऽपि रत्नाकरस्य परिवारस्य जीवनरक्षां स्वधर्ममिव मन्यते।

रूपकस्य द्वितीये दृश्ये आतङ्कवादेन संत्रस्ताः काश्मीरिपण्डितपरिवाराः शरणार्थिशिविरेषु कीदृशीं दुदर्शां भजन्ते इति सम्यक् चित्रितम्। मन्त्रिमहोदयस्य निरीक्षणावसरे रत्नाकरपण्डितः शिविरे वर्तमानां दुरवस्थां विवृणोति[48] -

> रत्नाकरः - भवानत्र सर्वं कुशलं पश्यति। कुत्रास्ति, तत्? वर्षाकाले सर्पवृश्चिकैः सह शयनम्, शीतकाले शिविरचीवरैर्वायुसेवनम्, ग्रीष्मकाले च तप्तपवनैः दहनम्। भोजने तण्डुलद्विदलेभ्यो द्विगुणतरा उपलाः। वस्त्राणि भवान् पश्यत्येव, अपि च पातुं जलमपि शुद्धं नास्ति।

रत्नाकरस्य पत्नी अपर्णाऽपि निवेदयति[49] -

> भवान् कुशलतां ज्ञातुमिच्छति? अत्र कुशलतां विहाय सर्वमस्ति। पश्य मुग्धामिमां मम पुत्रिकां चिकित्साभावे मरणासन्ना विद्यते।

[48] तत्रैव पृ० ५२। [49] तत्रैव पृ० ५२।

शरणार्थिशिविरे विद्यमाना दुर्व्यवस्था रत्नाकरं ग्रामप्रत्यावर्तनाय उद्वेजयति। तस्य वचांसि द्रष्टव्यानि[50] -

> रत्नाकरः - मया निश्चितं ग्रामप्रत्यावर्तनाय। तत्र क्षुधया, रोगैः, अवमानेन वा मरणं तु नास्ति।

यदा रत्नाकरस्य पत्नी मृत्योर्भयं तत्र दर्शयति तदा रत्नाकरः पृच्छति[51] -

> कुत्र नास्ति मृत्योर्भयम् ? तत्र तु यदा कदा परमत्र वयं मृत्युं विनैव प्रतिक्षणं नरकयन्त्रणामनुभवामः, प्रणालिकाजन्तुवत् प्लवामः। न, नाधिकं सहिष्ये। एतस्माज्जीवनान्मरणमेव वरम्।

अनेन लेखिकया मृत्योर्भयात् मातृभूमिप्रेम श्रेयस्करं चित्रितम्। यदा मन्त्रिमहोदयः पण्डितपरिवारमाश्वासयितुं कथयति यत् केन्द्रियसर्वकारस्य घोषणाऽस्ति यद् यो पण्डितपरिवारः काश्मीरोपत्यकायां स्वमातृभूमिं प्रति पुनरावर्तितुमिच्छति, सर्वकारस्तेभ्यः समग्रसुरक्षां साहाय्यञ्च प्रदास्यति। सर्वकारस्योद्घोषणां श्रुत्वा रत्नाकरः पृच्छति अस्यां घोषणायां सत्यामपि विगतदिवसे पम्पापुरे पण्डितपरिवारस्य पञ्चदशजनाः कथं व्यापादिताः ?

रत्नाकरस्य प्रश्नः सर्वकारकृतघोषणानां निरर्थकत्वमेव न केवलं सूचयति अपितु हिन्दुपरिवाराणां जीवनसुरक्षायामपि प्रश्नचिह्नानि संयोजयति।

मन्त्रिमहोदयः पुनरपि आश्वासयितुं रत्नाकरं वदति यत् उपत्यकातः पण्डितानां पलायनेन परराष्ट्रस्यैव दुरभिसन्धिः सुफलायमानः दृश्यते तदा रत्नाकरस्य मातृभूमिं प्रति प्रेमभावना दर्शनीया[52] -

> रत्नाकरः - अद्यतः नैवं भविष्यति। काश्मीरोऽस्माकं प्रदेशः धरेयमस्माकं मातृभूमिः, काश्मीरसंस्कृतिरस्माकमस्मिता[53] च। वयं प्रदेशविहीना, मातृभूमिहीनाः अस्मिताशून्याश्च नैव भविष्यामः स्वयमेव निजमातृभूमिं रक्षिष्यामः।

[50] तत्रैव पृ॰ ५१। [51] तत्रैव पृ॰ ५१। [52] तत्रैव पृ॰ ५४। [53] काश्मीरसंस्कृत्यस्माकम् इति पुस्तके पाठः।

रूपकस्यान्ते लेखिकया भरतवाक्येन मङ्गलकामना क्रियते सर्वेषाम्[54] -

धर्मजात्याद्यतिक्रम्य लास्यात्मिका
द्योततामत्र लोकेषु मैत्री सदा।
देशरक्षाव्रतं धारिणः शासकाः
स्युश्च सीमा गतातङ्कविध्वंसना॥

## निदानम्

पञ्चमं रूपकं 'निदानम्' नारीणां जीवनेषु आतङ्कवादस्य दुष्प्रभावान् अधिकृत्य गुम्फितमस्ति। आतङ्कवादिनामियं कुटिला नीतिः यद् यावत् ते निजाभियाने नारीसमुदायं न संयोजयन्ति, तावत् ते सफलं भवितुम् न शक्नुवन्ति। अतः लेखिकया आतङ्कवादे महिलानां भूमिकामधिकृत्य रूपकमिदं विरचितम्। अस्य रूपकस्य शुभारम्भः मङ्गलाचरणे भवान्याः स्तुत्या भवति[55] -

लोके क्षीरभवानीति ख्याता या सिद्धिदायिनी
महामाया पराशक्तिः परात्परचिदात्मनः।
आतङ्काम्बुधिलीनानां पीडया व्याकुलात्मनाम्
सन्तारिणी च दीनानां सा शान्तिं वितनोतु नः॥

प्रस्तावनायां सूत्राधारनटीसंवादेन काश्मीरप्रान्ते नारीणां गौरवपूर्णेतिहासस्य वर्तमानकाले तेषां दुर्दशायाः परिज्ञानञ्च भवति यथा[56] -

सूत्राधारः - सत्यं वदसि। इतिहासः साक्षी यत् सुगन्धायशोमतीलल्लेश्वरीदिद्दादयो वीराङ्गना महाराज्ञ आत्मीयैरप्रतिमससाहसैः स्वेच्छया राजसिंहासनं शासितवत्यः। राजनीतिविचक्षणोऽमात्यवर्गः शौर्यसमन्वितः सामन्तसमूहः कुचक्रचक्रचालनदक्षः पण्डितसमवायश्च सर्वे विवशाः नतमस्तका आसन् तासां समक्षम्।

[54] तत्रैव पृ॰ ५४। [55] तत्रैव पृ॰ ५५। [56] तत्रैव पृ॰ ५६-७।

नटी - सम्प्रति निर्बलं नारीकुलमस्मिन् प्रदेशे दीनमपहृतशीलमवगुण्ठनस्य यवनिकायां स्वेच्छया श्वासानपि ग्रहीतुं नालम्। आतङ्कदानवः कवलयति तस्योल्लासं साहसञ्च।

प्रस्तावनायामेव नट्या विषादगीतिः तस्या वेदनां प्रकटयति यथा[57] -

रे कुरुते मे मनः क्रन्दनम्।
उद्यानं यन्नन्दनवनमिव विहगविहीनं कथं विधत्तम्।
पल्लवहीनं पादपजातं केसरमुकुलं कथं विदग्धम्॥ रे ...
सन्तूरस्य निनादा लुप्ता वेणुस्वनं केन विस्वरितम्।
हिमालयस्य हिमशिखरेभ्यः रक्तिमस्रोतः केन स्रावितम्॥ रे ...
स्फटिकसमासु डललहरीषु रक्तक्रीडनं केन क्रीडितम्।
पीडितदिवसाः शून्यरजन्यः दुःखदं यन्त्रां केन कीलितम्॥ रे ...
शून्याश्वत्वरवीथ्यो ग्रामे द्वारे-द्वारे भयं विकीर्णम्।
आतङ्कस्य विषमभुजङ्गैः जीवनरसे गरलमुद्वमितम्॥ रे ...

नारी प्रकृत्या सङ्गीतप्रिया परं विषण्णचेतसा तस्याः व्यथा क्रन्दनगीतिमाध्यमेन निःसरति।

प्रस्तावनायामेव सूत्रधारेण आतङ्कवादिभिः एकस्या अबलाया अपहरणं सूच्यते। रूपकस्य प्रथमे दृश्ये लोमहर्षकवर्णनं चित्रितमस्ति काश्मीरस्य रम्योपत्यकायां वितस्तातटस्थस्य सुमेरुग्रामस्य मध्यभागे आतङ्ककारिणौ कर्षतः युवतीमेकाम्। सा चीत्करोति, समीपस्थेषु गृहेषु स्थिताः कम्पिताः जनाः वातायनां द्वाराणां चान्तरालात् पश्यन्ति।

उपर्युक्तपङ्क्तयः आतङ्कस्य समक्षे मनुजानां विवशतासहायस्थितिं च वर्णयन्ति। तत्रस्थं महिलातङ्कवादि संगठनं दुख्तरानेमिल्लतस्य सन्तर्जना तेषां ध्येयं स्पष्टीकरोति यथा[58] -

अस्माकं ध्येयमस्ति स्वायत्तस्य काश्मीरस्य स्थापना, हिन्दुस्तानाद्विमुक्तिश्च। अतः लश्करेतैय्यबस्य सहयोगः कार्यः। ग्रामस्याभ्युत्थाने कतिपये नियमा अवश्यमेवाङ्गीकार्याः

[57] तत्रैव पृ॰ ५६। [58] तत्रैव पृ॰ ५८।

१. कोऽपि निजदुहितां विद्यालयं न प्रेषयतु।
२. कोऽपि स्त्री विना अवगुण्ठनेन गृहाद् बहिर्न निर्गच्छतु।
३. ग्राममौलवी विश्वस्तोऽस्माकम्। तस्याज्ञा सर्वैः पालनीया।

यदा 'रजिया' समाजसुधारिका तेषां विरोधं करोति तदा तैः महिलातङ्क-वादिभिः तस्याः मुखं दाहकरसायनेन दग्धं कृतम्।

द्वितीये दृश्ये अमीना यदा स्वपुत्र्याः प्रवेशार्थं विद्यालयं गच्छति, तदा प्रधानाचार्या नरूला आवेदनपत्रपूरणार्थं पितुर्नाम पृच्छति। अमीना कथयति[59] -

> किं वदेयम्? मम विवाहस्त्रिधा त्रिभिरातंकवादिभिः सह अभूत्।
> नरुला - किं तान् लुण्ठकान् परिचिनोषि यैः सह भवत्या विवाहोऽभूत्?
> अमीना - नैवम् गृहेऽप्यवगुण्ठनस्य प्रचलनं वर्तते।

उपर्युक्तपंक्तयः आतङ्कवादिभिः संत्रस्तनारीणां दुर्दशां कथयन्ति। अमीना सूचयति धर्मकञ्चुकेनावृतः मौलवी अपि ग्राम्ययुवतीनां विवाहं बलात् तैः आतङ्कवादिभिः सह कारयति।

तृतीये दृश्ये दुख्तरान्-ए-मिल्लतनामकस्य महिलातङ्कवादिसंघस्य द्वे सदस्ये मौलवीं निर्दिशतः यत् अस्मिन् ग्रामे नारीष्वेतादृशं भयं जनय, येन सर्वा हिन्दुस्तानस्य नाम्नाऽपि जुगुप्सेयुः। यदि नार्योऽस्माकं जेहादकार्यक्रमे सम्मिलेयुः तदातित्वरितं स्वतन्त्रकाश्मीरस्य स्वप्नः साकारो भवेत्।

चतुर्थे दृश्ये दुख्तरानेहिन्दस्य महिलोत्थानसमित्याः कार्यालये 'नरूला' प्रधानाचार्या सूचयति ...। न खलु एतस्मिन्नेव ग्रामे, प्रत्युत काश्मीरस्य बहुषु ग्रामेषु नारीणां इयं दुरवस्था वर्तते एवंभूतानां शिशूनां महती संख्यास्ति येषां पितॄणां ज्ञानं नास्ति।

अमीनां नारीणां दुर्दशां कथयति[60] -

[59] तत्रैव पृ॰ ६०-६१। [60] तत्रैव पृ॰ ६५।

> अस्माकं ग्राम एव काश्चन नार्यो बलात्कारेण भुक्ताः काश्चन धर्मयुद्ध-स्याजिरे व्यभिचारेण दूषिताः काश्चन चातङ्कदावानले पतिभिः वियुक्ताः।

पञ्चमे दृश्ये अमीना आरक्षिदलेन सह अपहृतयुवतेः मोचनार्थम् आतङ्क-वादिनः ग्राहयितुं च प्रयतते। करीना शकीला, अन्याश्च समाजसुधारिका नारीणाम् जागरणाभियानेन संतुष्टाः सन्ति। शकीला सङ्कल्पं स्मरति[61] -

> काश्मीरस्येतिहासः साक्षी यद् अत्रात्या नार्यो महत्यां विपदि पति-त्वापि[62] नात्यजन् निजधैर्यं साहसञ्च। अस्माभिरधीरा हतोत्साहा नैव भवितव्या।

रूपकस्यान्ते लेखिकया भरतवाक्येन मङ्गलकामना क्रियते सर्वेषाम्

> नेतारश्च भवन्तु नीतिनिरता निःस्वार्थभावङ्गताः
> नारीणां विदधेन्न कोऽपि निकृतिं रक्ष्यं हि तद्गौरवम्।
> देशीया निजधर्मपालनरतास्तिष्ठन्तु निर्वैरिणः
> विश्वे भातु पुनश्च भारतमही भीत्यापदाध्वंसनात्॥

[61] तत्रैव पृ० ६९। [62] पतितत्वापि इति पुस्तके पाठः।

# संस्कृत-पत्रकारितायाः इतिहास-लेखन-प्रक्रिया
## (बलदेवानन्द सागरः)

संस्कृत-पत्रकारितायाः विशिष्टा परम्परा वर्तते । कस्याश्चन पत्रकारितायाः मुख्यं लक्ष्यं भवति - विभिन्नानां घटनानां जनानां वा विषये वैविध्यपूर्णानां वृत्तानां प्रकाशनम् उपस्थापनं च । तच्च पत्रं पत्रिकां वा लिखित्वा सम्प्रेष्य मुद्रापयित्वा च कर्तुं शक्यते । विश्वेतिहासे समुल्लेखोऽस्ति यत् सर्वप्रथमं मेसोपोटामिया-प्रदेशस्य राज्ञा डेरियस-इत्यनेन स्व-सूचना-प्रसारार्थं शिलासु लेखाः उत्कीर्णाः । भारतेऽपि सम्राजा अशोकेन गुहाभित्तिषु शिलासु पाषाणस्थम्भेषु च सूचनाः राजाज्ञाश्च उत्कीर्य सर्वजनहितार्थं प्रसारिताः । एवं हि ताम्रपत्रेषु ताडपत्रेषु वस्त्रेषु च नैकविधाः लेखाः लिखिताः अवाप्यन्ते । एतत्सर्वमपि वस्तुजातं पत्र-पत्रिकाणाम् आहोस्वित् पत्रकारितायाः प्राक्तनं स्वरूपं नूनं प्रकटयति ।

एतत्तु सुविदितमेव यत् संस्कृतभाषायाः कथावाङ्मयम् अतितरां प्राचीनम् । वैदिक-कथाः जगतः प्राचीनतमोपन्यासत्वेन वक्तुं शक्यन्ते । एवं हि लोककथानां पशुपक्षिणां च कथानामितिहासोऽपि संस्कृत-साहित्ये सुतरां प्राचीनतमां पदवीं भजन्ते । पञ्चतन्त्रं नाम जगतः प्राचीनतमः कथासङ्ग्रहः । परं च, लघुकथा (short story) इति या रीतिः निगद्यते, एतस्याः शुभारम्भस्तु पाश्चात्त्य-प्रभावेन एव कैश्चित् स्वीक्रियते । अपि चायं शुभारम्भः ऊनविंशशताब्दस्य उत्तरार्धे जातः इति डॉ॰ राघवन्-प्रभृतयः विद्वांसः आमनन्ति । तन्त्रान्तरे 'संस्कृत-वाङ्मय का इतिहास' इत्यत्र आधुनिक-कालसन्दर्भे देवर्षि-कलानाथशास्त्री निगदति यत् 'लघुकथा-लेखस्यायं प्रभावः साक्षात् पाश्चात्त्यभाषाभ्यो नैव, अपि तु बाङ्ग्ला-प्रभृति-भारतीयभाषाणां माध्यमेन समापन्नः । अत्र सर्वाधिकमवदानम् आसीत् संस्कृत-पत्रकारियायाः यस्याः कारणात् लघुकथादि-रचनाः प्रकाशयितुमारब्धाः ।'

'विद्योदयः' (१८७१ ई॰), 'संस्कृत-चन्द्रिका' (१८९३ ई॰), 'संस्कृत-रत्नाकरः' (१९०४ ई॰) बंगालस्य संस्कृतसाहित्यपरिषत्पत्रिका-

इत्यादिषु राष्ट्रस्य संस्कृतकवि-लेखक-पत्रकाराणां कथा-साहित्यं प्राकाश्यम् आगतम् । यद्यपि भारते सर्वप्रथमं संस्कृत-पत्रिकाणां विवरणं डॉ॰ अर्नेस्टहांसः प्रादात् । तेनापि पत्रिकाद्वयस्य सामान्यपरिचयः प्रदत्तः ।

अनन्तरम्, मैक्समूलरः स्वकीयग्रन्थे संस्कृतस्य अध्ययनाध्यापनविषयकं बृहदुल्लेखम् अकरोत् । तेन लिखितं यत् 'संस्कृतमेवैका एतादृशी भाषास्ति या अद्यापि देशस्य एकस्मात् प्रदेशात् अन्यप्रदेशं यावत् जनैः भाष्यते अवगम्यते च ।'

एल्॰डी॰बर्नेट्-इत्यनेन स्वकीये ग्रन्थे पत्र-पत्रिकाणां यथाशक्यं विवरणं प्रदत्तम् । विवरणमिदम्, १८८६ ई॰-तः १९२८ ई॰ वर्षं यावत् प्रकाशितानां पत्र-पत्रिकाणामेव अस्ति ।

विद्यावाचस्पतिः अप्पाशात्रिराशिवडेकरः मासिकपत्रिकामेकां सम्पादयति स्म, यस्याः नामासीत् - 'संस्कृत-चन्द्रिका' । अस्यां पत्रिकायां सर्वप्रथमं अनेकासां संस्कृत-पत्र-पत्रिकाणां विस्तृतं विवरणं समीक्षणं च लभ्यते ।

१९०७ ई॰ वर्षे विन्तर्नित्सेन संस्कृत-पत्र-पत्रिकाणाम् अमूल्यम् अवदानं समर्थितम् । १९१३ ई॰ वर्षे 'संस्कृतरत्नाकर'-नाम्नी मासिक-पत्रिका 'वासन्तिक-प्रमादः' इत्याख्ये लेखे अनेकासां प्राचीनानां संस्कृत-पत्र-पत्रिकाणां नामोल्लेखमकरोत् । अनन्तरम् गुरुप्रसादशास्त्रि-दीनानाथशास्त्रि-सारस्वत-एम्॰ कृष्णामाचारियार-आर्॰ एन्॰ दाण्डेकर-चिन्ताहरण-चक्रवर्ति-वी॰ राघवन्-शङ्करलालशर्म-गणेशरामशर्म-राम-गोपालमिश्र-श्रीधरभास्करवर्णेकर-राधावल्लभत्रिपाठिनां ग्रन्थेषु लेखेषु च संस्कृत-पत्र-पत्रिकाणां विस्तृतं विवरणं लभ्यते ।

डॉ॰ रामगोपालमिश्रः 'संस्कृत-पत्रकारितायाः इतिहासः' इति स्वीय-शोधप्रबन्धे १९६०ई॰ वर्षं यावत् प्रकाशितानां प्रकाश्यमानानां च संस्कृत-पत्रपत्रिकाणां विस्तृतं विवरणं प्रादात् । संस्कृत-पत्रकारिता इतरभाषानामपेक्षया किञ्चिद्विशिष्टं महत्त्वमावाहति । संस्कृत-पत्र-पत्रिकाणां माध्यमेनैव अद्यापि कन्याकुमारीतो हिमालयं यावत् भारतं सांस्कृतिकम् अ-

ध्यात्मिकं भौगोलिकं च ऐक्यमनुभवति। सर्वेषु राज्येषु संस्कृतं पठितं लिखितं मुद्रितं प्रकाशितं च सत् व्यवहृतम् अक्षिलक्ष्यीक्रियते यतो हि एतत् अमृतं वर्तते।

**भारते प्राक्-स्वातन्त्र्यकालिकी संस्कृत-पत्रकारिता**

आधुनिके स्वतन्त्रे भारते संस्कृत-पत्रकारिता-क्षेत्रे अनेकाः नूतनाः मासिक्यो, द्विमासिक्यः, साप्ताहिक्यः, पाक्षिक्यश्च संस्कृतपत्रिकाः प्रकाश्यन्ते, परं च स्वातन्त्र्यावाप्तेः प्राक् स्थितिरेतादृशी नैवासीत्।

संस्कृते दैनिकवार्तापत्रस्य प्रकाशनं सर्वथा दुष्करं कार्यम्, तदपि १९०७तमे वर्षे जान्युआरि-मासस्य प्रथमदिनाङ्कात् 'जयन्ती'इत्याख्यं प्रथमं संस्कृत-दिनपत्रं केरलराज्यस्य त्रिवेन्द्रम्-नगरात् प्रकाशितमासीत्। कोमलमारुताचार्यः लक्ष्मीनन्दस्वामी च अस्य संस्कृतदिनपत्रस्य सम्पादकौ आस्ताम्। परं च वित्तस्य ग्राहकाणां च अभावात् कतिपयदिवसानन्तरमेव अस्य प्रकाशनं स्थगितम्।

संस्कृत-पत्रकरितायाः इतिहासे इदं नूनमवधेयं यत् संस्कृत-पत्रपत्रिकाणां विकासः प्रायेण मासिक-पत्रिकाणां प्रकाशनेन सहैव आरब्धः। १८६६तमे वर्षे जूनमासस्य प्रथम-दिनाङ्कात् 'काशीविद्यासुधानिधिः' इति प्रथमा संस्कृत-मासिक-पत्रिका काशीतः प्रकाशिता। अस्याः पत्रिकायाः अपरं नाम - 'पण्डितः' आसीत्। अस्याः पत्रिकायाः प्रमुखोद्देश्यमासीत् दुर्लभानाम् अप्रकाशितानां च ग्रन्थानां प्रकाशनम्। अस्यां पत्रिकायामनेके प्राचीनाः प्रामाणिकाः संस्कृत-ग्रन्थाः प्रकाशिताः।

एतदनन्तरम्, १८७१ तमे 'विद्योदय'-नाम्नी संस्कृतस्य मासिकपत्रिका प्राकाश्यमागता। अनया सहैव संस्कृत-पत्रिकासु व्यङ्ग्यशैली अपि आरब्धा। अस्मिन्नेव वर्षे पटना-जनपदस्य बाङ्कीपुरात् दामोदरशास्त्रिणा 'विद्यार्थी'इत्याख्या संस्कृत-मासिकपत्रिका प्रकाशयितुमारब्धा। १८७५ तमे वर्षे 'षड्-दर्शनचिन्तनिका', 'प्रयागधर्म-प्रकाशः', 'षड्धर्मामृतवर्षिणी'इति पत्रिकात्रयस्य प्रकाशनमारब्धमिति इतिहासविद्भिः स्वीक्रियते।

१८७९ तमे वर्षे 'कामधेनुः'इति संस्कृत-पत्रिका प्रकाशिता जाता। एततनु, १८८१ तमे वर्षे 'विद्यार्थी'इत्येषा दामोदरशास्त्रिणः सम्पादकत्वे प्रकाश्यमाना मासिकी संस्कृतपत्रिका पाक्षिक-संस्कृत-पत्रिकारूपेण उदयपुरात् प्रकाशयितुमारब्धा।

१८८२ तमे वर्षे 'काव्यनाटकादर्शे'नाम्नी संस्कृत-पत्रिका आरब्धा, यस्यां काव्यानां विशेषेण च नाटकानां प्रकाशनं क्रियते स्म।

१८८३ तमे वर्षे 'आर्यः' 'धर्मोपदेशः' इत्यपरं संस्कृत-पत्रिकाद्वयं प्रकाशयितुमारभत।

१८८५ तमे वर्षे 'ब्रह्मविद्या'इत्याख्यायाः संस्कृत-पत्रिकायाः प्रकाशनं जातम्।

१८८७ तमे वर्षे पं० आम्बिकादत्तव्यासेन संस्कृतशिक्षापद्धतेः परिष्कारार्थं बिहार-संस्कृत-संजीवनसमाजः स्थापितः । अस्मिन्नेव वर्षे संस्कृत-बाङ्ग्ला-भाषयोः मिश्रितं 'द्वैभाषिकम्'इत्याख्यं पत्रमारभत यस्मिन् आधुनिक-काव्यानां महत्त्वाधायी स्तम्भः आसीत्।

१८८८ तमे वर्षे 'विद्यामार्तण्डः', 'ग्रन्थमाला', 'आर्यसिद्धान्तः'इति संस्कृत-पत्रिकात्रयं प्रकाशितम् । १८८९ तमे वर्षे 'उषा'नाम्नी संस्कृतपत्रिका आरब्धा। १८९१ तमे वर्षे 'मानवधर्म-प्रकाशः' १८९३ तमे च वर्षे 'संस्कृतचन्द्रिका'इति संस्कृतपत्रिके प्राकाश्यमागते । पण्डित-अम्बिकादत्तव्यासेन लिखितः 'शिवराज-विजयः'इति प्रथमसंस्कृतोपन्यासः १८९३ तमे वर्षे प्रकाशितः। अस्योपन्यासस्य प्रकाशनेन सहैव संस्कृत-वाङ्मये कथा-साहित्यलेखन-परम्परा पुनरुज्जीविता।

१८९५ तमे वर्षे 'कविः'नाम्नी मासिक-संस्कृतपत्रिका आरब्धा । अस्मिन्नेव वर्षे 'प्रयाग-पत्रिका', 'आर्यावर्त्ततत्त्ववारिधिः', 'श्रीवेङ्कटेश्वर-संस्कृतपत्रिका'इति संस्कृतपत्रिकात्रयस्य प्रकाशनमारब्धम् । १८९६ तमे वर्षे मातृभक्तिविषयिण्यां काव्य-निबन्ध-लेखन-स्पर्धायाम् अप्पाशास्त्रीराशिवडेकरः 'संस्कृतपत्रिकया'श्रेष्ठलेखकत्वेन प्रथमपुरस्कारप्र-

दानपुरस्सरं सभाजितः । अस्मिन्नेव वर्षे 'सहृदया'इति संस्कृतपत्रिका आरब्धा ।

१८९७ तमे वर्षे 'काव्यकादम्बिनी', 'संस्कृत-ग्रन्थमाला', 'काव्यमाला', 'काव्यकल्पद्रुमः', 'भारतोपदेशकः'इति संस्कृत-पत्रिका-पञ्चकस्य प्रकाशनमारब्धम् ।

१८९९ तमे वर्षे अनन्ताचार्यः 'शास्त्रमुक्तावली'इति संस्कृतपत्रिकां प्रकाशयितुमारभत । अस्मिन्नेव वर्षे 'विद्वत्कला', 'साहित्यरत्नावली'इति संस्कृतपत्रिकाद्वयं प्रकाशितम् ।

१९०० तमे वर्षे 'देवगोष्ठी', 'विद्यार्थीचिन्तामणिः'इति संस्कृतपत्रिके प्राकाश्यमागते । अस्मिन्नेव संचत्सरे 'मञ्जुभाषिणी'इति प्रथमायाः संस्कृत-साप्ताहिक्याः प्रकाशनमारब्धम् ।

१९०१ तमे वर्षे 'भारतधर्मः', 'ग्रन्थप्रदर्शिनी', 'श्रीकाशी'इति संस्कृतपत्रिकात्रयस्य प्रकाशनमारब्धम् । अस्मिन्नेव वर्षे संस्कृतपत्रकारः श्रीनिवासशास्त्री प्राणान् अत्यजत् ।

१९०२ तमे वर्षे 'रसिकरञ्जिनी'इत्याख्या संस्कृत-पत्रिका आरब्धा । अस्मिन्नेव वर्षे 'विद्यार्थी-चिन्तामणिः'इति संस्कृतपत्रिकायाः साप्ताहिकं प्रकाशनमारब्धम् ।

१९०३ तमे वर्षे भवानीप्रसादशर्मा काशीतः 'सूक्तिसुधा'इत्यस्याः मासिक-संस्कृतपत्रिकायाः प्रकाशनमारभत । अस्मिन्नेव वर्षे 'वैष्णवसन्दर्भः'इति संस्कृत-पत्रिका प्रकाशिता ।

१९०४ तमे वर्षे रामावतारशर्मणः विधुशेखरभट्टाचार्यस्य च संयुक्तसम्पादकत्वे काशीतः 'मित्रगोष्ठी'इति मासिकी संस्कृतपत्रिका प्रकाशिता । १९०५ तमे वर्षे 'मिथिलामोदः', 'विशिष्टाद्वैतिनी ', 'विद्वद्गोष्ठी'इति संस्कृत-पत्रिकात्रयं प्रकाशितम् ।

१९०६ तमे वर्षे 'सूनृतवादिनी'इति साप्ताहिकी संस्कृतपत्रिका काशीतः प्राकाश्यमागता । अस्मिन्नेव वर्षे 'केरल-ग्रन्थमाला', 'सद्धर्मः', 'प्रकटनपत्रिका', 'वीरशैवप्रभाकरः', 'बालमनोरमा', 'विद्यावती', 'वीरशैवमत-

प्रकाशः', 'विश्वश्रुतः', 'विद्वन्मनोरञ्जिनी'इत्यादयः संस्कृतपत्रिकाः प्रकाशिताः।

१९०७ तमे वर्षे जूनमासस्य प्रथमदिनाङ्कात् त्रिवेन्द्रम्-तः 'जयन्ती'-नाम्नः प्रथमस्य संस्कृतदिनपत्रस्य प्रकाशनमजायत । अस्मिन्नेव वर्षे 'षड्दर्शिनी', 'संस्कृतम्'इति पत्रिकयोः प्रकाशनं जातम्।

१९०९ तमे वर्षे सुख्यातः संस्कृत-पत्रकारः दामोदरशास्त्री प्राणान् अत्यजत्।

१९१३ तमे वर्षे चन्द्रशेखरशास्त्रिणा प्रयागतः 'शारदा'इति संस्कृतस्य मासिकपत्रिका आरब्धा। अस्मिन्नेव वर्षे सुख्यातः संस्कृतविद्वान् पत्रकारश्च हृषीकेशशास्त्री-भट्टाचार्यः प्राणान् अत्यजत् । पत्रकारः संस्कृतविद्वान् च अप्पाशास्त्रीराशिवडेकरः वर्षेऽस्मिन् दिवंगतः । अस्मिन्नेव वर्षे 'चित्रवाणी', 'कवित्वम्', 'आयुर्वेदपत्रिका', 'मञ्जरी', 'प्राचीनवैष्णवसुधा', 'धर्मचक्रम्', 'अमृतवाणी', 'संस्कृतकौमुदी', 'सुरभारती'इत्यादयः संस्कृतपत्रिकाः प्रकाशिताः।

१९१४ तमे वर्षे 'बहुश्रुतम्'नाम्नः संस्कृतपत्रस्य प्रकाशनम् जातम्।

१९१५ तमे वर्षे 'गीर्वाणभारती'इति संस्कृतपत्रिकायाः प्रकाशनम् आरब्धम्।

१९१८ तमे वर्षे 'संस्कृतसाहित्यपरिषद्'इति मासिक-संस्कृत-पत्रिकायाः कोलकोतातः प्रकाशनम् अभवत्।

१९२० तमे वर्षे अयोध्यायाम् अखिलभारतीयवुद्वत्परिषद् संस्थापिता। अनया परिषदा 'संस्कृतसाकेतः'इति मासिकी संस्कृतपत्रिका आरब्धा, या हि अनन्तरं महात्मगन्धिनः अहिंसात्मकान्दोलनस्य केन्द्रबिन्दुत्वेन अवर्तत। अस्मिन्नेव वर्षे 'सरस्वती-भवन-ग्रन्थमाला'इति संस्कृतपत्रिका प्रकाशिता।

१९२४ तमे वर्षे संस्कृत-मासिक-पत्रिकात्रयं प्राकाश्यमागतम्। प्रथमा 'गीर्वाण'नाम्नी मद्रासतः, द्वितीया मैसूरतः शृङ्गेरीमठस्य 'शारदा', तृतीया व काश्याः गोपालमन्दिरतः 'समस्याकुसुमाकरः'इति।

१९२५ तमे वर्षे श्रीमन्महाराज-संस्कृत-पाठशालायाः पत्रिका मैसूरुतः प्रकाशिता, यस्यां संस्कृत-भाषायाः आधुनिकरचनाः प्रामुख्येन प्रकाश्यन्ते स्म ।

१९२६ तमे वर्षे तिरुपतितः डी॰टी॰ ताताचार्यस्य सम्पादकत्वे 'उद्यानम्'इति मासिकी संस्कृतपत्रिका, काश्याः मीरघाटात् 'सुर-भारती'इति संस्कृतमासिकी, कालीपदकाचार्यस्य भुवनमोहन - सांख्य-तीर्थस्य च सम्पादकत्वे कोलकोतातः 'संस्कृतपद्यगोष्ठी'इति त्रैमासिकी संस्कृतपत्रिका प्राकाश्यमागताः ।

१९२७ तमे वर्षे काशीतः 'ब्राह्मण-महासम्मेलनम्'इति संस्कृतमासि-कस्य प्रकाशनं जातम् ।

१९२९ तमे वर्षे संस्कृतस्य विद्वान् पत्रकारः रामावतारशर्मा प्राणान् अत्यजत् । अस्मिन्नेव वर्षे अमृतसरतः सीताराम-शास्त्रिणः सम्पादकत्वे 'अमरभारती'इति संस्कृतपत्रिकायाः प्रकाशनम् आरब्धम् ।

१९३१ तमे वर्षे भारतीय-वार्तापत्राधिनियमः प्रवर्तितः । अधिनिय-मोऽयं राजनीतिक-कार्याणि सविनयमवज्ञान्दोलनं च दमयितुं क्रियान्वितः आसीत् । अस्मिन्नेव वर्षे गुजरात-राज्यात् हीरालालशास्त्रिपञ्चोलिनः ह-रीशशङ्करशास्त्रिणश्च सम्पादकत्वे 'श्रीपीयूषः'इति संस्कृतमासिकी, श्रीन-गराच्च नित्यानन्दशास्त्रिणः सम्पादकत्वे कुलभूषणस्य च सहसम्पादकत्वे 'श्री'इति संस्कृतपत्रिका प्राकाश्यमागते ।

१९३४ तमे वर्षे कालिपदकाचार्यस्य सम्पादकत्वे गाङ्गेय-नरोत्तर-शास्त्रि-रामकृष्णचक्रवर्तिनोः सहसम्पादकत्वे कोलकोतातः 'संस्कृतपद्य-वाणी'इति संस्कृतमासिकी, हैद्राबादतः कालूरामव्यासद्वारा 'कौमुदी'इति संस्कृतमासिकी, बङ्गालस्य धुलजोडातः 'संस्कृतसाहित्यम्'इति संस्कृत-पत्रिका, लाहोरतश्च 'उषा'इत्येताः संस्कृतपत्रिकाः प्राकाश्यमागताः ।

१९३५ तमे वर्षे हरिद्वारतः 'दिवाकरः'इति संस्कृतपत्रिका, पुणेतः 'मीमांसाप्रकाशः'इति संस्कृतपत्रिका, तञ्जोरतः 'सरस्वतीमहल'इति सं-स्कृतपत्रिका च प्रकाशिताः । अस्मिन्नेव वर्षे आगरातः प्राकाश्यमानायां

'कालिन्दी'इति संस्कृतपत्रिकायां दिनानाथशास्त्रिणा लिखितो निबन्धः 'संस्कृतपत्राणां साधारणेतिहासः'इति मुद्रितो जातः ।

१९३७ तमे वर्षे मुम्बईतो भारतीयविद्याभवनात् 'भारतीयविद्या'इति अनुसन्धानात्मकं त्रैमासिकं पत्रम्, कुम्भकोणम्-तः एस्॰सुब्रह्मण्यम्-शास्त्रिणा 'ब्रह्मविद्या'इति मासिकपत्रिका, वाराणसीतः 'शारदा'इति संस्कृतपत्रिका च प्रकाशिता ।

१९३९ तमे वर्षे महादेवशास्त्रिणः प्रधानसम्पादकत्वे बलदेवप्रसादमिश्रस्य च सम्पादकत्वे 'ज्योतिष्मती'इति सचित्रं हास्यपरकं संस्कृतपत्रं प्रकाशितम् ।

अस्य पत्रस्य केचन अङ्काः अश्लीलात्मकाः आसन् । संस्कृतमासिकपत्रेऽस्मिन् आङ्ग्लप्रशासनस्य त्रुटि-प्रकाशन-कारणात् प्रशासनेन एतत् प्रतिषिद्धमासीत् ।

१९४० तमे वर्षे वाराणसीतः 'उच्छृङ्खलम् 'इति पाक्षिकं संस्कृतपत्रं प्रकाशितम् । हास्यरस-प्रधानेऽस्मिन्न् पत्रे अश्लीलहास्य-प्रकाशनं निषिद्धमासीत् । पत्रेऽस्मिन्न् हास्यजनकानि चित्राण्यपि प्रकाश्यन्ते स्म । अस्मिन्नेव वर्षे पटनातः 'संस्कृत-संजीवनम्'इति बिहारसंजीवनसमाजेन संस्कृतपत्रिका प्रकाशिता ।

१९४१ तमे वर्षे 'अमृतवाणी'इति वार्षिकी पत्रिका एस्॰ एम्॰ रामकृष्णभट्टेन बैङ्गलूरूतः प्रकाशिता ।

१९४२ तमे वर्षे 'सरस्वतीसुमनः'इति वाराणसी-संस्कृतविश्वविद्यालयात् संस्कृतपत्रिका प्रकाशिता ।

१९४४ तमे वर्षे काशीतः पण्डितकालिप्रसादशास्त्रिणः सम्पादकत्वे 'अमरभारती'इति पत्रिका प्रकाशिता, यस्याः मुखोद्देश्यमासीत् राष्ट्रभाषारूपेण संकृतस्य प्रतिष्ठापनम् ।

१९४७ तमे वर्षे 'वार्तापत्र-अन्वीक्षणसमितेः (Press Enquiry Committee)' संरचना जाता । अस्यां समितौ आदिष्टमासीत् यत् संविधा-

नसभायाः मौलिकाधिकाराण् संलक्ष्य वार्तापत्राणां नियमावलिः समीक्षणीया।

## आधुनिकी संस्कृत-पत्रकारिता

अस्माभिः १९४७ तमे वर्षे आङ्ग्ल-शासनस्य दासत्वम् अपाकृत्य बहुमूल्या स्वाधीनता आधिगता। प्राक्-स्वातन्त्र्यकाले प्रकाशितासु विभिन्नासु साप्ताहिक-पाक्षिक-मासिकपत्रिकासु एकतः दुर्लभानाम् अप्रकाशितानां च ग्रन्थानां प्रकाशनं क्रियते स्म, अपरत्र च, संस्कृतकविलेखक-पत्रकाराणां राष्ट्रभक्ति-समन्विताः कथाः कविताः निबन्धाश्च प्रकाश्यन्ते स्म । इतः परं वयमवलोकयिष्यामः यत् अस्मिन्नवधौ काः काः साप्ताहिक-पाक्षिक-मासिक्यः पत्रपत्रिकाः प्रकाशिताः जाताः।

## आधुनिक्याः संस्कृत-पत्रकारितायाः इतिहास-लेखनम्

ईस्वीये १९४७ तमे वर्षे सर्वप्रथमं स्वतन्त्रभारतस्य प्रथमं संस्कृत-साप्ताहिकपत्रं 'सुरभारती'इति मुम्बईतः प्रकाशितम् । श्रीगोविन्द-वल्लभशास्त्रिणः सम्पादकत्वे प्रकाश्यमानस्य अस्य पत्रस्य विषये 'मालवमयूरः'इति पत्रिकायां प्रकाशितमासीत् यत् 'विश्वस्मिन् विश्वभारते भारत-भारती-भारतीयता-गौरव-विवर्द्धिषया प्रसरन्ती संस्कृत-पत्र-दौर्लभ्यमपाकुर्वती विद्वज्जन-मण्डलसहयोगमुपनयन्ती मुम्बईतः 'सुरभारती'यं पत्रिका प्रचरति । इयं पत्रिका विद्वद्वरवृन्द-लब्ध-सहायास्ति।'

१९५१ तमे वर्षे नागपुरस्य संस्कृतभाषा-प्रचारिणीसभया 'संस्कृत-भवितव्यम्'इति साप्ताहिकस्य संस्कृतपत्रस्य प्रकाशनमारब्धम्। श्रीधर-भास्करवर्णेकरस्य सम्पादकत्वे आरब्धमिदं 'संस्कृतभवितव्यम्'अनन्तरं दि॰ वी॰ वराडपण्डे, दा॰ नी॰ र॰ वर्हपण्डे इत्येताभ्यामपि सम्पादितम्।

अस्य प्रकाशनं सततं जायते। अनेके विशेषाङ्काः अस्य पत्रस्य विस्तार-वैभवं गाम्भीर्यं च प्रदर्शयन्ति। अस्य भाषा सरला सन्धिरहिता चास्ति।

डॉ॰ वी॰ राघवान् लिखति यत् 'संस्कृतभवितव्ये प्रकाशिता सामग्री, पत्रस्य शैली चानुपमा वर्तते।'

१९५३ तमे वर्षे गलगलीशमाचार्यस्य संचालकत्वे पण्ढरी-नाथाचार्यस्य च सम्पादकत्वे बागलकोटतः 'वैजयन्ती'इति साप्ताहिकपत्रं प्रकाशितम्। प्रतिमङ्गलवासरमिदं प्रकाश्यन्ते स्म। पत्रमिदं त्रुटिरहितं सरल-संस्कृत-संवलितं बालोद्यान-इति-स्तम्भयुतश्चासीत्। अत्र विमर्शवेदिका-स्तम्भे अर्वाचीन-पुस्तकानां समीक्षा प्रकाश्यन्ते स्म। अनन्तरं, मुद्रणालयाभावात् धनाभावाच्च अस्याः साप्ताहिक-पत्रिकायाः नियतप्रकाशनं बाधितम्।

१९५३ तमे वर्षे पण्डितरामयशत्रिपाठिनः संरक्षकत्वे वाराणसीतः अखिलभारतीय-पण्डितमहापरिषदा साप्ताहिकी 'पण्डितपत्रिका' प्रकाशिता। प्रतिसोमवासरं प्रकाश्यमानायाः अस्याः पत्रिकायाः मुख्यलक्ष्यं धर्मप्रचारः एवासीत्। १९६० तम-वर्षानन्तरं धनाभावात् अस्याः पत्रिकायाः प्रकाशनं नैव जातम्।

१९५५ तमे वर्षे जुलाई-मासतो गुण्डूरतः प्रतिसोमवासरं 'भाषा'इति साप्ताहिकी संस्कृतपत्रिका आरब्धा। अस्याः गौरवसम्पादकः श्रीकाशी-कृष्णाचार्यः, सम्पादकश्च कृष्णसोमयात्री चास्ताम्। अस्याः पत्रिकायाः भाषा सरलासीत्। अत्र वार्ताः अपि प्रकाश्यन्ते स्म।

१९६४ तमे वर्षे श्रीरामबालकशास्त्रिणः सम्पादकत्वे 'गाण्डीवम्'इति साप्ताहिकं पत्रं काशीतः प्रकाशितम्। रामबालकशास्त्रिवर्यः जीवन-पर्यन्तं सर्वमपि पणीकृत्य 'गाण्डीवम्'-प्रकाशने तत्परो बद्धपरिकरश्चावर्तत। अस्य शोधलेखस्य लेखकेन स्वीयाध्ययनावसरे काश्यां स्वीयनेत्राभ्यां दृष्टं यत् शास्त्रिवर्यः 'गाण्डीवम्'-पत्रिकायाः सातत्यार्थं कियता महता श्रमेण त्यागेन समर्पणेन निष्ठया च प्रयतते स्म। तस्य निधनानन्तरं, किञ्चित्कालं यावत् पत्रिकायाः प्रकाशनम् अवरुद्धं, पुनश्च श्रीगोपालशात्रिणः सम्पदकत्वे सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय-परिसरतः निरन्तरमियं प्रकाश्यते। साम्प्रतमस्याः सम्पादकोऽस्ति डॉ॰ हरिप्रसाद-अधिकारी।

'गाण्डीवम्'इति साप्ताहिकं संस्कृतपत्रं स्वीयेन नैरन्तर्य-वैशिष्ट्येन रुचिकरेण विषयवैभवेन निष्पक्षतया च भावप्रकाशनेन संस्कृत-पत्रकारिता-क्षेत्रे विशिष्टं महत्त्वमादधाति। श्रीधर्मदत्तचतुर्वेदिना लिखितं यथा -

वृत्तं संस्कृत-माध्यमेन सकलं सम्प्रेक्ष्यते भारते,
वार्ता सर्वसमाज-योग्यगुणिनां येनात्र संगृह्यते।
जात्यां वर्गजनेषु भावसमता धर्मेषु च स्थाप्यते
'गाण्डीवम्' सुधियः पठन्ति किल तत् साप्ताहिकं पत्रकम्॥

**आधुनिक्यः पाक्षिक्यः संस्कृतपत्रिकाः**

स्वतन्त्रभारते सर्वप्रथमं पाक्षिकं पत्रं पुणेतः 'भारतवाणी'इति प्रकाशितम्। डॉ॰ गजाननबालकृष्णपलसुले-अनन्तगाङ्गिलश्चास्य सम्पादकौ आस्ताम्। सचित्रेऽस्मिन् पत्रे निबन्ध-कथा-कविताः अनूदितसाहित्यं च वार्ताभिः सहैव प्रकाश्यन्ते स्म। भारतवाण्यां प्रकाशिताः केचन विशेषाङ्काः उत्कृष्टाः वर्तन्ते। 'का वार्ता विश्वमण्डले' इति शीर्षके विश्ववार्ताः प्रकाश्यन्ते स्म।

१९५८ तमे वर्षे राजमुन्द्रीतः 'संस्कृतवाणी' इति पक्षिकं पत्रं एन्॰ सी॰ जगन्नाथ-महोदयस्य सम्पादकत्वे प्रकाशितमासीत्। १९५८ तमे वर्षे पुणेतः श्रीवसन्तगाङ्गिलस्य सम्पादकत्वे पाक्षिकं 'शारदा'इति संस्कृतपत्रमारब्धम्। अस्यां पत्रिकायां बाललेखाः प्रकाश्यन्ते। पत्रिकायाः भाषा सरला सरसा उपदेशात्मिका चास्ति। यथात्र द्रष्टव्यम् -

'प्रसारय संस्कृतध्वजम्। प्रताडय संस्कृतदुन्दुभिम्। प्रपूरय संस्कृतशङ्खम्। पठ संस्कृतम्। वद संस्कृतम्। लिख संस्कृतम्।'

अस्यां पत्रिकायाम् आकाशवाणी-वार्ता-नाटक-चित्रोत्सवानां विवरणानि जीवनचरितानि संस्कृत-विश्ववार्ताः समीक्षाश्च प्रकाश्यन्ते। बैङ्गलूरु-नगरे दशम-संस्कृतविश्वसम्मेलनावसरे शारदा-सम्पादकः गाङ्गिलवर्यः विश्वसम्मेलनस्य विस्तृताः वार्ताः प्रकाश्य तत्रैव वितरितवान्।

पाक्षिक-पत्रिकासु शारदा सर्वप्रिया महत्त्वपूर्णा चास्ति। अस्याः प्रकाशनम् 'ई-शारदा'इति वैद्युताणविक-माध्यमेन (electronic medium)

अपि विधीयते येन जनाः कम्प्यूटर्-प्रविधौ अन्तर्जालद्वारा-जगति एनां पठितुं द्रष्टुं चार्हन्ति।

**आधुनिक्यो मासिक्यः संस्कृत-पत्रिकाः**

१९४७ तमे वर्षे काञ्ची-कामकोटिपीठस्य मुखपत्रिकारूपेण 'ब्रह्म-विद्या'इति स्वतन्त्र-भारतस्य प्रथमा संस्कृत-मासिक-पत्रिका कुम्भ-कोणम्-तः प्रकाशिता । पण्डितराजः एस्॰ सुब्रह्मण्यम्शास्त्री अस्याः सम्पादकः, टी॰आर्॰ सुवासाचार्यश्च प्रकाशकः आस्ताम् । दर्शन-प्रधान-पत्रिकैषा साम्प्रतं नैव प्रकाश्यते।

१९४८ तमे वर्षे वाराणसीतः 'देववाणी'इति संस्कृत-मासिकपत्रिका प्रकाशिता।

१९४८ तमे वर्षे कविराजस्य रामस्वरूपशास्त्रिणः सम्पादकत्वे मुम्बईतः 'बालसंस्कृतम्'इति मासिकी संस्कृतपत्रिका प्रकाशिता। पत्रिकायां विशेषेण बलोपयोगि-साहित्यं प्रकाश्यन्ते स्म। पत्रस्योद्देश्यमासीत्-

> 'पुरे पुरे गृहे गृहे कुट्यां बाले युवस्वपि।
> संस्कृतस्य प्रचाराय प्रभूयाद् बालसंस्कृतम् ॥

१९५० तमे वर्षे अखिल-भारतीय-संस्कृतप्रचारक-संस्थायाः दिल्ल्याः शिक्षासमितेश्च मुखपत्रिकारूपेण 'संस्कृत-प्रचारकम्'इति संस्कृत-मासिकस्य प्रकाशनं दिल्लीतः आरब्धम् । जीवितासु प्राचीनासु च संस्कृतमासिक-पत्रिकासु एषा अन्यतमा, तथापि अस्याः प्रकाशने नैरन्तर्यं नैवास्ति।

१९५० तमे वर्षे जयपुरतः 'भारती'इति संस्कृतस्य मासिक-पत्रिका आरब्धा, सा च साम्प्रतमपि सततं प्रकाश्यते।

आरम्भे, बाबासाहेबआप्टे-महोदयस्य सम्पादकत्वे गिरिराजशास्त्रि-महोदयस्य च प्रबन्ध-सम्पादकत्वे प्रकाशितैषा सम्प्रति विदुषा पत्रकारेण श्रीकलानाथशास्त्रिणा सम्पाद्यते । 'भारती'संस्कृत-मासिक-पत्रिकासु स्वीयं विशिष्टं स्थानं बिभर्ति।

१९५० तमे वर्षे काञ्चीतः 'वैदिकमनोहरा'इति संस्कृत-मासिकपत्रिका प्रकाशिता। श्री अण्णङ्काचार्यः अस्याः सम्पादकः, प्रामुख्येणात्र रामानुजीय-दर्शनसम्बद्धाः लेखाः प्राप्यन्ते।

१९५१ तमे वेर्षे वाराणस्याः अपारनाथमठतः 'संस्कृतप्रतिभा' इत्याख्यायाः संस्कृतमासिकपत्रिकायाः प्रकाशनं पण्डित-रामगोविन्दशुक्लस्य सम्पादकत्वे जातम्। पत्रिकैषा सार्द्धैकवर्षं यावत् प्रचलिता।

१९५३ तमे वर्षे नेपालस्य काठमाण्डु-नगरात् 'संस्कृतसन्देशः'इति इतिहास-वृत्तप्रधाना संस्कृतमासिक-पत्रिका प्रकाशिता। अस्यां शिलालेखानां प्रकाशनं जायते स्म।

१९५६ वर्षतः शिमलातः 'दिव्यज्योतिः'इति मासिकपत्रिका आचार्य-दिवाकरदत्तशर्मणः तदनु च आचार्य-केशवशर्मणः सम्पादकत्वे प्राकाश्यमागता। अत्र प्रकाशिताः लेखाः वार्ताः श्लोकाश्च सर्वथा पठनीयाः अनुभूताः। प्रतिमासं पञ्चदश-दिनाङ्के प्रकश्यमानायाः अस्याः केचन विशेषाङ्काः अपि प्रकाशिताः।

१९५६ तमे वर्षे बेलगांवतः पण्डित-वरखेडीनरसिंहाचार्यस्य तदनु च पण्डित-शिरोमणेः गलगलीशमाचार्यस्य सम्पादकत्वे 'विद्या' इति संकृत-मासिकपत्रिकायाः प्रकाशनम् आरब्धम्। वर्षत्रयं यावत् प्रकाशितायाम् अस्यां प्रामुख्येन धार्मिकाः दार्शनिकाश्च निबन्धाः प्रकाशिताः।

१९५८ मिते वर्षे श्रीरामरञ्जनस्य प्रकाशकत्वे 'प्रणव-पारिजातम्'इति मासिकी संस्कृतपत्रिका कोलकोतातः आरब्धा। पत्रिकायामस्यां श्रीमद्भगवद्गीतायाः, गद्य-पद्यात्मकानां काव्यानाम्, अनुवादात्मकलेखानां च प्रकाशनं जायते स्म। अस्याम् अभिनवसाहित्यमपि प्रकाश्यते स्म। १९५६ वर्षे 'संस्कृतसाकेतः'इत्यस्य वर्षाङ्कः डिसेम्बरमासे प्रकाशितः, तस्मिन् 'दिव्यवाणी'इति पत्रिकायाः वृत्तम् अधिगम्यते। १९५९ तमे वर्षे वाराणसीतः 'अमरवाणी'इति संस्कृत-मासिक-पत्रिका प्रकाशिता। अमुना नाम्ना (अमरवाणी) एव पत्रिकापि कुतश्चित् प्रकाशिता इति सूचनाधिगतास्ति।

१९६० तमे वर्षे उडुपीतः श्री॰ वेंकटेशस्य सम्पादकत्वे 'गीता'इत्याख्या पत्रिका आरब्धा। अस्याः संस्कृतमासिकपत्रिकायाः प्रकाशनं कन्नडलिप्यां भवति स्म।

१९६० तमे वर्षे वडोदर-स्थितायाः विद्वत्सभायाः मुख्यपत्ररूपेण 'सरस्वती-सौरभम्' इति संस्कृतमासिक-पत्रिका श्रीजयनारायण-रामकृष्णपाठकस्य मुख्यसम्पादकत्वे आरब्धा। पत्रिकायामस्यां विद्वत्सभायाः विवरणानि नानारचनाश्च प्रकाश्यन्ते स्म।

१९६० तमे वर्षे गुरुकुलकागडी-हरिद्वारतः 'गुरुकुल-पत्रिका'इति संस्कृत-मासिकपत्रिका आरब्धा या हि १९४८ वर्षतो हिन्दीभाषायां प्रकाश्यते स्म। साम्प्रतमस्याः सम्पदकोऽस्ति प्रो॰ महावीरप्रसादआग्रवालः। अस्यां श्रीसत्यव्रत-विद्यामार्तण्डस्य व्यवस्थापकत्वे धर्मदेवीविद्यामार्तण्डस्य च सम्पादकत्वे दार्शनिकाः ऐतिहासिकाः वैज्ञानिकाः सामाजिकाश्च निबन्धाः प्रकाश्यन्ते स्म, ये हि गम्भीराः रोचकाश्च इति पाठकाः स्वीकुर्वन्ति।

१९६० तमे वर्षे नेपालस्य काठमाण्डुतः 'जयतु संस्कृतम्'इति मासिक-पत्रिका संस्कृत-प्रचारार्थं प्रकाशिता। अस्यां कविताः निबन्धाः कथाः अनुवादसाहित्यं नेपालीय-विदुषां परिचय-विवरणानि च प्रकाश्यन्ते स्म।

१९६० तमे वर्षे दिल्लीराज्यस्य संस्कृतविश्वपरिषदा यशोदानन्दभारद्वाजस्य सम्पादकत्वे 'साहित्यवाटिका'इति पत्रिका प्रकाशिता। समस्यापूर्त्यादयोऽत्र प्रामुख्येण प्रकाशिताः।

१९६० तमे वर्षे बिहार-राज्यस्य मुङ्गेर-स्थलात् 'देववाणी 'इति पत्रिका प्राकाश्यमागता।

१९६२ तमे वर्षे आन्ध्रप्रदेशस्य वित्तूर-स्थलात् 'गैर्वाणी'इति संस्कृत-भाषाप्रचारिणी-सभया, संस्कृतमासिकपत्रिका प्रकाशिता । पूर्वमेषा पत्रिका त्रैमासिकी आसीत् अनन्तरमेषा डॉ॰ क॰ वे॰ रामकृष्णाचार्यस्य सम्पादकत्वे मासिकी विहिता । अस्यां सरलया सरसया च भाषया

सभाविवरणानि वार्ताः लेखाः सुभाषितानि च प्रकाश्यन्ते । अस्यां तेलुगु-भाषायामपि वार्ताः सूचनाः लेखाश्च प्रकाशिताः भवन्ति ।

१९६४ तमे वर्षे जयपुरतः श्रीगोविन्दप्रसाददाधीचस्य सम्पादकत्वे 'कल्याणी'-नाम्नी मासिक-पत्रिका आरब्धा । वर्षत्रयं यावत् प्रकाशितायामस्यां पत्रिकायां लेखाः कविता-नाटक-बालकथाः हास्यपद्यानि, अपि च महिला-आयुर्वेद-व्याकरण-स्तम्भेषु निबन्धाः प्रकाश्यन्ते स्म । अत्र सम्पादकीयं सामयिकं स्वभावाभिव्यक्तिरूपं भवति स्म ।

९९७० तए वर्षे रजस्थान-साहित्य-अकादम्या उदयपुरतः 'मधुमती' इति मासिकपत्रिका संस्कृतस्य सर्जनात्मक-लेखानां प्रोत्साहनार्थं प्रकाशिता । श्रीगणेशरामशर्मणः संपादकत्वे अस्याः पत्रिकायाः एकैवाङ्कः प्रकाशितः । स्वतन्त्रभरते अनेकाः मासिक्यः पत्रिकाः प्रकाशिताः तासु काश्चन अस्तङ्गताः काश्चन नूतनाः आविर्भूताः । साम्प्रतं प्रायेण विंशतिः संस्कृत-मासिकपत्रिकाः प्रकाश्यन्ते । विस्तरभिया अन्यासां द्वैमासिक-त्रैमासिकादि-पत्र-पत्रिकाणां विवरणमत्र नैव व्याह्रियते ।

## आधुनिकी संसृत-पत्रकारिता

कालविभाजनानुसारेण १९७०तः २०१२वर्षं यावत् परिगणिता आधुनिकी संस्कृत-पत्रकारिता गच्छता कालेन जवीयस्या गत्या समेधितास्ति ।

विंशशताब्दस्य अन्तिम-चरणे संजातायाः सूचनाक्रान्तेः कारणात् साम्प्रतम् आधुनिक-पत्रकरितायाम् अनेकविधं परिवर्तनं दरीदृश्यते । एकस्यामेव कस्याञ्चित् भाषायां प्रकाश्यमानस्य दैनिकवार्तापत्रस्य साप्ताहिक्याः पाक्षिक्याः वा वार्तापत्रिकायाः पृथक्-पृथगङ्काः (संस्करणानि) विभिन्नान् विषयान् आधृत्य प्रकाश्यन्ते । एतेषु विषयेषु बालपत्रकारिता, क्रीडापत्रकारिता, वाणिज्यपत्रकारिता इत्यादयो विभिन्नाः विषयाः आधुनिक-पत्रकारितायाम् अन्तर्भाविताः सञ्जाताः । आधुनिक-संस्कृत-पत्रकारितायाः स्थितिरपि प्रतिशतं शतमिता नैतादृशी, परञ्च न्यूनाधिकरूपेण एनमेव मार्गमनुसरतीति तु निश्चप्रचम् ।

एतदतिरिच्य, दृश्यपत्रकारिता-श्रव्यपत्रकारितयोः रेडियो-टीवीति प्रबलतरस्य प्राविधिक-माध्यम-द्वयस्य महती भूमिकापि आधुनिके युगे नोपेक्षितुं शक्यते।

एवं हि, सूचना-प्रविध्योः क्रान्तेः परिणामत्वेन कम्प्यूटरीकृते विश्वव्यापिनि अन्तर्जाले स्थापिताः नाना ई-पत्र-पत्रिकाश्चापि आधुनिकपत्रकारितायाः अङ्गीभूताः सन्ति। 'वेब्साईट्स्'इति वैद्युत्सन्देश-प्रणालीः आधृत्य भिन्नाः विभिन्नाः च पत्रपत्रिकाः विश्वजनीन-स्वरूपतां भजन्ते। 'Portal' इति अन्तर्जालिक-पत्र-माध्यमेन कस्याञ्चिदपि भाषायां विश्वस्य कस्मिन्नपि भागे स्थितो जनः कस्मिंश्चिदपि कालखण्डे (Time) अन्तर्जाल-(Internet)-माध्यमेन तद् द्रष्टुं तच्च पठितुं तच्च श्रोतुमर्हति। एतदस्ति वैचित्र्यम् अप्रतिमञ्च स्वरूपम् आधुनिक-पत्रकारितायाः।

संस्कृतस्य आधुनिक-पत्रकारितापि न्यूनाधिकरूपेण एतादृशमेव स्वरूपं सन्धत्ते। संस्कृतभाषायां दैनिकं वार्तापत्रं 'सुधर्मा'इति विगतेभ्यः एकचत्वारिंशद्वर्षेभ्योऽनारतं प्रकाश्यते। विगतेभ्यः अष्टत्रिंशद्वर्षेभ्यः प्रतिदिनं वारद्वयम् आकाशवाणीतः संस्कृतवार्ताः नैरन्तर्येण प्रसार्यन्ते। विगतेभ्यः अष्टादशवर्षेभ्यः टीवी-माध्यमेन दूरदर्शनात् प्रतिदिनं प्रातः संस्कृतवार्ताः प्रसारिताः भवन्ति।

अन्तर्जाले अनेकाः संस्कृत-सम्बद्धाः 'वेब्साइट्स्'इति वैद्युतसन्देशप्रणाल्यो वर्तन्ते, याः नाम संस्कृतस्य समुपयोगित्वं व्यवहार्यत्वं च ख्यापयति।

१८६६ ईस्वीय-वर्षादारब्धा संस्कृत-पत्रकारितायाः यात्रा अनेकविधाः बाधाश्चापि अन्वभवत्। अनेकत्र कण्टकाकीर्णे मार्गे संस्कृतपत्कारितायाः विकास-यात्रैषा कदाचित् मन्दतामुपगता, कदाचिच्च अवरुद्धगतिका जाता, परं च सौभाग्यस्यायं विषयो यत् सतीष्वपि अनेकासु बाधासु यात्रैषा निरन्तरं अग्रेसृता।

संस्कृत-पत्रकारितायाः आधुनिकोऽयम् आयामो विशालो व्यापकश्च। संस्कृत-पत्रकारितायाः यात्रायाः क्रमानुशीलनेन स्पष्टं प्रतीयते यत् देश-

स्य विभिन्नेषु भागेषु चिरात् प्रारब्धा संस्कृत-पत्र-पत्रिकाणां यात्रैषा क्रमशोऽभ्युदयपथि प्राचलत्।

संस्कृतभाषायाः सम्पर्केण सर्वाः अपि भारतीयाः प्रदेशभाषाः उत्तरोत्तरमवर्धत । राष्ट्रभाषायाः हिन्द्यास्तु स्वरूपमेव संस्कृत-साहाय्येन सुपुष्टं समृद्धञ्च वर्तते । इदमेव कारणं यत् प्रायशो द्विभाषिक-पत्रिकासु त्रिभाषिक-पत्रिकासु च संस्कृतरचनाः अवश्यमेव प्रकाश्यन्ते ।

**आधुनिक-संस्कृत-पत्रकारितायाः इतिहास-लेखने नूतन-शब्दानां योगदानम्**

संस्कृत-पत्रकारितायाः स्वरूपम् अस्माकं सामाजिक-जीवनशैल्याः अनुसारेण अनेकधा परिवर्तितम् । यद्यपि इतर-भाषापेक्षया संस्कृते दैनिक-पत्राणां साप्ताहिक-पाक्षिक-मासिक-पत्रिकाणां च संख्या न्यूनास्ति, तथापि एतत्तु सुस्पष्टं यत् अशेषभारतस्य सर्वाः अपि क्षेत्रीयाः भाषाः संस्कृतेन अतितरां पल्लविताः विकसिताश्च वर्तन्ते । अतः संपूर्णेऽपि भारते विभिन्नेषु नगरेषु शैक्षणिक-संस्थानेषु च यावत्यः संस्कृत-पत््र-पत्रिकाः प्रकाश्यन्ते, तासां सर्वासामपि संख्या आहत्य इतरभाषिक-पत्रपत्रिकाणां संख्यां नूतनमतिशेते । साम्प्रतमस्माभिः आकाशवाणी-दूरदर्शनयोः संस्कृत-वार्त्ताप्रसारणेषु ये ये नूतनाः शब्दाः प्रयुज्यन्ते तेषां संक्षिप्तनिदर्शनमत्र प्रस्तूयते यद्धि बहूनां पाठकानां लेखकानां पत्रकाराणां सञ्चार-माध्यम-कर्मिणां पत्रकारिताच्छात्राणां च हिताय सेत्स्यति । एते शब्दाः आङ्ग्लभाषायाः भावानुवादरूपाः सन्ति

| | |
|---|---|
| E-mail | विद्युत्पत्रम्, वि-पत्रम् |
| Close circuit television (CCTV) | निगूढ-परिदर्शियन्त्रम् |
| Rubber | धृषिः |
| Forensic Test | अपराधाभिज्ञान-परीक्षणम् |
| bail | प्रतिभूतिः, प्रत्याभूत्याधृता मुक्तिः |
| to share | साधरणीकर्तुम् |
| motivated | अभिप्रेरितः |
| software | प्रयोगसामग्री |

| | |
|---|---|
| hardware | यन्त्रसामग्री |
| countdown | प्रतीपगणनम् |
| cyber act | वैद्युताणविक-संचाराधिनियमः |
| double decker rail | द्वितलीयं रेलयानम् |
| constable | दण्डधरो रक्षिकर्मी |
| radio-bridge | श्रव्य-संचारसेतुः |
| digitization | अङ्कीय-संरक्षणम् |
| close circuit cameras | सूक्ष्मतर-परिधि-छायाङ्ककाः |
| time bomb device | कालचक्रिक-विस्फोटनम् |
| viscera sample | अन्त्र-प्रतिरूपम् |
| temper-proof-I-card | अक्षोभ्याभिज्ञान-पत्रम् |
| fusion energy | विलयीकृतोर्जा |
| recovery | प्रतिपूर्तिः |
| carbon | प्राङ्गारः |
| battery | सञ्चेत्री, सञ्चेत्रः, संचेत्रम् (ऊर्जासंचेत्री वा) |
| pre-paid mobile | प्राक्-शुल्कीयो जङ्गमदूरभाषः, प्राक्-प्रदत्तभाटकः जङ्गमदूरभाषः |
| animation films | वार्णिकरेखाचित्राणि |
| memorandum of understanding | अवबोधपत्रम् |
| bakery | आपूपिकापणम् |
| packet | पोटलिका |
| ration card | समांश-वितरण-पत्रम् |
| fax | प्रैष-छायापत्रम् |
| stapled visa | ग्रथित-प्रवेशानुज्ञापत्रम् |
| passport | पारगमनानुमति-पत्रम् |
| green house gas emission | विषाक्त-वात्युत्सर्जनम् |
| postmortem | शव-व्यवच्छेदः |
| broad-band connectivity | बृहद्बन्ध-सम्पृक्तिः |
| stock exchange | प्रतिभूति-विनिमय-केन्द्रम् |

| | |
|---|---|
| flag march | ध्वजप्रदर्शि-प्रबोधनम् |
| sim card | चलदूरभाषीय-स्मृतिपुटकम् |
| baton | ध्वजशिखा, क्रीडाज्योतिः |
| tomb | वर्तुलशिखरम् |
| exit poll | प्राक्परिणाम-विश्लेषणम् |

साम्प्रतं विषय-विशदीकरणार्थं पूर्वमहं संस्कृतपत्रकारितायाः संक्षिप्तमैति-ह्यं प्रस्तौमि ।

ऊनविंश-शताब्दे सप्तम-दशाब्दे प्रवर्तितायाः भारतीय-पत्रकारितायाः संस्कृत-पत्रकारितायाश्च विषये श्रीधरभास्करवर्णेकरस्य मराठीभा-षिकम् अर्वाचीन-संस्कृतसाहित्यम्[1] सन्दर्भ्य आचार्यो हीरलालशुक्लो निजपुस्तके लिखति

> In the seventh decade of the 19th century, the Indian journalism acquired a new life. Various newspapers were published in all the languages of the country. The Sanskrit journalism also passed through its birth pangs through this period. The विद्योदयः, published by Hrishikesh Bhattacharya, was accepted as the first monthly magazine of Sanskrit language, but now it has been established beyond dispute that the Kashividyasudhanidhi or Pandit published in June 1866 by the Government Sanskrit College, Varanasi was the first monthly journal of the Sanskrit language. Even the editor of Vidyodaya accepted this fact (Vidyodaya 36.2–3 (1907), editorial).

अस्माभिः दृष्टं यत् प्रागुक्त-कालविभाजन-त्रये विविधाः पत्र-पत्रिकाः भारतस्य विभिन्नभागेभ्यः प्रकाशिताः । तद्विषयिणी संक्षिप्त-सूची एवं व-र्तते -

१. सरस्वतीग्रन्थमालापत्रिका - Varanasi 1920
२. सरस्वतीभवनानुशीलनपत्रिका - Varanasi 1920
३. संस्कृतसाकेत - Ayodhya 1920

[1] पृ० २८४ ।

४. सुप्रभातम् - Ayodhya 1922
५. सूर्योदयम् - Varanasi 1924
६. ब्राह्मणमहासम्मलनम् - Varanasi 1928
७. श्रीमन्महाराजसंस्कृतकालेजपत्रिका - Mysore 1924
८. उद्यानपत्रिका - Tirupati 1926
९. संस्कृतम् - Ayodhya 1930
१०. सहस्रांशुः - Varanasi 1927
११. सुरभारती - Varanasi 1927
१२. देववाणी - Calcutta 1934
१३. मञ्जूषा - Calcutta 1935
१४. मधुरवाणी - Belgaon (Mysore) 1935
१५. श्रीचित्रा - Travancore 1940
१६. श्रीपीयूषपत्रिका - Nadiyad (Gujarat) 1931
१७. भारतसुधा - Poona 1932
१८. स्त्रीः - Srinagar 1933
१९. अमरभारती - Varanasi 1934
२०. संस्कृतपद्यवाणी - Calcutta 1934
२१. वल्लरी - Varanasi 1935
२२. ज्योतिष्मती - Varanasi 1936
२३. संस्कृतसन्देशः - Varanasi 1939
२४. ब्रह्मविद्या - Madras 1934
२५. उच्छृंखलम् - Varanasi 1941
२६. अमृतवाणी - Bangalore 1941
२७. चतुर्मासिकीपत्रिका - Trivendrum 1941
२८. सारस्वतीसुषमा - Varanasi 1942
२९. अमरभारती - Varanasi 1944
३०. कौमुदी - Hyderabad 1944
३१. सुरभारती - Bombay 1945
३२. मालवमयूर - Mandsore (MP) 1946
३३. वैदिकधर्मविवर्धिनी - Madras 1946
३४. श्रीकेरलवर्मविद्यालयपत्रिका - South Godavari 1948
३५. ब्रह्मविद्या - Kumbhakonam 1948

३६. हंसः - Delhi 1949
३७. गुरुकुलपत्रिका - Kangari, Hardwar 1949
३८. मनोरमा - Ganjam 1949
३९. भारती - Varanasi 1949
४०. बालसंस्कृतम् - Bombay 1949
४१. भारती - Jaipur 1951
४२. वैदिकमनोरमा - Kanjivaram 1951
४३. प्रतिभा - Varanasi 1951
४४. संस्कृतभवितव्यम् - Nagpur 1951
४५. संस्कृतसन्देशः - Kathmandu 1953
४६. श्रीरविवर्मसंस्कृतग्रन्थावली - Tripunithura 1953
४७. पण्डितपत्रिका - Varanasi 1953
४८. वैजयन्ती - Bagatkot Bijapur 1953
४९. भाषा - Guntur 1955
५०. दिव्यज्योतिः - Simla 1955
५१. जयतु संस्कृतम् - Kathmandu 1958
५२. भारतवाणी - Poona 1958
५३. शारदा - Poona 1959
५४. पुराणम् - Varanasi 1959
५५. संस्कृतप्रतिभा - New Delhi 1959
५६. ज्ञानवर्धिनी - Lucknow 1959
५७. सुरभारती - Varanasi 1959
५८. संष्कृति - Poona 1961
५९. सागरिका - Sagar 1963
६०. संविद् - Bombay 1964
६१. प्राच्यभारती - Gauhati 1965
६२. संगमनी - Allahabad 1965
६३. गुञ्जारव - Ahmednagar
६४. विश्वसंस्कृतम् - Hoshiarpur
६५. मेधा - Raipur

अत्रेदं विशेषणावधेयं यत् १९०७तमे वर्षे जूनमासस्य प्रथमदिनाङ्कात् त्रिवेन्द्रमतः जयन्ती-नाम्नः प्रथमस्य संस्कृत-दिनपत्रस्य प्रकाशनम-

जायत । ततः परं न केनापि एतादृशं साहसं कृतम् । ५२-वर्षानन्तरम् अर्थात् १९६९तमे वर्षे पण्डितः कळले-नडादूरु-वरदराजय्यङ्गार्यः मैसूरुतः सुधर्मा इति दैनिकं संस्कृत-वार्त्तापत्रं प्रकाश्य आधुनिक-संस्कृत-पत्रकारितायाः शुभारम्भं व्यदधात् । अस्यां परम्परायामनुवर्तिनि काले १९७४तमे वर्षे जूनमासे ३०तमदिनाङ्कात् प्रतिदिनं प्रातः आकाशवाणीतः संस्कृत-वार्त्ता-प्रसारणमारब्धं । ततः परं साम्प्रतं प्रायेण सार्धैकवर्षात् संस्कृतवर्त्तमानपत्रम्, विश्वस्य वृत्तान्तम् चानारतं दैनिक-संस्कृतवार्त्तापत्रत्वेन प्रवर्तेते ।